# Shri Shiva Mahapuranam 25 Rudra Samhita Yuddhakhandah

# શ્રીશિવમહાપુરાણમ્ ૨૫ રુદ્રસંહિતાયાં યુદ્ધખણ્ડઃ

## Document Information

Text title : Shivapuranam 2.5 rudrasaMhitA yuddhakhaNDaH

File name : shivapurANam2rudrasaMhitA5yuddhakhaNDaH.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2026

*sanskritdocuments.org*

# શ્રીશિવમહાપુરાણમ્ ૨૫ રુદ્રસંહિતાયાં યુદ્ધખણ્ડઃ

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૧. પ્રથમોઽધ્યાયઃ । ત્રિપુરવર્ણનમ્ ।

નારદ ઉવાચ ।
શ્રુતમસ્માભિરાનન્દપ્રદં ચરિતમુત્તમમ્ ।
ગૃહસ્થસ્યૈવ શમ્ભોશ્ચ ગણસ્કન્દાદિસત્કથમ્ ॥ ૧॥

ઇદાનીં બ્રૂહિ સુપ્રીત્યા ચરિતં વરમુત્તમમ્ ।
શઙ્કરો હિ યથા રુદ્રો જઘાન વિહરન્ ખલાન્ ॥ ૨॥

કથં દદાહ ભગવાન્નગરાણિ સુરદ્વિષામ્ ।
ત્રીણ્યેકેન ચ બાણેન યુગપત્કેન વીર્યવાન્ ॥ ૩॥

એતત્સર્વં સમાચક્ષ્વ ચરિતં શશિમૌલિનઃ ।
દેવર્ષિસુખદં શશ્વન્માયાવિહરતઃ પ્રભોઃ ॥ ૪॥

બ્રહ્મોવાચ ।
એવમેતત્પુરા પૃષ્ટો વ્યાસેન ઋષિસત્તમ ।
સનત્કુમારં પ્રોવાચ તદેવ કથયામ્યહમ્ ॥ ૫॥

સનત્કુમાર ઉવાચ ।
શ ૃણુ વ્યાસ મહાપ્રાજ્ઞ ચરિતં શશિમૌલિનઃ ।
યથા દદાહ ત્રિપુરં બાણેનૈકેન વિશ્વહૃત્ ॥ ૬॥

શિવાત્મજેન સ્કન્દેન નિહતે તારકાસુરે ।
તત્પુત્રાસ્તુ ત્રયો દૈત્યાઃ પર્યતપ્યન્મુનીશ્વર ॥ ૭॥

તારકાક્ષસ્તુ તજ્જ્યેષ્ઠો વિદ્યુન્માલી ચ મધ્યમઃ ।
કમલાક્ષઃ કનીયાંશ્ચ સર્વે તુલ્યબલાઃ સદા ॥ ૮॥

જિતેન્દ્રિયાઃ સુસન્નદ્ધાઃ સંયતાઃ સત્યવાદિનઃ ।
દૃઢચિત્તા મહાવીરા દેવદ્રોહિણ એવ ચ ॥ ૯॥

તે તુ મેરુગુહાં ગત્વા તપશ્ચક્રુર્મહાદ્ભુતમ્ ।
ત્રયઃ સર્વાન્સુભોગાંશ્ચ વિહાય સુમનોહરાન્ ॥ ૧૦॥

વસન્તે સર્વકામાંશ્ચ ગીતવાદિત્રનિસ્સ્વનમ્ ।
વિહાય સોત્સવં તેપુસ્ત્રયસ્તે તારકાત્મજાઃ ॥ ૧૧॥

ગ્રીષ્મે સૂર્યપ્રભાં જિત્વા દિક્ષુ પ્રજ્વાલ્ય પાવકમ્ ।
તન્મધ્યસંસ્થાઃ સિદ્ધ્યર્થં જુહુવુર્હવ્યમાદરાત્ ॥ ૧૨॥

મહાપ્રતાપપતિતાઃસર્વેઽપ્યાસન્ સુમૂર્ચ્છિતાઃ ।
વર્ષાસુ ગતસન્ત્રાસા વૃષ્ટિં મૂર્દ્ધન્યધારયન્ ॥ ૧૩॥

શરત્કાલે પ્રભૂતં તુ ભોજનં તુ બુભુક્ષિતાઃ ।
રમ્યં સ્નિગ્ધં સ્થિરં હૃદ્યં ફલં મૂલમનુત્તમમ્ ॥ ૧૪॥

સંયમાત્ક્ષુત્તૃષો જિત્વા પાનાન્યુચ્ચાવચાન્યપિ ।
બુભુક્ષિતેભ્યો દત્ત્વા તુ બભૂવુરુપલા ઇવ ॥ ૧૫॥

સંસ્થિતાસ્તે મહાત્માનો નિરાધારાશ્ચતુર્દિશમ્ ।
હેમન્તે ગિરિમાશ્રિત્ય ધૈર્યેણ પરમેણ તુ ॥ ૧૬॥

તુષારદેહસઞ્છન્ના જલક્લિન્નેન વાસસા ।
આસાદ્ય દેહં ક્ષૌમેણ શિશિરે તોયમધ્યગાઃ ॥ ૧૭॥

અનિર્વિણ્ણાસ્તતઃસર્વે ક્રમશોઽવર્દ્ધયંસ્તપઃ ।
તેપુસ્ત્રયસ્તે તત્પુત્રા વિધિમુદ્દિશ્ય સત્તમાઃ ॥ ૧૮॥

તપ ઉગ્રં સમાસ્થાય નિયમે પરમે સ્થિતાઃ ।
તપસા કર્ષયામાસુર્દેહાન્ સ્વાન્ દાનવોત્તમાઃ ॥ ૧૯॥

વર્ષાણાં શતકં ચૈવ પદમેકં નિધાય ચ ।
ભૂમૌ સ્થિત્વા પરં તત્ર તેપુસ્તે બલવત્તરાઃ ॥ ૨૦॥

તે સહસ્રં તુ વર્ષાણાં વાતભક્ષાઃ સુદારુણાઃ ।
તપસ્તેપુર્દુરાત્માનઃ પરં તાપમુપાગતાઃ ॥ ૨૧॥

વર્ષાણાં તુ સહસ્રં વૈ મસ્તકેનાસ્થિતાસ્તથા ।
વર્ષાણાં તુ શતેનૈવ ઊર્ધ્વબાહવ આસ્થિતાઃ ॥ ૨૨॥

એવં દુઃખં પરં પ્રાપ્તા દુરાગ્રહપરા ઇમે ।
ઈદૃક્ તે સંસ્થિતા દૈત્યા દિવારાત્રમતન્દ્રિતા ॥ ૨૩॥

એવં તેષાં ગતઃ કાલો મહાન્ સુતપતાં મુને ।
બ્રહ્માત્મનાં તારકાણાં ધર્મેણેતિ મતિર્મમ ॥ ૨૪॥

પ્રાદુરાસીત્તતો બ્રહ્મા સુરાસુરગુરુર્મહાન્ ।
સન્તુષ્ટસ્તપસા તેષાં વરં દાતું મહાયશાઃ ॥ ૨૫॥

મુનિદેવાસુરૈઃ સાર્દ્ધં સાન્ત્વપૂર્વમિદં વચઃ ।
તતસ્તાનબ્રવીત્સર્વાન્ સર્વભૂતપિતામહઃ ॥ ૨૫॥

બ્રહ્મોવાચ ।
પ્રસન્નોઽસ્મિ મહાદૈત્યા યુષ્માકં તપસા મુને ।
સર્વં દાસ્યામિ યુષ્મભ્યં વરં બ્રૂત યદીપ્સિતમ્ ॥ ૨૭॥

કિમર્થં સુતપસ્તપ્તં કથયધ્વં સુરદ્વિષઃ ।
સર્વેષાં તપસો દાતા સર્વકર્તાસ્મિ સર્વદા ॥ ૨૮॥

સનત્કુમાર ઉવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા શનૈસ્તે સ્વાત્મનો ગતમ્ ।
ઊચુઃ પ્રાઞ્જલયઃ સર્વે પ્રણિપત્ય પિતામહમ્ ॥ ૨૯॥

દૈત્યા ઊચુઃ ।
યદિ પ્રસન્નો દેવેશ યદિ દેયો વરસ્ત્વયા ।
અવધ્યત્વં ચ સર્વેષાં સર્વભૂતેષુ દેહિનઃ ॥ ૩૦॥

સ્થિરાન્ કુરુ જગન્નાથ પાન્તુ નઃ પરિપન્થિનઃ ।
જરારોગાદયઃ સર્વે નાસ્માન્મૃત્યુરગાત્ ક્વચિત્ ॥ ૩૧॥

અજરાશ્ચામરાઃ સર્વે ભવામ ઇતિ નો મતમ્ ।
સમૃત્યવઃ કરિષ્યામઃ સર્વાનન્યાંસ્ત્રિલોકકે ॥ ૩૨॥

લક્ષ્મ્યા કિં તદ્વિપુલયા કિં કાર્યં હિ પુરોત્તમૈઃ ।
અન્યૈશ્ચ વિપુલૈર્ભોગૈઃ સ્થાનૈશ્વર્યેણ વા પુનઃ ॥ ૩૩॥

યત્રૈવ મૃત્યુના ગ્રસ્તો નિયતં પઞ્ચભિર્દિનૈઃ ।
વ્યર્થં તસ્યાખિલં બ્રહ્મન્ નિશ્ચિતં ન ઇતીવ હિ ॥ ૩૪॥

સનત્કુમાર ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તેષાં દૈત્યાનાં ચ તપસ્વિનામ્ ।
પ્રત્યુવાચ શિવં સ્મૃત્વા સ્વપ્રભું ગિરિશં વિધિઃ ॥ ૩૫॥

બ્રહ્મોવાચ ।
નાસ્તિ સર્વામરત્વં ચ નિવર્તધ્વમતોઽસુરાઃ ।
અન્યં વરં વૃણીધ્વં વૈ યાદૃશો વો હિ રોચતે ॥ ૩૬॥

જાતો હનિષ્યતે નૂનં જન્તુઃ કોઽપ્યસુરાઃ ક્વચિત્ ।
અજરશ્ચામરો લોકે ન ભવિષ્યતિ ભૂતલે ॥ ૩૭॥

ઋતે તુ ખણ્ડપરશોઃ કાલકાલાદ્ધરેસ્તથા ।
તૌ ધર્માધર્મપરમાવવ્યક્તૌ વ્યક્તરૂપિણૌ ॥ ૩૮॥

સમ્પીડનાય જગતો યદિ સ ક્રિયતે તપઃ ।
સફલં તદ્વ્રતં વેદ્યં તસ્માત્સુવિહિતં તપઃ ॥ ૩૯॥

તદ્વિચાર્ય સ્વયં બુદ્ધ્યા ન શક્યં યત્સુરાસુરૈઃ ।
દુર્લભં વા સુદુસ્સાધ્યં મૃત્યું વઞ્ચયતાનઘાઃ ॥ ૪૦॥

તત્કિઞ્ચિન્મરણે હેતું વૃણીધ્વં સત્ત્વમાશ્રિતાઃ ।
યેન મૃત્યુર્નૈવ વૃતો રક્ષતસ્તત્પૃથક્ પૃથક્ ॥ ૪૧॥

સનત્કુમાર ઉવાચ ।
એતદ્વિધિવચઃ શ્રુત્વા મુહૂર્તં ધ્યાનમાસ્થિતાઃ ।
પ્રોચુસ્તે ચિન્તયિત્વાથ સર્વલોકપિતામહમ્ ॥ ૪૨॥

દૈત્યા ઊચુઃ ।
ભગવન્નાસ્તિ નો વેશ્મ પરાક્રમવતામપિ ।
અધૃષ્યાઃ શાત્રવાનાં તુ યન્ન વત્સ્યામહે સુખમ્ ॥ ૪૩॥

પુરાણિ ત્રીણિ નો દેહિ નિર્માયાત્યદ્ભુતાનિ હિ ।
સર્વસમ્પત્સમૃદ્ધાન્યપ્રધૃષ્યાણિ દિવૌકસામ્ ॥ ૪૪॥

વયં પુરાણિ ત્રીણ્યેવં સમાસ્થાય મહીમિમામ્ ।
ચરિષ્યામો હિ લોકેશ ત્વત્પ્રસાદાજ્જગદ્ગુરો ॥ ૪૫॥

તારકાક્ષસ્તતઃ પ્રાહ યદભેદ્યં સુરૈરપિ ।
કરોતિ વિશ્વકર્મા તન્મમ હેમમયં પુરમ્ ॥ ૪૬॥

યયાચે કમલાક્ષસ્તુ રાજતં સુમહત્પુરમ્ ।
વિદ્યુન્માલી ચ સંહૃષ્ટો વજ્રાયસમયં મહત્ ॥ ૪૭॥

પુરેષ્વેતેષુ ભો બ્રહ્મન્નેકસ્થાનસ્થિતેષુ ચ ।
મધ્યાહ્નાભિજિતે કાલે શીતાંશૌ પુષ્ય સંસ્થિતે ॥ ૪૮॥

ઉપર્યુપર્યદૃષ્ટેષુ વ્યોમ્નિ લીલાભ્રસંસ્થિતે ।
વર્ષત્સુ કાલમેઘેષુ પુષ્કરાવર્તનામસુ ॥ ૪૯॥

તથા વર્ષસહસ્રાન્તે સમેષ્યામઃ પરસ્પરમ્ ।
એકીભાવં ગમિષ્યન્તિ પુરાણ્યેતાનિ નાન્યથા ॥ ૫૦॥

સર્વદેવમયો દેવઃ સર્વેષાં મે કુહેલયા ।
અસમ્ભવે રથે તિષ્ઠન્ સર્વોપસ્કરણાન્વિતે ॥ ૫૧॥

અસમ્ભાવ્યૈકકાણ્ડેન ભિનત્તુ નગરાણિ નઃ ।
નિર્વૈરઃ કૃત્તિવાસાસ્તુ યોઽસ્માકમિતિ નિત્યશઃ ॥ ૫૨॥

વન્દ્યઃ પૂજ્યોઽભિવાદ્યશ્ચ સોસ્માકં નિર્દહેત્કથમ્ ।
ઇતિ ચેતસિ સન્ધાય તાદૃશો ભુવિ દુર્લભઃ ॥ ૫૩॥

સનત્કુમાર ઉવાચ ।
એતચ્છ્રુત્વા વચસ્તેષાં બ્રહ્મા લોકપિતામહઃ ।
એવમસ્ત્વિતિ તાન્ પ્રાહ સૃષ્ટિકર્તા સ્મરન્ શિવમ્ ॥ ૫૪॥

આજ્ઞાં દદૌ મયસ્યાપિ કુરુ ત્વં નગરત્રયમ્ ।
કાઞ્ચનં રાજતં ચૈવ આયસં ચેતિ ભો મય ॥ ૫૫॥

ઇત્યાદિશ્ય મયં બ્રહ્મા પ્રત્યક્ષં પ્રાવિશદ્દિવમ્ ।
તેષાં તારકપુત્રાણાં પશ્યતાં નિજધામ હિ ॥ ૫૬॥

તતો મયશ્ચ તપસા ચક્રે ધીરઃ પુરાણ્યથ ।
કાઞ્ચનં તારકાક્ષસ્ય કમલાક્ષસ્ય રાજતમ્ ॥ ૫૭॥

વિદ્યુન્માલ્યાયસં ચૈવ ત્રિવિધં દુર્ગમુત્તમમ્ ।
સ્વર્ગે વ્યોમ્નિ ચ ભૂમૌ ચ ક્રમાજ્જ્ઞેયાનિ તાનિ વૈ ॥ ૫૮॥

દત્ત્વા તેભ્યોઽસુરેભ્યશ્ચ પુરાણિ ત્રીણિ વૈ મયઃ ।

પ્રવિવેશ સ્વયં તત્ર હિતકામપરાયણઃ ॥ ૫૯॥

એવં પુરત્રયં પ્રાપ્ય પ્રવિષ્ટાસ્તારકાત્મજાઃ ।
બુભુજુઃ સકલાન્ભોગાન્મહાબલપરાક્રમાઃ ॥ ૬૦॥

કલ્પદ્રુમૈશ્ચ સઙ્કીર્ણં ગજવાજિસમાકુલમ્ ।
નાનાપ્રાસાદસઙ્કીર્ણં મણિજાલસમાવૃતમ્ ॥ ૬૧॥

સૂર્યમણ્ડલસઙ્કાશૈર્વિમાનૈઃ સર્વતોમુખૈઃ ।
પદ્મરાગમયૈશ્ચૈવ શોભિતં ચન્દ્રસન્નિભૈઃ ॥ ૬૨॥

પ્રાસાદૈર્ગોપુરૈર્દિવ્યૈઃ કૈલાસશિખરોપમૈઃ ।
દિવ્યસ્ત્રીજનસઙ્કીર્ણૈર્ગન્ધર્વસ્સિદ્ધચારણૈઃ ॥ ૬૩॥

રુદ્રાલયૈઃ પ્રતિગૃહમગ્નિહોત્રૈઃ પ્રતિષ્ઠિતૈઃ ।
દ્વિજોત્તમૈઃ શાસ્ત્રવિજ્ઞૈઃ શિવભક્તિરતૈઃ સદા ॥ ૬૪॥

વાપીકૂપતડાગૈશ્ચ દીર્ઘિકાભિઃસુશોભિતમ્ ।
ઉદ્યાનવનવૃક્ષૈશ્ચ સ્વર્ગચ્યુતગુણોત્તમૈઃ ॥ ૬૫॥

નદીનદસરિન્મુખ્યપુષ્કરૈઃ શોભિતં સદા ।
સર્વકામફલાઢ્યૈશ્ચાનેકૈર્વૃક્ષૈર્મનોહરમ્ ॥ ૬૬॥

મત્તમાતઙ્ગયૂથૈશ્ચ તુરઙ્ગૈશ્ચ સુશોભનૈઃ ।
રથૈશ્ચ વિવિધાકારૈઃ શિબિકાભિરલઙ્કૃતમ્ ॥ ૬૭॥

સમયાદિશિકૈશ્ચૈવ ક્રીડાસ્થાનૈઃ પૃથક્પૃથક્ ।
વેદાધ્યયનશાલાભિર્વિવિધાભિઃ પૃથક્પૃથક્ ॥ ૬૮॥

અદૃષ્ટં મનસા વાચા પાપાન્વિતનરૈસ્સદા ।
મહાત્મભિશ્શુભાચારૈઃ પુણ્યવદ્ભિઃ પ્રવીક્ષ્યતે ॥ ૬૯॥

પતિવ્રતાભિઃ સર્વત્ર પાવિતં સ્થલમુત્તમમ્ ।
પતિસેવનશીલાભિર્વિમુખાભિઃ કુધર્મતઃ ॥ ૭૦॥

દૈત્યશૂરૈર્મહાભાગૈઃ સદારૈઃ સસુતૈર્દ્વિજૈઃ ।
શ્રૌતસ્માર્તાર્થતત્ત્વજ્ઞૈઃ સ્વધર્મનિરતૈર્યુતમ્ ॥ ૭૧॥

વ્યૂઢોરસ્કૈર્વૃષસ્કન્ધૈઃ સામયુદ્ધધરૈઃ સદા ।
પ્રશાન્તૈઃ કુપિતૈશ્ચૈવ કુબ્જૈર્વામનકૈસ્તથા ॥ ૭૨॥

નીલોત્પલદલપ્રખ્યૈર્નીલકુઞ્ચિતમૂર્દ્ધજૈઃ ।
મયેન રક્ષિતૈઃ સર્વૈઃ શિક્ષિતૈર્યુદ્ધલાલસૈઃ ॥ ૭૩॥

વરસમરરતૈર્યુતં સમન્તા-
દજશિવપૂજનયા વિશુદ્ધવીર્યૈઃ ।
રવિમરુતમહેન્દ્રસન્નિકાશૈઃ
સુરમથનૈઃ સુદૃઢૈઃ સુસેવિતં યત્ ॥ ૭૪॥

શાસ્ત્રવેદપુરાણેષુ યે યે ધર્માઃ પ્રકીર્તિતાઃ ।
શિવપ્રિયાઃસદા દેવાસ્તે ધર્માસ્તત્ર સર્વતઃ ॥ ૭૫॥

એવં લબ્ધવરાસ્તે તુ દૈતેયાસ્તારકાત્મજાઃ ।
શૈવં મયમુપાશ્રિત્ય નિવસન્તિ સ્મ તત્ર હ ॥ ૭૬॥

સર્વં ત્રૈલોક્યમુત્સાર્ય પ્રવિશ્ય નગરાણિ તે ।
કુર્વન્તિ સ્મ મહદ્રાજ્યં શિવમાર્ગરતાઃ સદા ॥ ૭૭॥

તતો મહાન્ ગતઃ કાલો વસતાં પુણ્યકર્મણામ્ ।
યથાસુખં યથાજોષં સદ્રાજ્યં કુર્વતાં મુને ॥ ૭૮॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે ત્રિપુરવધોપાખ્યાને ત્રિપુરવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૨.૫.૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૨. દ્વિતીયોઽધ્યાયઃ । દેવસ્તુતિ ।

વ્યાસ ઉવાચ ।
બ્રહ્મપુત્ર મહાપ્રાજ્ઞ વદ મે વદતાં વર ।
તતઃ કિમભવદ્દેવાઃ કથં ચ સુખિનોઽભવન્ ॥ ૧॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય વ્યાસસ્યામિતધીમતઃ ।
સનત્કુમારઃ પ્રોવાચ સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૨॥

સનત્કુમાર ઉવાચ ।
અથ તત્પ્રભયા દગ્ધા દેવા હીન્દ્રાદયસ્તથા ।
સમ્મન્ત્ર્ય દુઃખિતાઃ સર્વે બ્રહ્માણં શરણં યયુઃ ॥ ૩॥

નત્વા પિતામહં પ્રીત્યા પરિક્ષિપ્યાખિલાઃ સુરાઃ ।
દુઃખં વિજ્ઞાપયામાસુર્વિલોક્યાવસરં તતઃ ॥ ૪॥

દેવા ઊચુઃ ।
ધાતસ્ત્રિપુરનાથેન સતારકસુતેન હિ ।
સર્વે પ્રતાપિતા નૂનં મયેન ત્રિદિવૌકસઃ ॥ ૫॥

અતસ્તે શરણં યાતા દુઃખિતા હિ વિધે વયમ્ ।
કુરુ ત્વં તદ્વધોપાયં સુખિનઃ સ્યામ તદ્યથા ॥ ૬॥

સનત્કુમાર ઉવાચ ।
ઇતિ વિજ્ઞાપિતો દેવૈર્વિહસ્ય ભવકૃદ્વિધિઃ ।
પ્રત્યુવાચાથ તાન્સર્વાન્મયતો ભીતમાનસાન્ ॥ ૭॥

બ્રહ્મોવાચ ।
ન ભેતવ્યં સુરાસ્તેભ્યો દાનવેભ્યો વિશેષતઃ ।
આચક્ષે તદ્વધોપાયં શિવં શર્વઃ કરિષ્યતિ ॥ ૮॥

મત્તો વિવર્ધિતો દૈત્યો વધં મત્તો ન ચાર્હતિ ।
તથાપિ પુણ્યં વર્દ્ધેત નગરે ત્રિપુરે પુનઃ ॥ ૯॥

શિવં ચ પ્રાર્થયધ્વં વૈ સર્વે દેવાઃ સવાસવાઃ ।
સર્વાધીશઃ પ્રસન્નશ્ચેત્સ વઃ કાર્યં કરિષ્યતિ ॥ ૧૦॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વિધેર્વાણીં સર્વે દેવાઃ સવાસવાઃ ।
દુઃખિતાસ્તે યયુસ્તત્ર યત્રાસ્તે વૃષભધ્વજઃ ॥ ૧૧॥

પ્રણમ્ય ભક્ત્યા દેવેશં સર્વે પ્રાઞ્જલયસ્તદા ।
તુષ્ટુવુર્વિનતસ્કન્ધાઃ શઙ્કરં લોકશઙ્કરમ્ ॥ ૧૨॥

દેવા ઊચુઃ ।
નમો હિરણ્યગર્ભાય સર્વસૃષ્ટિવિધાયિને ।
નમઃ સ્થિતિકૃતે તુભ્યં વિષ્ણવે પ્રભવિષ્ણવે ॥ ૧૩॥

નમો હરસ્વરૂપાય ભૂતસંહારકારિણે ।
નિર્ગુણાય નમસ્તુભ્યં શિવાયામિતતેજસે ॥ ૧૪॥

અવસ્થારહિતાયાથ નિર્વિકારાય વર્ચસે ।
મહાભૂતાત્મભૂતાય નિર્લિપ્તાય મહાત્મને ॥ ૧૫॥

નમસ્તે ભૂતપતયે મહાભારસહિષ્ણવે ।
તૃષ્ણાહરાય નિર્વૈરાકૃતયે ભૂરિતેજસે ॥ ૧૬॥

મહાદૈત્યમહારણ્યનાશિને દાવવહ્નયે ।
દૈત્યદ્રુમકુઠારાય નમસ્તે શૂલપાણયે ॥ ૧૭॥

મહાદનુજનાશાય નમસ્તે પરમેશ્વર ।
અમ્બિકાપતયે તુભ્યં નમઃ સર્વાસ્ત્રધારક ॥ ૧૮॥

નમસ્તે પાર્વતીનાથ પરમાત્મન્મહેશ્વર ।
નીલકણ્ઠાય રુદ્રાય નમસ્તે રુદ્રરૂપિણે ॥ ૧૯॥

નમો વેદાન્તવેદ્યાય માર્ગાતીતાય તે નમઃ ।
નમો ગુણસ્વરૂપાય ગુણિને ગુણવર્જિતે ॥ ૨૦॥

મહાદેવ નમસ્તુભ્યં ત્રિલોકીનન્દનાય ચ ।
પ્રદ્યુમ્નાયાનિરુદ્ધાય વાસુદેવાય તે નમઃ ॥ ૨૧॥

સઙ્કર્ષણાય દેવાય નમસ્તે કંસનાશિને ।
ચાણૂરમર્દિને તુભ્યં દામોદર વિષાદિને ॥ ૨૨॥

હૃષીકેશાચ્યુત વિભો મૃડ શઙ્કર તે નમઃ ।
અધોક્ષજ ગજારાતે કામારે વિષભક્ષણ ॥ ૨૩॥

નારાયણાય દેવાય નારાયણપરાય ચ ।
નારાયણસ્વરૂપાય નારાણયતનૂદ્ભવ ॥ ૨૪॥

નમસ્તે સર્વરૂપાય મહાનરકહારિણે ।
પાપાપહારિણે તુભ્યં નમો વૃષભવાહન ॥ ૨૫॥

ક્ષણાદિકાલરૂપાય સ્વભક્તબલદાયિને ।
નાનારૂપાય રૂપાય દૈત્યચક્રવિમર્દિને ॥ ૨૬॥

નમો બ્રહ્મણ્યદેવાય ગોબ્રાહ્મણહિતાય ચ ।
સહસ્રમૂર્ત્તયે તુભ્યં સહસ્રાવયવાય ચ ॥ ૨૭॥

ધર્મરૂપાય સત્ત્વાય નમઃ સત્ત્વાત્મને હર ।
વેદવેદ્યસ્વરૂપાય નમો વેદપ્રિયાય ચ ॥ ૨૮॥

નમો વેદસ્વરૂપાય વેદવક્ત્રે નમો નમઃ ।
સદાચારાધ્વગમ્યાય સદાચારાધ્વગામિને ॥ ૨૯॥

વિષ્ટરશ્રવસે તુભ્યં નમઃ સત્યમયાય ચ ।
સત્યપ્રિયાય સત્યાય સત્યગમ્યાય તે નમઃ ॥ ૩૦॥

નમસ્તે માયિને તુભ્યં માયાધીશાય વૈ નમઃ ।
બ્રહ્મગાય નમસ્તુભ્યં બ્રહ્મણે બ્રહ્મજાય ચ ॥ ૩૧॥

તપસે તે નમસ્ત્વીશ તપસા ફલદાયિને ।
સ્તુત્યાય સ્તુતયે નિત્યં સ્તુતિસમ્પ્રીતચેતસે ॥ ૩૨॥

શ્રુત્યાચારપ્રસન્નાય સ્તુત્યાચારપ્રિયાય ચ ।
ચતુર્વિધસ્વરૂપાય જલસ્થલજરૂપિણે ॥ ૩૩॥

સર્વે દેવાદયો નાથ શ્રેષ્ઠત્વેન વિભૂતયઃ ।
દેવાનામિન્દ્રરૂપોઽસિ ગ્રહાણાં ત્વં રવિર્મતઃ ॥ ૩૪॥

સત્યલોકોઽસિ લોકાનાં સરિતાં દ્યુસરિદ્ભવાન્ ।
શ્વેતવર્ણોઽસિ વર્ણાનાં સરસાં માનસં સરઃ ॥ ૩૫॥

શૈલાનાં ગિરિજાતાતઃ કામધુક્ત્વં ચ ગોષુ હ ।
ક્ષીરોદધિસ્તુ સિન્ધૂનાં ધાતૂનાં હાટકો ભવાન્ ॥ ૩૬॥

વર્ણાનાં બ્રાહ્મણોઽસિ ત્વં નૃણાં રાજાસિ શઙ્કર ।
મુક્તિક્ષેત્રેષુ કાશી ત્વં તીર્થાનાં તીર્થરાડ્ ભવાન્ ॥ ૩૭॥

ઉપલેષુ સમસ્તેષુ સ્ફટિકસ્ત્વં મહેશ્વર ।
કમલસ્ત્વં પ્રસૂનેષુ શૈલેષુ હિમવાંસ્તથા ॥ ૩૮॥

ભવાન્વાગ્વ્યવહારેષુ ભાર્ગવસ્ત્વં કવિષ્વપિ ।
પક્ષિષ્વેવાસિ શરભઃ સિંહો હિંસ્રેષુ સમ્મતઃ ॥ ૩૯॥

શાલગ્રામશિલા ચ ત્વં શિલાસુ વૃષભધ્વજ ।
પૂજ્યરૂપેષુ સર્વેષુ નર્મદાલિઙ્ગમેવ હિ ॥ ૪૦॥

નન્દીશ્વરોઽસિ પશુષુ વૃષભઃ પરમેશ્વર ।

વેદેષૂપનિષદ્રૂપી યજ્વનાં શીતભાનુમાન્ ॥ ૪૧॥

પ્રતાપિનાં પાવકસ્ત્વં શૈવાનામચ્યુતો ભવાન્ ।
ભારતં ત્વં પુરાણાનાં મકારોઽસ્યક્ષરેષુ ચ ॥ ૪૨॥

પ્રણવો બીજમન્ત્રાણાં દારુણાનાં વિષં ભવાન્ ।
વ્યોમવ્યાપ્તિમતાં ત્વં વૈ પરમાત્માસિ ચાત્મનામ્ ॥ ૪૩॥

ઇન્દ્રિયાણાં મનશ્ચ ત્વં દાનાનામભયં ભવાન્ ।
પાવનાનાં જલં ચાસિ જીવનાનાં તથામૃતમ્ ॥ ૪૪॥

લાભાનાં પુત્રલાભોઽસિ વાયુર્વેગવતામસિ ।
નિત્યકર્મસુ સર્વેષુ સન્ધ્યોપાસ્તિર્ભવાન્મતઃ ॥ ૪૫॥

ક્રતૂનામશ્વમેધોઽસિ યુગાનાં પ્રથમો યુગઃ ।
પુષ્યસ્ત્વં સર્વધિષ્ણ્યાનામમાવાસ્યા તિથિષ્વસિ ॥ ૪૬॥

સર્વર્તુષુ વસન્તસ્ત્વં સર્વપર્વસુ સઙ્ક્રમઃ ।
કુશોઽસિ તૃણજાતીનાં સ્થૂલવૃક્ષેષુ વૈ વટઃ ॥ ૪૭॥

યોગેષુ ચ વ્યતીપાતઃસોમવલ્લી લતાસુ ચ ।
બુદ્ધીનાં ધર્મબુદ્ધિસ્ત્વં કલત્રં સુહૃદાં ભવાન્ ॥ ૪૮॥

સાધકાનાં શુચીનાં ત્વં પ્રાણાયામો મહેશ્વર ।
જ્યોતિર્લિઙ્ગેષુ સર્વેષુ ભવાન્ વિશ્વેશ્વરો મતઃ ॥ ૪૯॥

ધર્મસ્ત્વં સર્વબન્ધૂનામાશ્રમાણાં પરો ભવાન્ ।
મોક્ષસ્ત્વં સર્વવર્ગેષુ રુદ્રાણાં નીલલોહિતઃ ॥ ૫૦॥

આદિત્યાનાં વાસુદેવો હનૂમાન્વાનરેષુ ચ ।
યજ્ઞાનાં જપયજ્ઞોઽસિ રામઃ શસ્ત્રભૃતાં ભવાન્ ॥ ૫૧॥

ગન્ધર્વાણાં ચિત્રરથો વસૂનાં પાવકો ધ્રુવમ્ ।
માસાનામધિમાસસ્ત્વં વ્રતાનાં ત્વં ચતુર્દશી ॥ ૫૨॥

ઐરાવતો ગજેન્દ્રાણાં સિદ્ધાનાં કપિલો મતઃ ।
અનન્તસ્ત્વં હિ નાગાનાં પિતૃણામર્યમા ભવાન્ ॥ ૫૩॥

કાલઃ કલયતાં ચ ત્વં દૈત્યાનાં બલિરેવ ચ ।
કિં બહૂક્તેન દેવેશ સર્વં વિષ્ટભ્ય વૈ જગત્ ॥ ૫૪॥

એકાંશેન સ્થિતસ્ત્વં હિ બહિઃસ્થોઽન્વિત એવ ચ ॥ ૫૫॥

સનત્કુમાર ઉવાચ ।
ઇતિ સ્તુત્વા સુરાઃ સર્વે મહાદેવં વૃષધ્વજમ્ ।
સ્તોત્રૈર્નાનાવિધૈર્દિવ્યૈઃ શૂલિનં પરમેશ્વરમ્ ॥ ૫૬॥

પ્રત્યૂચુઃ પ્રસ્તુતં દીનાઃ સ્વાર્થં સ્વાર્થવિચક્ષણાઃ ।
વાસવાદ્યા નતસ્કન્ધાઃ કૃતાઞ્જલિપુટા મુને ॥ ૫૭॥

દેવા ઊચુઃ ।
પરાજિતા મહાદેવ ભ્રાતૃભ્યાં સહિતેન તુ ।
ભગવંસ્તારકોત્પન્નૈઃ સર્વે દેવાઃ સવાસવાઃ ॥ ૫૮॥

ત્રૈલોક્યં સ્વવશં નીતં તથા ચ મુનિસત્તમાઃ ।
વિધ્વસ્તાઃ સર્વસંસિદ્ધાઃ સર્વમુત્સાદિતં જગત્ ॥ ૫૯॥

યજ્ઞભાગાન્સમગ્રાઁસ્તુ સ્વયં ગૃહ્ણાતિ દારુણઃ ।
પ્રવર્તિતો હ્યધર્મસ્તૈરૃષીણાં ચ નિવારિતઃ ॥ ૬૦॥

અવધ્યાઃ સર્વભૂતાનાં નિયતં તારકાત્મજાઃ ।
તદિચ્છયા પ્રકુર્વન્તિ સર્વે કર્માણિ શઙ્કર ॥ ૬૧॥

યાવન્ન ક્ષીયતે દૈત્યૈર્ઘોરૈસ્ત્રિપુરવાસિભિઃ ।
તાવદ્વિધીયતાં નીતિર્યયા સંરક્ષ્યતે જગત્ ॥ ૬૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષામિન્દ્રાદીનાં દિવૌકસામ્ ।
શિવઃ સમ્ભાષમાણાનાં પ્રતિવાક્યમુવાચ સઃ ॥ ૬૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે દેવસ્તુતિર્નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨.૫.૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૩. તૃતીયોઽધ્યાયઃ । ત્રિપુરવધોપાખ્યાને ભૂતત્રિપુરધર્મવર્ણનમ્ ।

શિવ ઉવાચ ।
અયં વૈ ત્રિપુરાધ્યક્ષઃ પુણ્યવાન્વર્તતેઽધુના ।
યત્ર પુણ્યં પ્રવર્તેત ન હન્તવ્યો બુધૈઃ ક્વચિત્ ॥ ૧॥

જાનામિ દેવકષ્ટં ચ વિબુધાઃ સકલં મહત્ ।
દૈત્યાસ્તે પ્રબલા હન્તુમશક્યાસ્તુ સુરાસુરૈઃ ॥ ૨॥

પુણ્યવન્તસ્તુ તે સર્વે સમયાસ્તારકાત્મજાઃ ।
દુસ્સાધ્યસ્તુ વધસ્તેષાં સર્વેષાં પુરવાસિનામ્ ॥ ૩॥

મિત્રદ્રોહં કથં જાનન્કરોમિ રણકર્કશઃ ।
સુહૃદ્દ્રોહે મહત્પાપં પૂર્વમુક્તં સ્વયમ્ભુવા ॥ ૪॥

બ્રહ્મઘ્ને ચ સુરાપે ચ સ્તેયે ભગ્નવ્રતે તથા ।
નિષ્કૃતિર્વિહિતા સદ્ભિઃ કૃતઘ્ને નાસ્તિ નિષ્કૃતિઃ ॥ ૫॥

મમ ભક્તાસ્તુ તે દૈત્યા મયા વધ્યાઃ કથં સુરાઃ ।
વિચાર્યતાં ભવદ્ભિશ્ચ ધર્મજ્ઞૈરેવ ધર્મતઃ ॥ ૬॥

તાવત્તે નૈવ હન્તવ્યા યાવદ્ભક્તિકૃતશ્ચ મે ।
તથાપિ વિષ્ણવે દેવા નિવેદ્યં કારણં ત્વિદમ્ ॥ ૭॥

સનત્કુમાર ઉવાચ ।
ઇત્યેવં તદ્વચઃ શ્રુત્વા દેવાઃ શક્રપુરોગમાઃ ।
ન્યવેદયન્ દ્રુતં સર્વે બ્રહ્મણે પ્રથમં મુને ॥ ૮॥

તતો વિધિં પુરસ્કૃત્ય સર્વે દેવાઃ સવાસવાઃ ।
વૈકુણ્ઠં પ્રયયુઃ શીઘ્રં સર્વે શોભાસમન્વિતમ્ ॥ ૯॥

તત્ર ગત્વા હરિં દૃષ્ટ્વા પ્રણેમુર્જાતસમ્ભ્રમાઃ ।
તુષ્ટુવુશ્ચ મહાભક્ત્યા કૃતાઞ્જલિપુટાઃ સુરાઃ ॥ ૧૦॥

સ્વદુઃખકારણં સર્વં પૂર્વવત્તદનન્તરમ્ ।
ન્યવેદયન્દ્રુતં તસ્મૈ વિષ્ણવે પ્રભવિષ્ણવે ॥ ૧૧॥

દેવદુઃખં તતઃ શ્રુત્વા દત્તં ચ ત્રિપુરાલયૈઃ ।
જ્ઞાત્વા વ્રતં ચ તેષાં તદ્વિષ્ણુર્વચનમબ્રવીત્ ॥ ૧૨॥

વિષ્ણુરુવાચ ।

ઇદં સત્યં વચશ્ચૈવ યત્ર ધર્મઃ સનાતનઃ ।
તત્ર દુઃખં ન જાયેત સૂર્યે દૃષ્ટે યથા તમઃ ॥ ૧૩॥

સનત્કુમાર ઉવાચ ।
ઇત્યેતદ્વચનં શ્રુત્વા દેવા દુઃખમુપાગતાઃ ।
પુનરૂચુસ્તથા વિષ્ણું પરિમ્લાનમુખામ્બુજાઃ ॥ ૧૪॥

દેવા ઊચુઃ ।
કથં ચૈવ પ્રકર્ત્તવ્યં કથં દુઃખં નિરસ્યતે ।
કથં ભવેમ સુખિનઃ કથં સ્થાસ્યામહે વયમ્ ॥ ૧૫॥

કથં ધર્મા ભવિષ્યન્તિ ત્રિપુરે જીવિતે સતિ ।
દેવદુઃખપ્રદા નૂનં સર્વે ત્રિપુરવાસિનઃ ॥ ૧૬॥

કિં વા તે ત્રિપુરસ્યેહ વધશ્ચૈવ વિધીયતામ્ ।
નો ચેદકાલિકી દેવસંહતિઃ ક્રિયતાં ધ્રુવમ્ ॥ ૧૭॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા તે તદા દેવા દુઃખં કૃત્વા પુનઃ પુનઃ ।
સ્થિતિં નૈવ ગતિં તે વૈ ચક્રુર્દેવવરાદિહ ॥ ૧૮॥

તાન્વૈ તથાવિધાન્દૃષ્ટ્વા હીનાન્વિનયસંયુતાન્ ।
સોઽપિ નારાયણઃ શ્રીમાંશ્ચિન્તયંશ્ચેતસા તથા ॥ ૧૯॥

કિં કાર્યં દેવકાર્યેષુ મયા દેવસહાયિના ।
શિવભક્તાસ્તુ તે દૈત્યાસ્તારકસ્ય સુતા ઇતિ ॥ ૨૦॥

ઇતિ સઞ્ચિન્ત્ય તત્કાલે વિષ્ણુના પ્રભવિષ્ણુના ।
તતો યજ્ઞાઃ સ્મૃતાસ્તેન દેવકાર્યાર્થમક્ષયાઃ ॥ ૨૧॥

તદ્વિષ્ણુસ્મૃતિમાત્રેણ યજ્ઞાસ્તે તત્ક્ષણં દ્રુતમ્ ।
આગતાસ્તત્ર યત્રાસ્તે શ્રીપતિઃ પુરુષોત્તમઃ ॥ ૨૨॥

તતો વિષ્ણું યજ્ઞપતિં પુરાણં પુરુષં હરિમ્ ।
પ્રણમ્ય તુષ્ટુવુસ્તે વૈ કૃતાઞ્જલિપુટાસ્તદા ॥ ૨૩॥

ભગવાનપિ તાન્દૃષ્ટ્વા યજ્ઞાન્પ્રાહ સનાતનાન્ ।
સનાતનસ્તદા સેન્દ્રાન્દેવાનાલોક્ય ચાચ્યુતઃ ॥ ૨૪॥

વિષ્ણુરુવાચ ।

અનેનૈવ સદા દેવા યજધ્વં પરમેશ્વરમ્ ।
પુરત્રયવિનાશાય જગત્ત્રયવિભૂતયે ॥ ૨૫॥

સનત્કુમાર ઉવાચ ।
અચ્યુતસ્ય વચઃ શ્રુત્વા દેવદેવસ્ય ધીમતઃ ।
પ્રેમ્ણા તે પ્રણતિં કૃત્વા યજ્ઞેશં તેઽસ્તુવન્સુરાઃ ॥ ૨૬॥

એવં સ્તુત્વા તતો દેવા અયજન્યજ્ઞપૂરુષમ્ ।
યજ્ઞોક્તેન વિધાનેન સમ્પૂર્ણવિધયો મુને ॥ ૨૭॥

તતસ્તસ્માદ્યજ્ઞકુણ્ડાત્સમુત્પેતુઃ સહસ્રશઃ ।
ભૂતસઙ્ઘા મહાકાયાઃ શૂલશક્તિગદાયુધાઃ ॥ ૨૮॥

દદૃશુસ્તે સુરાસ્તાન્ વૈ ભૂતસઙ્ઘાન્ સહસ્રશઃ ।
શૂલશક્તિગદાહસ્તાન્દણ્ડચાપશિલાયુધાન્ ॥ ૨૯॥

નાનાપ્રહરણોપેતાન્ નાનાવેષધરાઁસ્તથા ।
કાલાગ્નિરુદ્રસદૃશાન્કાલસૂર્યોપમાઁસ્તદા ॥ ૩૦॥

દૃષ્ટ્વા તાનબ્રવીદ્વિષ્ણુઃ પ્રણિપત્ય પુરઃસ્થિતાન્ ।
ભૂતાન્યજ્ઞપતિઃ શ્રીમાન્ રુદ્રાજ્ઞાપ્રતિપાલકઃ ॥ ૩૧॥

વિષ્ણુરુવાચ ।
ભૂતાઃ શૃણુત મદ્વાક્યં દેવકાર્યાર્થમુદ્યતાઃ ।
ગચ્છન્તુ ત્રિપુરં સદ્યઃ સર્વે હિ બલવત્તરાઃ ॥ ૩૨॥

ગત્વા દગ્ધ્વા ચ ભિત્ત્વા ચ ભઙ્ક્ત્વા દૈત્યપુરત્રયમ્ ।
પુનર્યથાગતા ભૂતાગન્તુમર્હથ ભૂતયે ॥ ૩૩॥

સનત્કુમાર ઉવાચ ।
તચ્છ્રુત્વા ભગવદ્વાક્યં તતો ભૂતગણાશ્ચ તે ।
પ્રણમ્ય દેવદેવં તં યયુર્દૈત્યપુરત્રયમ્ ॥ ૩૪॥

ગત્વા તત્પ્રવિશન્તશ્ચ ત્રિપુરાધિપતેજસિ ।
ભસ્મસાદભવન્સદ્યઃ શલભા ઇવ પાવકે ॥ ૩૫॥

અવશિષ્ટાશ્ચ યે કેચિત્પલાયનપરાયણાઃ ।
નિસ્સૃત્યારં સમાયાતા હરેર્નિકટમાકુલાઃ ॥ ૩૬॥

તાન્દૃષ્ટ્વા સ હરિઃ શ્રુત્વા તચ્ચ વૃત્તમશેષતઃ ।

ચિન્તયામાસ ભગવાન્મનસા પુરુષોત્તમઃ ॥ ૩૭॥

કિં કૃત્યમધુના કાર્યમિતિ સન્તપ્તમાનસઃ ।
સન્તપ્તાનમરાન્સર્વાનાજ્ઞાય ચ સવાસવાન્ ॥ ૩૮॥

કથં તેષાં ચ દૈત્યાનાં બલાદ્ધત્વા પુરત્રયમ્ ।
દેવકાર્યં કરિષ્યામીત્યાસીચ્ચિન્તાસમાકુલઃ ॥ ૩૯॥

નાશોઽભિચારતો નાસ્તિ ધર્મિષ્ઠાનાં ન સંશયઃ ।
ઇતિ પ્રાહ સ્વયં ચેશઃ શ્રુત્યાચારપ્રમાણકૃત્ ॥ ૪૦॥

દૈત્યાશ્ચ તે હિ ધર્મિષ્ઠાઃસર્વે ત્રિપુરવાસિનઃ ।
તસ્માદવધ્યતાં પ્રાપ્તા નાન્યથાસુરપુઙ્ગવાઃ ॥ ૪૧॥

કૃત્વા તુ સુમહત્પાપં રુદ્રમભ્યર્ચયન્તિ તે ।
મુચ્યન્તે પાતકૈઃ સર્વૈઃ પદ્મપત્રમિવામ્ભસા ॥ ૪૨॥

રુદ્રાભ્યર્ચનતો દેવાઃ સર્વે કામા ભવન્તિ હિ ।
નાનોપભોગસમ્પત્તિર્વશ્યતાં યાતિ વૈ ભુવિ ॥ ૪૩॥

તસ્માત્તદ્ભોગિનો દૈત્યા લિઙ્ગાર્ચનપરાયણાઃ ।
અનેકવિધસમ્પત્તેર્મોક્ષસ્યાપિ પરત્ર ચ ॥ ૪૪॥

તતઃ કૃત્વા ધર્મવિઘ્નં તેષામેવાત્મમાયયા ।
દૈત્યાનાં દેવકાર્યાર્થં હરિષ્યે ત્રિપુરં ક્ષણાત્ ॥ ૪૫॥

વિચાર્યેત્થં તતસ્તેષાં ભગવાન્પુરુષોત્તમઃ ।
કર્તું વ્યવસ્થિતઃ પશ્ચાદ્ધર્મવિઘ્નં સુરારિણામ્ ॥ ૪૬॥

યાવચ્ચ વેદધર્માસ્તુ યાવદ્વૈ શઙ્કરાર્ચનમ્ ।
યાવચ્ચ શુચિકૃત્યાનિ તાવન્નાશો ભવેન્ન હિ ॥ ૪૭॥

તસ્માદેવં પ્રકર્તવ્યં વેદધર્મસ્તતો વ્રજેત્ ।
ત્યક્તલિઙ્ગાર્ચના દૈત્યા ભવિષ્યન્તિ ન સંશયઃ ॥ ૪૮॥

ઇતિ નિશ્ચિત્ય વૈ વિષ્ણુર્વિઘ્નાર્થમકરોત્તદા ।
તેષાં ધર્મસ્ય દૈત્યાનામુપાયં શ્રુતિખણ્ડનમ્ ॥ ૪૯॥

તદૈવોવાચ દેવાન્સ વિષ્ણુર્દેવસહાયકૃત્ ।
શિવાજ્ઞયા શિવેનૈવાજ્ઞપ્તસ્ત્રૈલોક્યરક્ષણે ॥ ૫૦॥

વિષ્ણુરુવાચ ।
હે દેવાઃ સકલા યૂયં ગચ્છત સ્વગૃહાન્ધ્રુવમ્ ।
દેવકાર્યં કરિષ્યામિ યથામતિ ન સંશયઃ ॥ ૫૧॥

તાન્રુદ્રાદ્વિમુખાન્નૂનં કરિષ્યામિ સુયત્નતઃ ।
સ્વભક્તિરહિતાન્ જ્ઞાત્વા તાન્કરિષ્યામિ ભસ્મસાત્ ॥ ૫૨॥

સનત્કુમાર ઉવાચ ।
તદાજ્ઞાં શિરસાધાયશ્વાસિતાસ્તેઽમરા મુને ।
સ્વસ્વધામાનિ વિશ્વસ્તા યયુઃ પરમમોદિતાઃ ॥ ૫૩॥

તતશ્ચૈવાકરોદ્વિષ્ણુર્દેવાર્થં હિતમુત્તમમ્ ।
તદેવ શ્રૂયતાં સમ્યક્સર્વપાપપ્રણાશનમ્ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે ત્રિપુરવધોપાખ્યાને ભૂતત્રિપુરધર્મવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૨.૫.૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૪. ચતુર્થોઽધ્યાયઃ । સનત્કુમારપારાશર્ય સંવાદે ત્રિપુરદીક્ષાવિધાનમ્ ।

સનત્કુમાર ઉવાચ ।
અસૃજચ્ચ મહાતેજાઃ પુરુષં સ્વાત્મસમ્ભવમ્ ।
એકં માયામયં તેષાં ધર્મવિઘ્નાર્થમચ્યુતઃ ॥ ૧॥

મુણ્ડિનં મ્લાનવસ્ત્રં ચ ગુમ્ફિપાત્રસમન્વિતમ્ ।
દધાનં પુઞ્જિકાં હસ્તે ચાલયન્તં પદે પદે ॥ ૨॥

વસ્ત્રયુક્તં તથા હસ્તં ક્ષીયમાણં મુખે સદા ।
ધર્મેતિ વ્યાહરન્તં હિ વાચા વિક્લવયા મુનિમ્ ॥ ૩॥

સ નમસ્કૃત્ય વિષ્ણું તં તત્પુરઃ સંસ્થિતોઽથ વૈ ।
ઉવાચ વચનં તત્ર હરિં સ પ્રાઞ્જલિસ્તદા ॥ ૪॥

અરિહન્નચ્યુતં પૂજ્યં કિં કરોમિ તદાદિશ ।

કાનિ નામાનિ મે દેવ સ્થાનં વાપિ વદ પ્રભો ॥ ૫॥

ઇત્યેવં ભગવાન્વિષ્ણુઃ શ્રુત્વા તસ્ય શુભં વચઃ ।
પ્રસન્નમાનસો ભૂત્વા વચનં ચેદમબ્રવીત્ ॥ ૬॥

વિષ્ણુરુવાચ ।
યદર્થં નિર્મિતોઽસિ ત્વં નિબોધ કથયામિ તે ।
મદઙ્ગજ મહાપ્રાજ્ઞ મદ્રૂપસ્ત્વં ન સંશયઃ ॥ ૭॥

મમાઙ્ગાચ્ચ સમુત્પન્નો મત્કાર્યં કર્તુમર્હસિ ।
મદીયસ્ત્વં સદા પૂજ્યો ભવિષ્યતિ ન સંશયઃ ॥ ૮॥

અરિહન્નામ તે સ્યાત્તુ હ્યન્યાનિ ન શુભાનિ ચ ।
સ્થાનં વક્ષ્યામિ તે પશ્ચાચ્છૃણુ પ્રસ્તુતમાદરાત્ ॥ ૯॥

માયિન્માયામયં શાસ્ત્રં તત્ષોડશસહસ્રકમ્ ।
શ્રૌતસ્માર્તવિરુદ્ધં ચ વર્ણાશ્રમવિવર્જિતમ્ ॥ ૧૦॥

અપભ્રંશમયં શાસ્ત્રં કર્મવાદમયં તથા ।
રચયેતિ પ્રયત્નેન તદ્વિસ્તારો ભવિષ્યતિ ॥ ૧૧॥

દદામિ તવ નિર્માણે સામર્થ્યં તદ્ભવિષ્યતિ ।
માયા ચ વિવિધા શીઘ્રં ત્વદધીના ભવિષ્યતિ ॥ ૧૨॥

તચ્છ્રુત્વા વચનં તસ્ય હરેશ્ચ પરમાત્મનઃ ।
નમસ્કૃત્ય પ્રત્યુવાચ સ માયી તં જનાર્દનમ્ ॥ ૧૩॥

મુણ્ડ્યુવાચ ।
યત્કર્તવ્યં મયા દેવ દ્રુતમાદિશ તત્પ્રભો ।
ત્વદાજ્ઞયાખિલં કર્મ સફલં ચ ભવિષ્યતિ ॥ ૧૪॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા પાઠયામાસ શાસ્ત્રં માયામયં તથા ।
ઇહૈવ સ્વર્ગનરકપ્રત્યયો નાન્યથા પુનઃ ॥ ૧૫॥

તમુવાચ પુનર્વિષ્ણુઃ સ્મૃત્વા શિવપદામ્બુજમ્ ।
મોહનીયા ઇમે દૈત્યાઃ સર્વે ત્રિપુરવાસિનઃ ॥ ૧૬॥

કાર્યાસ્તે દીક્ષિતા નૂનં પાઠનીયાઃ પ્રયત્નતઃ ।
મદાજ્ઞયા ન દોષસ્તે ભવિષ્યતિ મહામતે ॥ ૧૭॥

ધર્માસ્તત્ર પ્રકાશન્તે શ્રૌતસ્માર્ત્તા ન સંશયઃ ।
અનયા વિદ્યયા સર્વે સ્ફોટનીયા ધ્રુવં યતે ॥ ૧૮॥

ગન્તુમર્હસિ નાશાર્થં મુણ્ડિંસ્ત્રિપુરવાસિનામ્ ।
તમોધર્મં સમ્પ્રકાશ્ય નાશયસ્વ પુરત્રયમ્ ॥ ૧૯॥

તતશ્ચૈવ પુનર્ગત્વા મરુસ્થલ્યાં ત્વયા વિભો ।
સ્થાતવ્યં ચ સ્વધર્મેણ કલિર્યાવત્સમાવ્રજેત્ ॥ ૨૦॥

પ્રવૃત્તે તુ યુગે તસ્મિન્સ્વીયો ધર્મઃ પ્રકાશ્યતામ્ ।
શિષ્યૈશ્ચ પ્રતિશિષ્યૈશ્ચ વર્તનીયસ્ત્વયા પુનઃ ॥ ૨૧॥

મદાજ્ઞયા ભવદ્ધર્મો વિસ્તારં યાસ્યતિ ધ્રુવમ્ ।
મદનુજ્ઞાપરો નિત્યં ગતિં પ્રાપ્સ્યસિ મામકીમ્ ॥ ૨૨॥

એવમાજ્ઞા તદા દત્તા વિષ્ણુના પ્રભવિષ્ણુના ।
શાસનાદ્દેવદેવસ્ય હૃદા ત્વન્તર્દધે હરિઃ ॥ ૨૩॥

તતસ્સમુણ્ડી પરિપાલયન્હરે-
રાજ્ઞાં તથા નિર્મિતવાંશ્ચ શિષ્યાન્ ।
યથાસ્વરૂપં ચતુરસ્તદાનીં
માયામયં શાસ્ત્રમપાઠયત્સ્વયમ્ ॥ ૨૪॥

યથા સ્વયં તથા તે ચ ચત્વારો મુણ્ડિનઃ શુભાઃ ।
નમસ્કૃત્ય સ્થિતાસ્તત્ર હરયે પરમાત્મને ॥ ૨૫॥

હરિશ્ચાપિ મુનેસ્તત્ર ચતુરસ્તાંસ્તદા સ્વયમ્ ।
ઉવાચ પરમપ્રીતઃ શિવાજ્ઞાપરિપાલકઃ ॥ ૨૬॥

યથા ગુરુસ્તથા યૂયં ભવિષ્યથ મદાજ્ઞયા ।
ધન્યાઃ સ્થ સદ્ગતિમિહ સમ્પ્રાપ્સ્યથ ન સંશયઃ ॥ ૨૭॥

ચત્વારો મુણ્ડિનસ્તેઽથ ધર્મં પાષણ્ડમાશ્રિતાઃ ।
હસ્તે પાત્રં દધાનાશ્ચ તુણ્ડવસ્ત્રસ્ય ધારકાઃ ॥ ૨૮॥

મલિનાન્યેવ વાસાંસિ ધારયન્તો હ્યભાષિણઃ ।
ધર્મો લાભઃ પરં તત્ત્વં વદન્તસ્ત્વતિહર્ષતઃ ॥ ૨૯॥

માર્જનીં ધ્રિયમાણાશ્ચ વસ્ત્રખણ્ડવિનિર્મિતામ્ ।
શનૈઃ શનૈશ્ચલન્તો હિ જીવહિંસાભયાદ્ધ્રુવમ્ ॥ ૩૦॥

તે સર્વે ચ તદા દેવં ભગવન્તં મુદાન્વિતાઃ ।
નમસ્કૃત્ય પુનસ્તત્ર મુને તસ્થુસ્તદગ્રતઃ ॥ ૩૧॥

હરિણા ચ તદા હસ્તે ધૃત્વા ચ ગુરવેઽર્પિતાઃ ।
અભ્યધાયિ ચ સુપ્રીત્યા તન્નામાનિ વિશેષતઃ ॥ ૩૨॥

યથા ત્વં ચ તથૈવૈતે મદીયા વૈ ન સંશયઃ ।
આદિરૂપં ચ તન્નામ પૂજ્યત્વાત્પૂજ્ય ઉચ્યતે ॥ ૩૩॥

ઋષિર્યતિસ્તથાકીર્ય ઉપાધ્યાય ઇતિ સ્વયમ્ ।
ઇમાન્યપિ તુ નામાનિ પ્રસિદ્ધાનિ ભવન્તુ વઃ ॥ ૩૪॥

મમાપિ ચ ભવદ્ભિશ્ચ નામ ગ્રાહ્યં શુભં પુનઃ ।
અરિહન્નિતિ તન્નામ ધ્યેયં પાપપ્રણાશનમ્ ॥ ૩૫॥

ભવદ્ભિશ્ચૈવ કર્તવ્યં કાર્યં લોકસુખાવહમ્ ।
લોકાનુકૂલં ચરતાં ભવિષ્યત્યુત્તમા ગતિઃ ॥ ૩૬॥

સનત્કુમાર ઉવાચ ।
તતઃ પ્રણમ્ય તં માયી શિષ્યયુક્તઃસ્વયં તદા ।
જગામ ત્રિપુરં સદ્યઃ શિવેચ્છાકારિણં મુમા ॥ ૩૭॥

પ્રવિશ્ય તત્પુરં તૂર્ણં વિષ્ણુના નોદિતો વશી ।
મહામાયાવિના તેન ઋષિર્માયાં તદાકરોત્ ॥ ૩૮॥

નગરોપવને કૃત્વા શિષ્યૈર્યુક્તઃ સ્થિતિં તદા ।
માયાં પ્રવર્તયામાસ માયિનામપિ મોહિનીમ્ ॥ ૩૯॥

શિવાર્ચનપ્રભાવેણ તન્માયા સહસા મુને ।
ત્રિપુરે ન ચચાલાશુ નિર્વિણ્ણોઽભૂત્તદા યતિઃ ॥ ૪૦॥

અથ વિષ્ણું સ સસ્માર તુષ્ટાવ ચ હૃદા બહુ ।
નષ્ટોત્સાહો વિચેતસ્કો હૃદયેન વિદૂયતા ॥ ૪૧॥

તત્સ્મૃતસ્ત્વરિતં વિષ્ણુઃસસ્માર શઙ્કરં હૃદિ ।
પ્રાપ્યાજ્ઞાં મનસા તસ્ય સ્મૃતવાન્નારદં દ્રુતમ્ ॥ ૪૨॥

સ્મૃતમાત્રેણ વિષ્ણોશ્ચ નારદઃ સમુપસ્થિતઃ ।
નત્વા સ્તુત્વા પુરસ્તસ્ય સ્થિતોઽભૂત્સાઞ્જલિસ્તદા ॥ ૪૩॥

અથ તં નારદં પ્રાહ વિષ્ણુર્મતિમતાં વરઃ ।

લોકોપકારનિરતો દેવકાર્યકરઃ સદા ॥ ૪૪॥

શિવાજ્ઞયોચ્યતે તાત ગચ્છ ત્વં ત્રિપુરં દ્રુતમ્ ।
ઋષિસ્તત્ર ગતઃ શિષ્યૈર્મોહાર્થં તત્સુવાસિનામ્ ॥ ૪૫॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય નારદો મુનિસત્તમઃ ।
ગતસ્તત્ર દ્રુતં યત્ર સ ઋષિર્માયિનાં વરઃ ॥ ૪૬॥

નારદોઽપિ તથા માયી નિયોગાન્માયિનઃ પ્રભોઃ ।
પ્રવિશ્ય તત્પુરં તેન માયિના સહ દીક્ષિતઃ ॥ ૪૭॥

તતશ્ચ નારદો ગત્વા ત્રિપુરાધીશસન્નિધૌ ।
ક્ષેમપ્રશ્નાદિકં કૃત્વા રાજ્ઞે સર્વં ન્યવેદયત્ ॥ ૪૮॥

નારદ ઉવાચ ।
કશ્ચિત્સમાગતશ્ચાત્ર યતિર્ધર્મપરાયણઃ ।
સર્વવિદ્યાપ્રકૃષ્ટો હિ વેદવિદ્યાપરાન્વિતઃ ॥ ૪૯॥

દૃષ્ટ્વા ચ બહવો ધર્મા નૈતેન સદૃશાઃ પુનઃ ।
વયં સુદીક્ષિતાશ્ચાત્ર દૃષ્ટ્વા ધર્મં સનાતનમ્ ॥ ૫૦॥

તવેચ્છા યદિ વર્તેત તદ્ધર્મે દૈત્યસત્તમ ।
તદ્ધર્મસ્ય મહારાજ ગ્રાહ્યા દીક્ષા ત્વયા પુનઃ ॥ ૫૧॥

સનત્કુમાર ઉવાચ ।
તદીયં સ વચઃ શ્રુત્વા મહદર્થસુગર્ભિતમ્ ।
વિસ્મિતો હૃદિ દૈત્યેશો જગૌ તત્ર વિમોહિતઃ ॥ ૫૨॥

નારદો દીક્ષિતો યસ્માદ્વયં દીક્ષામવાપ્નુમઃ ।
ઇત્યેવં ચ વિદિત્વા વૈ જગામ સ્વયમેવ હ ॥ ૫૩॥

તદ્રૂપં ચ તદા દૃષ્ટ્વા મોહિતો માયયા તથા ।
ઉવાચ વચનં તસ્મૈ નમસ્કૃત્ય મહાત્મને ॥ ૫૪॥

ત્રિપુરાધિપ ઉવાચ ।
દીક્ષા દેયા ત્વયા મહ્યં નિર્મલાશય ભો ઋષે ।
અહં શિષ્યો ભવિષ્યામિ સત્યં સત્યં ન સંશયઃ ॥ ૫૫॥

ઇત્યેવં તુ વચઃ શ્રુત્વા દૈત્યરાજસ્ય નિર્મલમ્ ।

પ્રત્યુવાચ સુયત્નેન ઋષિઃ સ ચ સનાતનઃ ॥ ૫૬॥

મદીયા કરણીયા સ્યાદ્યદ્યાજ્ઞા દૈત્યસત્તમ ।
તદા દેયા મયા દીક્ષા નાન્યથા કોટિયત્નતઃ ॥ ૫૭॥

ઇત્યેવં તુ વચઃ શ્રુત્વા રાજા માયામયોઽભવત્ ।
ઉવાચ વચનં શીઘ્રં યતિં તં હિ કૃતાઞ્જલિઃ ॥ ૫૮॥

દૈત્ય ઉવાચ ।
યથાજ્ઞાં દાસ્યસિ ત્વં ચ તત્તથૈવ ન ચાન્યથા ।
ત્વદાજ્ઞાં નોલ્લઙ્ઘયિષ્યે સત્યં સત્યં ન સંશયઃ ॥ ૫૯॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય ત્રિપુરાધીશિતુસ્તદા ।
દૂરીકૃત્ય મુખાદ્વસ્ત્રમુવાચ ઋષિસત્તમઃ ॥ ૬૦॥

દીક્ષાં ગૃહ્ણીષ્વ દૈત્યેન્દ્ર સર્વધર્મોત્તમોત્તમામ્ ।
યેન દીક્ષાવિધાનેન પ્રાપ્સ્યસિ ત્વં કૃતાર્થતામ્ ॥ ૬૧॥

ઇત્યુક્ત્વા સ તુ માયાવી દૈત્યરાજાય સત્વરમ્ ।
દદૌ દીક્ષાં સ્વધર્મોક્તાં તસ્મૈ વિધિવિધાનતઃ ॥ ૬૨॥

દૈત્યરાજે દીક્ષિતે ચ તસ્મિન્સસહજે મુને ।
સર્વે ચ દીક્ષિતા જાતાસ્તત્ર ત્રિપુરવાસિનઃ ॥ ૬૩॥

મુનેઃ શિષ્યૈઃ પ્રશિષ્યૈશ્ચ વ્યાપ્તમાસીદ્ દ્રુતં તદા ।
મહામાયાવિનસ્તત્તુ ત્રિપુરં સકલં મુને ॥ ૬૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે સનત્કુમારપારાશર્યસંવાદે ત્રિપુરદીક્ષાવિધાનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૨.૫.૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૫. પઞ્ચમોઽધ્યાયઃ । ત્રિપુરમોહનમ્ ।

વ્યાસ ઉવાચ ।

દૈત્યરાજે દીક્ષિતે ચ માયિના તેન મોહિતે ।
કિમુવાચ તદા માયી કિં ચકાર સ દૈત્યપઃ ॥ ૧॥

સનત્કુમાર ઉવાચ ।
દીક્ષાં દત્ત્વા યતિસ્તસ્મા અરિહન્નારદાદિભિઃ ।
શિષ્યૈઃ સેવિતપાદાબ્જો દૈત્યરાજાનમબ્રવીત્ ॥ ૨॥

અરિહન્નુવાચ ।
શ્ૃણુ દૈત્યપતે વાક્યં મમ સંજ્ઞાનગર્ભિતમ્ ।
વેદાન્તસારસર્વસ્વં રહસ્યં પરમોત્તમમ્ ॥ ૩॥

અનાદિસિદ્ધઃ સંસારઃ કર્તૃકર્મવિવર્જિતઃ ।
સ્વયં પ્રાદુર્ભવત્યેવ સ્વયમેવ વિલીયતે ॥ ૪॥

બ્રહ્માદિસ્તમ્બપર્યન્તં યાવદ્દેહનિબન્ધનમ્ ।
આત્મૈવૈકેશ્વરસ્તત્ર ન દ્વિતીયસ્તદીશિતા ॥ ૫॥

યદ્ બ્રહ્મવિષ્ણુરુદ્રાખ્યાસ્તદાખ્યા દેહિનામિમાઃ ।
આખ્યા યથાસ્મદાદીનામરિહન્નાદિરુચ્યતે ॥ ૬॥

દેહો યથાસ્મદાદીનાં સ્વકાલેન વિલીયતે ।
બ્રહ્માદિમશકાન્તાનાં સ્વકાલાલ્લીયતે તથા ॥ ૭॥

વિચાર્યમાણે દેહેઽસ્મિન્ન કિઞ્ચિદધિકં ક્વચિત્ ।
આહારો મૈથુનં નિદ્રા ભયં સર્વત્ર યત્સમમ્ ॥ ૮॥

નિરાહારપરીમાણં પ્રાપ્ય સર્વો હિ દેહભૃત્ ।
સદૃશીમેવ સન્તૃપ્તિં પ્રાપ્નુયાન્નાધિકેતરામ્ ॥ ૯॥

યથા વિતૃષિતાઃ સ્યામ પીત્વા પેયં મુદા વયમ્ ।
તૃષિતાસ્તુ તથાન્યેઽપિ ન વિશેષોઽલ્પકોઽધિકઃ ॥ ૧૦॥

સન્તુ નાર્યઃ સહસ્રાણિ રૂપલાવણ્યભૂમયઃ ।
પરં નિધુવને કાલે હ્યેકૈવેહોપયુજ્યતે ॥ ૧૧॥

અશ્વાઃ પરાઃ શતાઃસન્તુ સન્ત્વનેકેઽપ્યનેકધા ।
અધિરોહે તથાપ્યેકો ન દ્વિતીયસ્તથાત્મનઃ ॥ ૧૨॥

પર્યઙ્કશાયિનાં સ્વાપે સુખં યદુપજાયતે ।
તદેવ સૌખ્યં નિદ્રાભિર્ભૂતભૂશાયિનામપિ ॥ ૧૩॥

યથૈવ મરણાદ્ભીતિરસ્મદાદિવપુષ્મતામ્ ।
બ્રહ્માદિકીટકાન્તાનાં તથા મરણતો ભયમ્ ॥ ૧૪॥

સર્વે તનુભૃતસ્તુલ્યા યદિ બુદ્ધ્યા વિચાર્ય્યતે ।
ઇદં નિશ્ચિત્ય કેનાપિ નો હિંસ્યઃ કોઽપિ કુત્રચિત્ ॥ ૧૫॥

ધર્મો જીવદયાતુલ્યો ન ક્વાપિ જગતીતલે ।
તસ્માત્સર્વપ્રયત્નેન કાર્યા જીવદયા નૃભિઃ ॥ ૧૬॥

એકસ્મિન્ રક્ષિતે જીવે ત્રૈલોક્યં રક્ષિતં ભવેત્ ।
ઘાતિતે ઘાતિતં તદ્વત્તસ્માદ્રક્ષેન્ન ઘાતયેત્ ॥ ૧૭॥

અહિંસા પરમો ધર્મઃ પાપમાત્મપ્રપીડનમ્ ।
અપરાધીનતા મુક્તિઃ સ્વર્ગોઽભિલષિતાશનમ્ ॥ ૧૮॥

પૂર્વસૂરિભિરિત્યુક્તં સત્પ્રમાણતયા ધ્રુવમ્ ।
તસ્માન્ન હિંસા કર્ત્તવ્યા નરૈર્નરકભીરુભિઃ ॥ ૧૯॥

ન હિંસાસદૃશં પાપં ત્રૈલોક્યે સચરાચરે ।
હિંસકો નરકં ગચ્છેત્સ્વર્ગં ગચ્છેદહિંસકઃ ॥ ૨૦॥

સન્તિ દાનાન્યનેકાનિ કિં તૈસ્તુચ્છફલપ્રદૈઃ ।
અભીતિસદૃશં દાનં પરમેકમપીહ ન ॥ ૨૧॥

ઇહ ચત્વારિ દાનાનિ પ્રોક્તાનિ પરમર્ષિભિઃ ।
વિચાર્ય નાનાશાસ્ત્રાણિ શર્મણેઽત્ર પરત્ર ચ ॥ ૨૨॥

ભીતેભ્યશ્ચાભયં દેયં વ્યાધિતેભ્યસ્તથૌષધમ્ ।
દેયા વિદ્યાર્થિનાં વિદ્યા દેયમન્નં ક્ષુધાતુરે ॥ ૨૩॥

યાનિ યાનીહ દાનાનિ બહુ મુન્યુદિતાનિ ચ ।
જીવાભયપ્રદાનસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૨૪॥

અવિચિન્ત્યપ્રભાવં હિ મણિમન્ત્રૌષધં બલમ્ ।
તદભ્યસ્યં પ્રયત્નેન નામાર્થોપાર્જનાય વૈ ॥ ૨૯॥

અર્થાનુપાર્જ્ય બહુશો દ્વાદશાયતનાનિ વૈ ।
પરિતઃ પરિપૂજ્યાનિ કિમન્યૈરિહ પૂજિતૈઃ ॥ ૨૬॥

પઞ્ચકર્મેન્દ્રિયગ્રામાઃ પઞ્ચ બુદ્ધીન્દ્રિયાણિ ચ ।
મનો બુદ્ધિરિહ પ્રોક્તં દ્વાદશાયતનં શુભમ્ ॥ ૨૭॥

ઇહૈવ સ્વર્ગનરકૌ પ્રાણિનાં નાન્યતઃ ક્વચિત્ ।
સુખં સ્વર્ગઃ સમાખ્યાતો દુઃખં નરકમેવ હિ ॥ ૨૮॥

સુખેષુ ભુજ્યમાનેષુ યત્સ્યાદ્દેહવિસર્જ્જનમ્ ।
અયમેવ પરો મોક્ષો વિજ્ઞેયસ્તત્ત્વચિન્તકૈઃ ॥ ૨૯॥

વાસનાસહિતે ક્લેશસમુચ્છેદે સતિ ધ્રુવમ્ ।
અજ્ઞાનોપરમો મોક્ષો વિજ્ઞેયસ્તત્ત્વચિન્તકૈઃ ॥ ૩૦॥

પ્રામાણિકી શ્રુતિરિયં પ્રોચ્યતે વેદવાદિભિઃ ।
ન હિંસ્યાત્સર્વભૂતાનિ નાન્યા હિંસાપ્રવર્તિકા ॥ ૩૧॥

અગ્નિષ્ટોમીયમિતિ યા ભ્રામિકા સાઽસતામિહ ।
ન સા પ્રમાણં જ્ઞાતૄણાં પશ્વાલમ્ભનકારિકા ॥ ૩૨॥

વૃક્ષાંશ્છિત્વા પશૂન્ હત્વા કૃત્વા રુધિરકર્દ્દમમ્ ।
દગ્ધ્વા વહ્નૌ તિલાજ્યાદિ ચિત્રં સ્વર્ગોઽભિલષ્યતે ॥ ૩૩॥

ઇત્યેવં સ્વમતં પ્રોચ્ય યતિસ્ત્રિપુરનાયકમ્ ।
શ્રાવયિત્વાખિલાન્ પૌરાનુવાચ પુનરાદરાત્ ॥ ૩૪॥

દૃષ્ટાર્થપ્રત્યયકરાન્દેહસૌખ્યૈકસાધકાન્ ।
બૌદ્ધાગમવિનિર્દિષ્ટાન્ધર્માન્વેદપરાંસ્તતઃ ॥ ૩૫॥

આનન્દં બ્રહ્મણો રૂપં શ્રુત્યૈવં યન્નિગદ્યતે ।
તત્તથૈવેહ મન્તવ્યં મિથ્યા નાનાત્વકલ્પના ॥ ૩૬॥

યાવત્સ્વસ્થમિદં વર્ષ્મ યાવન્નેન્દ્રિયવિક્લવઃ ।
યાવજ્જરા ચ દૂરેઽસ્તિ તાવત્સૌખ્યં પ્રસાધયેત્ ॥ ૩૭॥

અસ્વાસ્થ્યેન્દ્રિયવૈકલ્યે વાર્દ્ધકે તુ કુતઃ સુખમ્ ।
શરીરમપિ દાતવ્યમર્થિભ્યોઽતઃ સુખેપ્સુભિઃ ॥ ૩૮॥

યાચમાનમનોવૃત્તિપ્રીણને યસ્ય નો જનિઃ ।
તેન ભૂર્ભારવત્યેષા સમુદ્રાગદ્રુમૈર્ન હિ ॥ ૩૯॥

સત્વરં ગત્વરો દેહઃ સઞ્ચયાઃ સપરિક્ષયાઃ ।
ઇતિ વિજ્ઞાય વિજ્ઞાતા દેહસૌખ્યં પ્રસાધયેત્ ॥ ૪૦॥

શ્વવાયસકૃમીણાં ચ પ્રાતર્ભોજ્યમિદં વપુઃ ।

ભસ્માન્તં તચ્છરીરં ચ વેદે સત્યં પ્રપઠ્યતે ॥ ૪૧॥

મુધા જાતિવિકલ્પોઽયં લોકેષુ પરિકલ્પ્યતે ।
માનુષ્યે સતિ સામાન્યે કોઽધમઃ કોઽથ ચોત્તમઃ ॥ ૪૨॥

બ્રહ્માદિસૃષ્ટિરેષેતિ પ્રોચ્યતે વૃદ્ધપૂરુષૈઃ ।
તસ્ય જાતૌ સુતૌ દક્ષમરીચી ચેતિ વિશ્રુતૌ ॥ ૪૩॥

મારીચેન કશ્યપેન દક્ષકન્યાઃ સુલોચનાઃ ।
ધર્મેણ કિલ માર્ગેણ પરિણીતાસ્ત્રયોદશ ॥ ૪૪॥

અપીદાનીન્તનૈર્મર્ત્યૈરલ્પબુદ્ધિપરાક્રમૈઃ ।
અપિ ગમ્યસ્ત્વગમ્યોઽયં વિચારઃ ક્રિયતે મુધા ॥ ૪૫॥

મુખબાહૂરુસઞ્જાતં ચાતુર્વર્ણ્યં સહોદિતમ્ ।
કલ્પનેયં કૃતા પૂર્વૈર્ન ઘટેત વિચારતઃ ॥ ૪૬॥

એકસ્યાં ચ તનૌ જાતા એકસ્માદ્યદિ વા ક્વચિત્ ।
ચત્વારસ્તનયાસ્તત્કિં ભિન્નવર્ણત્વમાપ્નુયુઃ ॥ ૪૭॥

વર્ણાવર્ણવિભાગોઽયં તસ્માન્ન પ્રતિભાસતે ।
અતો ભેદો ન મન્તવ્યો માનુષ્યે કેનચિત્ક્વચિત્ ॥ ૪૮॥

સનત્કુમાર ઉવાચ ।
ઇત્થમાભાષ્ય દૈત્યેશં પૌરાંશ્ચ સ યતિર્મુને ।
સશિષ્યો વેદધર્માંશ્ચ નાશયામાસ ચાદરાત્ ॥ ૪૯॥

સ્ત્રીધર્મં ખણ્ડયામાસ પાતિવ્રત્યપરં મહત્ ।
જિતેન્દ્રિયત્વં સર્વેષાં પુરુષાણાં તથૈવ સઃ ॥ ૫૦॥

દેવધર્માન્વિશેષેણ શ્રાદ્ધધર્માંસ્તથૈવ ચ ।
મખધર્માન્ વ્રતાદીંશ્ચ તીર્થશ્રાદ્ધં વિશેષતઃ ॥ ૫૧॥

શિવપૂજાં વિશેષેણ લિઙ્ગારાધનપૂર્વિકામ્ ।
વિષ્ણુસૂર્યગણેશાદિપૂજનં વિધિપૂર્વકમ્ ॥ ૫૨॥

સ્નાનદાનાદિકં સર્વં પર્વકાલે વિશેષતઃ ।
ખણ્ડયામાસ સ યતિર્માયી માયાવિનાં વરઃ ॥ ૫૩॥

કિં બહૂક્તેન વિપ્રેન્દ્ર ત્રિપુરે તેન માયિના ।
વેદધર્માશ્ચ યે કેચિત્તે સર્વે દૂરતઃ કૃતાઃ ॥ ૫૪॥

યતિધર્માશ્રયાઃ સર્વા મોહિતાસ્ત્રિપુરાઙ્ગનાઃ ।
ભર્તૃશુશ્રૂષણવતીં વિજહુર્મતિમુત્તમામ્ ॥ ૫૫॥

અભ્યસ્યાકર્ષણીં વિદ્યાં વશીકૃત્યમયીમપિ ।
પુરુષાઃ સફલીચક્રુઃ પરદારેષુ મોહિતાઃ ॥ ૫૬॥

અન્તઃ પુરચરા નાર્યસ્તથા રાજકુમારકાઃ ।
પૌરાઃ પુરાઙ્ગનાશ્ચાપિ સર્વે તૈશ્ચ વિમોહિતાઃ ॥ ૫૭॥

એવં પૌરેષુ સર્વેષુ નિજધર્મેષુ સર્વથા ।
પરાઙ્મુખેષુ જાતેષુ પ્રોલ્લલાસ વૃષેતરઃ ॥ ૫૮॥

માયા ચ દેવદેવસ્ય વિષ્ણોસ્તસ્યાજ્ઞયા પ્રભો ।
અલક્ષ્મીશ્ચ સ્વયં તસ્ય નિયોગાત્ત્રિપુરં ગતા ॥ ૫૯॥

યા લક્ષ્મીસ્તપસા તેષાં લબ્ધા દેવેશ્વરાદ્વરાત્ ।
બહિર્ગતા પરિત્યજ્ય નિયોગાદ્બ્રહ્મણઃ પ્રભોઃ ॥ ૬૦॥

બુદ્ધિમોહં તથાભૂતં વિષ્ણોર્માયાવિનિર્મિતમ્ ।
તેષાં દત્ત્વા ક્ષણાદેવ કૃતાર્થોઽભૂત્સ નારદઃ ॥ ૬૧॥

નારદોઽપિ તથારૂપો યથા માયી તથૈવ સઃ ।
તથાપિ વિકૃતો નાભૂત્પારમેશાદનુગ્રહાત્ ॥ ૬૨॥

આસીત્કુણ્ઠિતસામર્થ્યો દૈત્યરાજોઽપિ ભો મુને ।
ભ્રાતૃભ્યાં સહિતસ્તત્ર મયેન ચ શિવેચ્છયા ॥ ૬૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે ત્રિપુરમોહનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૨.૫.૫॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૬. ષષ્ઠોઽધ્યાયઃ । શિવસ્તુતિવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તસ્મિન્ દૈત્યાધિપે પૌરે સભ્રાતરિ વિમોહિતે ।

સનત્કુમાર કિં ચાસીત્તદાચક્ષ્વાખિલં વિભો ॥ ૧॥

સનત્કુમાર ઉવાચ ।
ત્રિપુરે ચ તથાભૂતે દૈત્યે ત્યક્તશિવાર્ચને ।
સ્ત્રીધર્મે નિખિલે નષ્ટે દુરાચારે વ્યવસ્થિતે ॥ ૨॥

કૃતાર્થ ઇવ લક્ષ્મીશો દેવૈઃ સાર્દ્ધમુમાપતિમ્ ।
નિવેદિતું તચ્ચરિત્રં કૈલાસમગમદ્ધરિઃ ॥ ૩॥

તસ્યોપકણ્ઠં સ્થિત્વાઽસૌ દેવૈઃસહ રમાપતિઃ ।
તતો ભૂરિ સ ચ બ્રહ્મા પરમેણ સમાધિના ॥ ૪॥

મનસા પ્રાપ્ય સર્વજ્ઞં બ્રહ્મણા સ હરિસ્તદા ।
તુષ્ટાવ વાગ્ભિરિષ્ટાભિઃ શઙ્કરં પુરુષોત્તમઃ ॥ ૫॥

વિષ્ણુરુવાચ ।
મહેશ્વરાય દેવાય નમસ્તે પરમાત્મને ।
નારાયણાય રુદ્રાય બ્રહ્મણે બ્રહ્મરૂપિણે ॥ ૬॥

એવં કૃત્વા મહાદેવં દણ્ડવત્પ્રણિપત્ય હ ।
જજાપ રુદ્રમન્ત્રં ચ દક્ષિણામૂર્તિસમ્ભવમ્ ॥ ૭॥

જલે સ્થિત્વા સાર્દ્ધકોટિપ્રમિતં તન્મનાઃ પ્રભુઃ ।
સંસ્મરન્ મનસા શમ્ભું સ્વપ્રભું પરમેશ્વરમ્ ॥ ૮॥

તાવદ્દેવાસ્તદા સર્વે તન્મનસ્કા મહેશ્વરમ્ ॥ ૯॥

દેવા ઊચુઃ ।
નમઃસર્વાત્મને તુભ્યં શઙ્કરાયાર્તિહારિણે ।
રુદ્રાય નીલકણ્ઠાય ચિદ્રૂપાય પ્રચેતસે ॥ ૧૦॥

ગતિર્નઃ સર્વદા ત્વં હિ સર્વાપદ્વિનિવારકઃ ।
ત્વમેવ સર્વદાત્માભિર્વન્દ્યો દેવારિસૂદન ॥ ૧૧॥

ત્વમાદિસ્ત્વમનાદિશ્ચ સ્વાનન્દશ્ચાક્ષયઃ પ્રભુઃ ।
પ્રકૃતેઃ પુરુષસ્યાપિ સાક્ષાત્સ્રષ્ટા જગત્પ્રભુઃ ॥ ૧૨॥

ત્વમેવ જગતાં કર્તા ભર્તા હર્તા ત્વમેવ હિ ।
બ્રહ્મા વિષ્ણુર્હરો ભૂત્વા રજઃસત્ત્વતમોગુણૈઃ ॥ ૧૩॥

તારકોઽસિ જગત્યસ્મિન્ સર્વેષામધિપોઽવ્યયઃ ।

વરદો વાઙ્મયો વાચ્યો વાચ્યવાચકવર્જિતઃ ॥ ૧૪॥

યાચ્યો મુક્ત્યર્થમીશાનો યોગિભિર્યોગવિત્તમૈઃ ।
હૃત્પુણ્ડરીકવિવરે યોગિનાં ત્વં હિ સંસ્થિતઃ ॥ ૧૫॥

વદન્તિ વેદાસ્ત્વાં સન્તઃ પરબ્રહ્મસ્વરૂપિણમ્ ।
ભવન્તં તત્ત્વમિત્યદ્ય તેજોરાશિં પરાત્પરમ્ ॥ ૧૬॥

પરમાત્માનમિત્યાહુરસ્મિન્ જગતિ યદ્વિભો ।
ત્વમેવ શર્વ સર્વાત્મન્ ત્રિલોકાધિપતે ભવ ॥ ૧૭॥

દૃષ્ટં શ્રુતં સ્તુતં સર્વં જ્ઞાયમાનં જગદ્ગુરો ।
અણોરલ્પતરં પ્રાહુર્મહતોઽપિ મહત્તરમ્ ॥ ૧૮॥

સર્વતઃ પાણિપાદં તત્ સર્વતોઽક્ષિશિરોમુખમ્ ।
સર્વતઃ શ્રવણઘ્રાણં ત્વાં નમામિ ચ સર્વતઃ ॥ ૧૯॥

સર્વજ્ઞં સર્વતો વ્યાપિન્ સર્વેશ્વરમનાવૃતમ્ ।
વિશ્વરૂપં વિરૂપાક્ષં ત્વાં નમામિ ચ સર્વતઃ ॥ ૨૦॥

સર્વેશ્વરં ભવાધ્યક્ષં સત્યં શિવમનુત્તમમ્ ।
કોટિ ભાસ્કરસઙ્કાશં ત્વાં નમામિ ચ સર્વતઃ ॥ ૨૧॥

વિશ્વદેવમનાદ્યન્તં ષટ્ત્રિંશત્કમનીશ્વરમ્ ।
પ્રવર્તકં ચ સર્વેષાં ત્વાં નમામિ ચ સર્વતઃ ॥ ૨૨॥

પ્રવર્તકં ચ પ્રકૃતેઃ સર્વસ્ય પ્રપિતામહમ્ ।
સર્વવિગ્રહમીશં હિ ત્વાં નમામિ ચ સર્વતઃ ॥ ૨૩॥

એવં વદન્તિ વરદં સર્વાવાસં સ્વયમ્ભુવમ્ ।
શ્રુતયઃ શ્રુતિસારજ્ઞં શ્રુતિસારવિદશ્ચ યે ॥ ૨૪॥

અદૃશ્યમસ્માભિરનેકભૂતં
ત્વયા કૃતં યદ્ભવતાથ લોકે ।
ત્વામેવ દેવાસુરભૂસુરાશ્ચ
અન્યે ચ વૈ સ્થાવરજઙ્ગમાશ્ચ ॥ ૨૫॥

પાહ્યનન્યગતીન્ શમ્ભો સુરાન્નો દેવવલ્લભ ।
નષ્ટપ્રાયાંસ્ત્રિપુરતો વિનિહત્યાસુરાન્ક્ષણાત્ ॥ ૨૬॥

માયયા મોહિતાસ્તેઽદ્ય ભવતઃ પરમેશ્વર ।

વિષ્ણુના પ્રોક્તયુક્ત્યા ત ઉજ્ઝિતા ધર્મતઃ પ્રભો ॥ ૨૭॥

સન્ત્યક્તસર્વધર્માશ્ચ બૌદ્ધાગમસમાશ્રિતાઃ ।
અસ્મદ્ભાગ્યવશાજ્જાતા દૈત્યાસ્તે ભક્તવત્સલ ॥ ૨૮॥

સદા ત્વં કાર્યકર્ત્તા હિ દેવાનાં શરણપ્રદ ।
વયં તે શરણાપન્ના યથેચ્છસિ તથા કુરુ ॥ ૨૯॥

સનત્કુમાર ઉવાચ ।
ઇતિ સ્તુત્વા મહેશાનં દેવાસ્તુ પુરતઃ સ્થિતાઃ ।
કૃતાઞ્જલિપુટા દીના આસન્ સન્નતમૂર્તયઃ ॥ ૩૦॥

સ્તુતશ્ચૈવં સુરેન્દ્રાદ્યૈર્વિષ્ણોર્જાપ્યેન ચેશ્વરઃ ।
અગચ્છત્તત્ર સર્વેશો વૃષમારુહ્ય હર્ષિતઃ ॥ ૩૧॥

વિષ્ણુમાલિઙ્ગ્ય નન્દિશાદવરુહ્ય પ્રસન્નધીઃ ।
દદર્શ સુદૃશા તત્ર નન્દીદત્તકરોઽખિલાન્ ॥ ૩૨॥

અથ દેવાન્ સમાલોક્ય કૃપાદૃષ્ટ્યા હરિં હરઃ ।
પ્રાહ ગમ્ભીરયા વાચા પ્રસન્નઃ પાર્વતીપતિઃ ॥ ૩૩॥

શિવ ઉવાચ ।
જ્ઞાતં મયેદમધુના દેવકાર્યં સુરેશ્વર ।
વિષ્ણોર્માયાબલં ચૈવ નારદસ્ય ચ ધીમતઃ ॥ ૩૪॥

તેષામધર્મનિષ્ઠાનાં દૈત્યાનાં દેવસત્તમ ।
પુરત્રયવિનાશં ચ કરિષ્યેઽહં ન સંશયઃ ॥ ૩૫॥

પરન્તુ તે મહાદૈત્યા મદ્ભક્તા દૃઢમાનસાઃ ।
અથ વધ્યા મયૈવ સ્યુર્વ્યાજત્યક્તવૃષોત્તમાઃ ॥ ૩૬॥

વિષ્ણુર્હન્યાત્પરો વાથ યત્ત્યાજિતવૃષાઃ કૃતાઃ ।
દૈત્યા મદ્ભક્તિરહિતાઃ સર્વે ત્રિપુરવાસિનઃ ॥ ૩૭॥

ઇતિ શમ્ભોસ્તુ વચનં શ્રુત્વા સર્વે દિવૌકસઃ ।
વિમનસ્કા બભૂવુસ્તે હરિશ્ચાપિ મુનીશ્વર ॥ ૩૮॥

દેવાન્ વિષ્ણુમુદાસીનાન્ દૃષ્ટ્વા ચ ભવકૃદ્વિધિઃ ।
કૃતાઞ્જલિપુરઃ શમ્ભું બ્રહ્મા વચનમબ્રવીત્ ॥ ૩૯॥

બ્રહ્મોવાચ ।

ન કિઞ્ચિદ્વિદ્યતે પાપં યસ્માત્ત્વં યોગવિત્તમઃ ।
પરમેશઃ પરબ્રહ્મ સદા દેવર્ષિરક્ષકઃ ॥ ૪૦॥

તવૈવ શાસનાત્તે વૈ મોહિતાઃ પ્રેરકો ભવાન્ ।
ત્યક્તસ્વધર્મત્વત્પૂજાઃ પરવધ્યાસ્તથાપિ ન ॥ ૪૧॥

અતસ્ત્વયા મહાદેવ સુરર્ષિપ્રાણરક્ષક ।
સાધૂનાં રક્ષણાર્થાય હન્તવ્યા મ્લેચ્છજાતયઃ ॥ ૪૨॥

રાજ્ઞસ્તસ્ય ન તત્પાપં વિદ્યતે ધર્મતસ્તવ ।
તસ્માદ્રક્ષેદ્દ્વિજાન્ સાધૂન્ કણ્ટકાન્ વૈ વિશોધયેત્ ॥ ૪૩॥

એવમિચ્છેદિહાન્યત્ર રાજા ચેદ્રાજ્યમાત્મનઃ ।
પ્રભુત્વં સર્વલોકાનાં તસ્માદ્રક્ષસ્વ માચિરમ્ ॥ ૪૪॥

મુનીન્દ્રેશાસ્તથા યજ્ઞા વેદાઃ શાસ્ત્રાદયોઽખિલાઃ ।
પ્રજાસ્તે દેવદેવેશ હ્યહં વિષ્ણુરપિ ધ્રુવમ્ ॥ ૪૫॥

દેવતાસાર્વભૌમસ્ત્વં સમ્રાટ્ સર્વેશ્વરઃ પ્રભો ।
પરિવારસ્તવૈવૈષ હર્યાદિ સકલં જગત્ ॥ ૪૬॥

યુવરાજો હરિસ્તેઽજ બ્રહ્માહં તે પુરોહિતઃ ।
રાજકાર્યકરઃ શક્રસ્ત્વદાજ્ઞાપરિપાલકઃ ॥ ૪૭॥

દેવા અન્યેઽપિ સર્વેશ તવ શાસનયન્ત્રિતાઃ ।
સ્વસ્વકાર્યકરા નિત્યં સત્યં સત્યં ન સંશયઃ ॥ ૪૮॥

સનત્કુમાર ઉવાચ ।
એતચ્છ્રુત્વા વચસ્તસ્ય બ્રહ્મણઃ પરમેશ્વરઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા શઙ્કરઃ સુરપો વિધિમ્ ॥ ૪૯॥

શિવ ઉવાચ ।
હે બ્રહ્મન્ યદ્યહં દેવરાજઃ સમ્રાટ્ પ્રકીર્ત્તિતઃ ।
તત્પ્રકારો ન મે કશ્ચિદ્ ગૃહ્ણીયાં યમિહ પ્રભુઃ ॥ ૫૦॥

રથો નાસ્તિ મહાદિવ્યસ્તાદૃક્ સારથિના સહ ।
ધનુર્બાણાદિકં ચાપિ સઙ્ગ્રામે જયકારકમ્ ॥ ૫૧॥

યમાસ્થાય ધનુર્બાણાન્ ગૃહીત્વા યોજ્ય વૈ મનઃ ।
નિહનિષ્યામ્યહં દૈત્યાન્ પ્રબલાનપિ સઙ્ગરે ॥ ૫૨॥

સનત્કુમાર ઉવાચ ।
અથ સબ્રહ્મકા દેવાઃ સેન્દ્રોપેન્દ્રાઃ પ્રહર્ષિતાઃ ।
શ્રુત્વા પ્રભોસ્તદા વાક્યં નત્વા પ્રોચુર્મહેશ્વરમ્ ॥ ૫૩॥

દેવા ઊચુઃ ।
વયં ભવામ દેવેશ તત્પ્રકારા મહેશ્વર ।
રથાદિકાઃ તવ સ્વામિન્સન્નદ્ધાઃ સઙ્ગરાય હિ ॥ ૫૪॥

ઇત્યુક્ત્વા સંહતાઃ સર્વે શિવેચ્છામધિગમ્ય હ ।
પૃથગૂચુઃ પ્રસન્નાસ્તે કૃતાઞ્જલિપુટાસ્સુરાઃ ॥ ૫૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શિવસ્તુતિવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૨.૫.૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૭. સપ્તમોઽધ્યાયઃ । દેવસ્તુતિવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
એતચ્છ્રુત્વા તુ સર્વેષાં દેવાદીનાં વચો હરઃ ।
અઙ્ગીચકાર સુપ્રીત્યા શરણ્યો ભક્તવત્સલઃ ॥ ૧॥

એતસ્મિન્નન્તરે દેવી પુત્રાભ્યાં સંયુતા શિવા ।
આજગામ મુને તત્ર યત્ર દેવાન્વિતો હરઃ ॥ ૨॥

અથાગતાં શિવાં દૃષ્ટ્વા સર્વે વિષ્ણ્વાદયો દ્રુતમ્ ।
પ્રણેમુરતિનમ્રાસ્તે વિસ્મિતા ગતસમ્ભ્રમાઃ ॥ ૩॥

પ્રોચુર્જયેતિ સદ્વાક્યં મુને સર્વે સુલક્ષણમ્ ।
તૂષ્ણીમાસન્નજાનન્તસ્તદાગમનકારણમ્ ॥ ૪॥

અથ સર્વૈઃ સ્તુતા દેવૈર્દેવ્યદ્ભુતકુતૂહલા ।
ઉવાચ સ્વામિનં પ્રીત્યા નાનાલીલાવિશારદમ્ ॥ ૫॥

દેવ્યુવાચ ।

ક્રીડમાનં વિભો પશ્ય ષણ્મુખં રવિસન્નિભમ્ ।
પુત્રં પુત્રવતાં શ્રેષ્ઠ ભૂષિતં ભૂષણૈર્વરૈઃ ॥ ૬॥

સનત્કુમાર ઉવાચ
ઇત્યેવં લોકમાત્રા ચ વાગ્ભિઃસમ્બોધિતશ્શિવઃ ।
ન યયૌ તૃપ્તિમીશાનઃ પિબન્ સ્કન્દાનનામૃતમ્ ॥ ૭॥

ન સસ્મારાગતાન્ દેવાન્ નિજતેજોનિપીડિતાન્ ।
સ્કન્દમાલિઙ્ગ્ય ચાઘ્રાય મુમોદાતિ મહેશ્વરઃ ॥ ૮॥

જગદમ્બાથ તત્રૈવ સમ્મન્ત્ર્ય પ્રભુણા ચ સા ।
સ્થિત્વા કિઞ્ચિત્સમુત્તસ્થૌ નાનાલીલાવિશારદા ॥ ૯॥

તતઃ સ નન્દી સહ ષણ્મુખેન
તયા ચ સાર્દ્ધં ગિરિરાજપુત્ર્યા ।
વિવેશ શમ્ભુર્ભવનં સુલીલઃ
સુરૈઃ સમસ્તૈરભિવન્દ્યમાનઃ ॥ ૧૦॥

દ્વારસ્ય પાર્શ્વતઃ તસ્થુર્દેવદેવસ્ય ધીમતઃ ।
તેઽથ દેવા મહાવ્યગ્રા વિમનસ્કા મુનેઽખિલાઃ ॥ ૧૧॥

કિં કર્તવ્યં ક્વ ગન્તવ્યં કઃ સ્યાદસ્મત્સુખપ્રદઃ ।
કિં તુ કિન્ત્વિતિ સઞ્જાતં હા હતાઃ સ્મેતિ વાદિનઃ ॥ ૧૨॥

અન્યોન્યં પ્રેક્ષ્ય શક્રાદ્યા બભૂવુશ્ચાતિવિહ્વલાઃ ।
પ્રોચુર્વિકલવાક્યં તે ધિક્કુર્વન્તો નિજં વિધિમ્ ॥ ૧૩॥

પાપા વયમિહેત્યન્યે હ્યભાગ્યાશ્ચેતિ ચાપરે ।
તે ભાગ્યવન્તો દૈત્યેન્દ્રા ઇતિ ચાન્યેઽબ્રુવન્ સુરાઃ ॥ ૧૪॥

તસ્મિન્નેવાન્તરે તેષાં શ્રુત્વા શબ્દાનનેકશઃ ।
કુમ્ભોદરો મહાતેજા દણ્ડેનાતાડયત્સુરાન્ ॥ ૧૫॥

દુદ્રુવુસ્તે ભયાવિષ્ટા દેવા હાહેતિ વાદિનઃ ।
અપતન્મુનયશ્ચાન્યે વિહ્વલત્વં બભૂવ હ ॥ ૧૬॥

ઇન્દ્રસ્તુ વિકલોઽતીવ જાનુભ્યામવનીં ગતઃ ।
અન્યે દેવર્ષયોઽતીવ વિકલાઃ પતિતા ભુવિ ॥ ૧૭॥

સર્વે મિલિત્વા મુનયઃ સુરાશ્ચ સમમાકુલાઃ ।

સઙ્ગતા વિધિહર્યોસ્તુ સમીપં મિત્રચેતસોઃ ॥ ૧૮॥

અહો વિધિબલં ચૈતન્મુનયઃ કશ્યપાદયઃ ।
વદન્તિ સ્મ તદા સર્વે હરિં લોકભયાપહમ્ ॥ ૧૯॥

અભાગ્યાન્ન સમાપ્તં તુ કાર્યમિત્યપરે દ્વિજાઃ ।
કસ્માદ્વિઘ્નમિદં જાતમિત્યન્યે હ્યતિવિસ્મિતાઃ ॥ ૨૦॥

ઇત્યેવં વચનં શ્રુત્વા કશ્યપાદ્યુદિતં મુને ।
આશ્વાસયન્મુનીન્દેવાન્ હરિર્વાક્યમુપાદદે ॥ ૨૧॥

વિષ્ણુરુવાચ ।
હે દેવા મુનયઃ સર્વે મદ્વચઃ શ‍ૃણુતાદરાત્ ।
કિમર્થં દુઃખમાપન્ના દુખં તુ ત્યજતાખિલમ્ ॥ ૨૨॥

મહદારાધનં દેવા ન સુસાધ્યં વિચાર્યતામ્ ।
મહદારાધને પૂર્વં ભવેદ્દુઃખમિતિ શ્રુતમ્ ॥

વિજ્ઞાય દૃઢતાં દેવાઃ પ્રસન્નો ભવતિ ધ્રુવમ્ । ૨૩॥

શિવઃ સર્વગણાધ્યક્ષઃ સહસા પરમેશ્વરઃ ।
વિચાર્યતાં હૃદા સર્વૈઃ કથં વશ્યો ભવેદિતિ ॥ ૨૪॥

પ્રણવં પૂર્વમુચ્ચાર્ય નમઃ પશ્ચાદુદાહરેત્ ।
શિવાયેતિ તતઃ પશ્ચાચ્છુભદ્વયમતઃ પરમ્ ॥ ૨૫॥

કુરુદ્વયં તતઃ પ્રોક્તં શિવાય ચ તતઃ પુનઃ ।
નમશ્ચ પ્રણવશ્ચૈવ મન્ત્રમેવં સદા બુધાઃ ॥ ૨૬॥

આવર્તધ્વં પુનર્યૂયં યદિ શમ્ભુકૃતે તદા ।
કોટિમેકં તથા જપ્ત્વા શિવઃ કાર્યં કરિષ્યતિ ॥ ૨૭॥

ઇત્યુક્તે ચ તદા તેન હરિણા પ્રભવિષ્ણુના ।
તથા દેવાઃ પુનશ્ચક્રુર્હરસ્યારાધનં મુને ॥ ૨૮॥

સઞ્જજાપ હરિશ્ચાપિ સવિધિશ્શિવમાનસઃ ।
દેવાનાં કાર્યસિદ્ધ્યર્થં મુનીનાં ચ વિશેષતઃ ॥ ૨૯॥

મુહુઃ શિવેતિ ભાષન્તો દેવા ધૈર્યસમન્વિતાઃ ।
કોટિસઙ્ખ્યં તદા કૃત્વા સ્થિતાસ્તે મુનિસત્તમ ॥ ૩૦॥

એતસ્મિન્નન્તરે સાક્ષાચ્છિવઃ પ્રાદુરભૂત્સ્વયમ્ ।
યથોક્તેન સ્વરૂપેણ વચનં ચેદમબ્રવીત્ ॥ ૩૧॥

શ્રીશિવ ઉવાચ ।
હે હરે હે વિધે દેવા મુનયશ્ચ શુભવ્રતાઃ ।
પ્રસન્નોઽસ્મિ વરં બ્રૂત જપેનાનેન ચેપ્સિતમ્ ॥ ૩૨॥

દેવા ઊચુઃ ।
યદિ પ્રસન્નો દેવેશ જગદીશ્વર શઙ્કર ।
સુરાન્ વિજ્ઞાય વિકલાન્ હન્યન્તાં ત્રિપુરાણિ ચ ॥ ૩૩॥

રક્ષાસ્માન્પરમેશાન દીનબન્ધો કૃપાકર ।
ત્વયૈવ રક્ષિતા દેવાઃ સદાપદ્ભ્યો મુહુર્મુહુઃ ॥ ૩૪॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તં વચનં તેષાં શ્રુત્વા સહરિવેધસામ્ ।
વિહસ્યાન્તસ્તદા બ્રહ્મન્મહેશઃ પુનરબ્રવીત્ ॥ ૩૫॥

મહેશ ઉવાચ ।
હે હરે હે વિધે દેવા મુનયશ્ચાખિલા વચઃ ।
મદીયં શ‍ૃણુતાદૃત્ય નષ્ટં મત્વા પુરત્રયમ્ ॥ ૩૬॥

રથં ચ સારથિં દિવ્યં કાર્મુકં શરમુત્તમમ્ ।
પૂર્વમઙ્ગીકૃતં સર્વમુપપાદયતાચિરમ્ ॥ ૩૭॥

હે વિષ્ણો હે વિધે ત્વં હિ ત્રિલોકાધિપતિર્ધ્રુવમ્ ।
સર્વસંરાટ્પ્રકારં મે કર્તુમર્હસિ યત્નતઃ ॥ ૩૮॥

નષ્ટં પુરત્રયં મત્વા દેવસાહાય્યમિત્યુત ।
કરિષ્યથઃ પ્રયત્નેનાધિકૃતૌ સર્ગપાલને ॥ ૩૯॥

અયં મન્ત્રો મહાપુણ્યો મત્પ્રીતિજનકઃ શુભઃ ।
ભુક્તિમુક્તિપ્રદઃસર્વકામદઃ શૈવકાવહઃ ॥ ૪૦॥

ધન્યો યશસ્ય આયુષ્યઃ સ્વર્ગકામાર્થિનાં નૃણામ્ ।
અપવર્ગો હ્યકામાનાં મુક્તાનાં ભુક્તિમુક્તિદઃ ॥ ૪૧॥

ય ઇમં કીર્તયેન્મન્ત્રં શુચિર્ભૂત્વા સદા નરઃ ।
શ‍ૃણુયાચ્છ્રાવયેદ્વાપિ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૪૨॥

સનત્કુમાર ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય શિવસ્ય પરમાત્મનઃ ।
સર્વે દેવા મુદં પ્રાપુર્હરિર્બ્રહ્માધિકં તથા ॥ ૪૩॥

સર્વદેવમયં દિવ્યં રથં પરમશોભનમ્ ।
રચયામાસ વિશ્વાર્થે વિશ્વકર્મા તદાજ્ઞયા ॥ ૪૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે દેવસ્તુતિવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૨.૫.૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૮. અષ્ટમોઽધ્યાયઃ । રથાદિયુદ્ધપ્રકારવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ શૈવપ્રવર સન્મતે ।
અદ્ભુતેયં કથા તાત શ્રાવિતા પરમેશિતુઃ ॥ ૧॥

ઇદાનીં રથનિર્માણં બ્રૂહિ દેવમયં પરમ્ ।
શિવાર્થં યત્કૃતં દિવ્યં ધીમતા વિશ્વકર્મણા ॥ ૨॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય વ્યાસસ્ય સ મુનીશ્વરઃ ।
સનત્કુમારઃ પ્રોવાચ સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૩॥

સનત્કુમાર ઉવાચ ।
શ ृણુ વ્યાસ મહાપ્રાજ્ઞ રથાદેર્નિર્મિતિં મુને ।
યથામતિ પ્રવક્ષ્યેઽહં સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૪॥

અથ દેવસ્ય રુદ્રસ્ય નિર્મિતો વિશ્વકર્મણા ।
સર્વલોકમયો દિવ્યો રથો યત્નેન સાદરમ્ ॥ ૫॥

સર્વભૂતમયશ્ચૈવ સૌવર્ણઃ સર્વસમ્મતઃ ।
રથાઙ્ગં દક્ષિણં સૂર્યસ્તદ્વામં સોમ એવ ચ ॥ ૬॥

દક્ષિણં દ્વાદશારં હિ ષોડશારં તથોત્તરમ્ ।
અરેષુ તેષુ વિપ્રેન્દ્ર આદિત્યા દ્વાદશૈવ તુ ॥ ૯॥

શશિનઃ ષોડશારાસ્તુ કલા વામસ્ય સુવ્રત ।
ઋક્ષાણિ તુ તથા તસ્ય વામસ્યૈવ વિભૂષણમ્ ॥ ૮॥

ઋતવો નેમયઃ ષટ્ ચ તયોર્વૈ વિપ્રપુઙ્ગવ ।
પુષ્કરં ચાન્તરિક્ષં વૈ રથનીડશ્ચ મન્દરઃ ॥ ૯॥

અસ્તાદ્રિરુદયાદ્રિસ્તુ તાવુભૌ કૂબરૌ સ્મૃતૌ ।
અધિષ્ઠાનં મહામેરુરાશ્રયાઃ કેશરાચલાઃ ॥ ૧૦॥

વેગઃ સંવત્સરાસ્તસ્ય અયને ચક્રસઙ્ગમૌ ।
મુહૂર્તા બન્ધુરાસ્તસ્ય શમ્યાશ્ચૈવ કલાઃ સ્મૃતાઃ ॥ ૧૧॥

તસ્ય કાષ્ઠાઃ સ્મૃતા ઘોણાશ્ચાક્ષદણ્ડાઃ ક્ષણાશ્ચ વૈ ।
નિમેષાશ્ચાનુકર્ષાશ્ચ ઈષાશ્ચાનુલવાઃ સ્મૃતાઃ ॥ ૧૨॥

દ્યૌર્વરૂથં રથસ્યાસ્ય સ્વર્ગમોક્ષાવુભૌ ધ્વજૌ ।
યુગાન્તકોટિતૌ તસ્ય ભ્રમકામદુઘૌ સ્મૃતૌ ॥ ૧૩॥

ઈષાદણ્ડસ્તથા વ્યક્તં વૃદ્ધિસ્તસ્યૈવ નડ્વલઃ ।
કોણાસ્તસ્યાપ્યહઙ્કારો ભૂતાનિ ચ બલં સ્મૃતમ્ ॥ ૧૪॥

ઇન્દ્રિયાણિ ચ તસ્યૈવ ભૂષણાનિ સમન્તતઃ ।
શ્રદ્ધા ચ ગતિરસ્યૈવ રથસ્ય મુનિસત્તમ ॥ ૧૫॥

તદાનીં ભૂષણાન્યેવ ષડઙ્ગાન્યુપભૂષણમ્ ।
પુરાણન્યાયમીમાંસાધર્મશાસ્ત્રાણિ સુવ્રતાઃ ॥ ૧૬॥

બલાશયા વરાશ્ચૈવ સર્વલક્ષણસંયુતાઃ ।
મન્ત્રા ઘણ્ટાઃ સ્મૃતાસ્તેષાં વર્ણપાદાસ્તદાશ્રમાઃ ॥ ૧૭॥

અથો બન્ધો હ્યનન્તસ્તુ સહસ્રફણભૂષિતઃ ।
દિશઃ પાદા રથસ્યાસ્ય તથા ચોપદિશશ્ચ હ ॥ ૧૮॥

પુષ્કરાદ્યાઃ પતાકાશ્ચ સૌવર્ણા રત્નભૂષિતાઃ ।
સમુદ્રાસ્તસ્ય ચત્વારો રથકમ્બલિનઃસ્મૃતાઃ ॥ ૧૯॥

ગઙ્ગાદ્યાઃ સરિતશ્રેષ્ઠાઃ સર્વાભરણભૂષિતાઃ ।
ચામરાસક્તહસ્તાગ્રાઃ સર્વાઃ સ્ત્રીરૂપશોભિતાઃ ॥ ૨૦॥

તત્ર તત્ર કૃતસ્થાનાઃ શોભયાઞ્ચક્રિરે રથમ્ ।
આવહાદ્યાસ્તથા સપ્ત સોપાનં હૈમમુત્તમમ્ ॥ ૨૧॥

લોકાલોકાચલસ્તસ્યોપસોપાનાઃ સમન્તતઃ ।
વિષયશ્ચ તથા બાહ્યો માનસાદિસ્તુ શોભનઃ ॥ ૨૨॥

પાશાઃ સમન્તતસ્તસ્ય સર્વે વર્ષાચલાઃ સ્મૃતાઃ ।
તલાસ્તસ્ય રથસ્યાઽથ સર્વે તલનિવાસિનઃ ॥ ૨૩॥

સારથિર્ભગવાન્બ્રહ્મા દેવા રશ્મિધરાઃ સ્મૃતાઃ ।
પ્રતોદો બ્રહ્મણસ્તસ્ય પ્રણવો બ્રહ્મદૈવતમ્ ॥ ૨૪॥

અકારશ્ચ મહચ્છત્રં મન્દરઃ પાર્શ્વદણ્ડભાક્ ।
શૈલેન્દ્રઃ કાર્મુકં તસ્ય જ્યા ભુજઙ્ગાધિપઃ સ્વયમ્ ॥ ૨૫॥

ઘણ્ટા સરસ્વતી દેવી ધનુષઃ શ્રુતિરૂપિણી ।
ઇષુર્વિષ્ણુર્મહાતેજાસ્ત્વગ્નિઃ શલ્યં પ્રકીર્તિતમ્ ॥ ૨૬॥

હયાસ્તસ્ય તથા પ્રોક્તાશ્ચત્વારો નિગમા મુને ।
જ્યોતીંષિ ભૂષણં તેષામવશિષ્ટાન્યતઃ પરમ્ ॥ ૨૭॥

અનીકં વિષસમ્ભૂતં વાયવો વાદકાઃ સ્મૃતાઃ ।
ઋષયો વ્યાસમુખ્યાશ્ચ વાહવાહાસ્તથાભવન્ ॥ ૨૮॥

સ્વલ્પાક્ષરૈઃ સમ્બ્રવીમિ કિં બહૂક્ત્યા મુનીશ્વર ।
બ્રહ્માણ્ડે ચૈવ યત્કિઞ્ચિદ્વસ્તુતદ્વૈ રથે સ્મૃતમ્ ॥ ૨૯॥

એવં સમ્યક્કૃતસ્તેન ધીમતા વિશ્વકર્મણા ।
સરથાદિપ્રકારો હિ બ્રહ્મવિષ્ણ્વાજ્ઞયા શુભઃ ॥ ૩૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે રથાદિયુદ્ધપ્રકારવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૨.૫.૮॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૯. નવમોઽધ્યાયઃ । શિવયાત્રાવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
ઈદૃગ્વિધં મહાદિવ્યં નાનાશ્ચર્યમયં રથમ્ ।
સન્નહ્ય નિગમાનશ્વાંસ્તં બ્રહ્મા પ્રાર્પયચ્છિવમ્ ॥ ૧॥

શમ્ભવેઽસૌ નિવેદ્યાધિરોપયામાસ શૂલિનમ્ ।
બહુશઃ પ્રાર્થ્ય દેવેશં વિષ્ણ્વાદિસુરસમ્મતમ્ ॥ ૨॥

તતસ્તસ્મિન્ રથે દિવ્યે રથપ્રાકારસંયુતે ।
સર્વદેવમયઃ શમ્ભુરારુરોહ મહાપ્રભુઃ ॥ ૩॥

ઋષિભિઃ સ્તૂયમાનશ્ચ દેવગન્ધર્વપન્નગૈઃ ।
વિષ્ણુના બ્રહ્મણા ચાપિ લોકપાલૈર્બભૂવ હ ॥ ૪॥

ઉપાવૃતશ્ચાપ્સરસાઙ્ગણૈર્ગીતવિશારદૈઃ ।
શુશુભે વરદઃ શમ્ભુઃ સ તં પ્રેક્ષ્ય ચ સારથિમ્ ॥ ૫॥

તસ્મિન્નારોહતિ રથં કલ્પિતં લોકસમ્ભૃતમ્ ।
શિરોભિઃ પતિતા ભૂમૌ તુરગા વેદસમ્ભવાઃ ॥ ૬॥

ચચાલ વસુધા ચેલુઃ સકલાશ્ચ મહીધરાઃ ।
ચકમ્પે સહસા શેષોઽસોઢા તદ્ભારમાતુરઃ ॥ ૭॥

અથાધઃ સ રથસ્યાસ્ય ભગવાન્ધરણીધરઃ ।
વૃષેન્દ્રરૂપી ચોત્થાય સ્થાપયામાસ વૈ ક્ષણમ્ ॥ ૮॥

ક્ષણાન્તરે વૃષેન્દ્રોઽપિ જાનુભ્યામગમદ્ધરામ્ ।
રથારૂઢમહેશસ્ય સુતેજસ્સોઢુમક્ષમઃ ॥ ૯॥

અભીષુહસ્તો ભગવાનુદ્યમ્ય ચ હયાંસ્તદા ।
સ્થાપયામાસ દેવસ્ય વચનાદ્વૈ રથં વરમ્ ॥ ૧૦॥

તતોઽસૌ નોદયામાસ મનોમારુતરંહસઃ ।
બ્રહ્મા હયાન્વેદમયાન્નદ્ધાન્ રથવરે સ્થિતઃ ॥ ૧૧॥

પુરાણ્યુદ્દિશ્ય વૈ ત્રીણિ તેષાં ખસ્થાનિ તાનિ હિ ।
અધિષ્ઠિતે મહેશે તુ દાનવાનાં તરસ્વિનામ્ ॥ ૧૨॥

અથાહ ભગવાન્ રુદ્રો દેવાનાલોક્ય શઙ્કરઃ ।
પશૂનામાધિપત્યં મે દધ્વં હન્મિ તતોઽસુરાન્ ॥ ૧૩॥

પૃથક્ પશુત્વં દેવાનાં તથાન્યેષાં સુરોત્તમાઃ ।
કલ્પયિત્વૈવ વધ્યાસ્તે નાન્યથા દૈત્યસત્તમાઃ ॥ ૧૪॥

સનત્કુમાર ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય દેવદેવસ્ય ધીમતઃ ।
વિષાદમગમન્સર્વે પશુત્વં પ્રતિશઙ્કિતાઃ ॥ ૧૫॥

તેષાં ભાવમથ જ્ઞાત્વા દેવદેવોઽમ્બિકાપતિઃ ।
વિહસ્ય કૃપયા દેવાન્ શમ્ભુસ્તાનિદમબ્રવીત્ ॥ ૧૬॥

શમ્ભુરુવાચ ।
મા વોઽસ્તુ પશુભાવેઽપિ પાતો વિબુધસત્તમાઃ ।
શ્રૂયતાં પશુભાવસ્ય વિમોક્ષઃ ક્રિયતાં ચ સઃ ॥ ૧૭॥

યૌ વૈ પાશુપતં દિવ્યં ચરિષ્યતિ સ મોક્ષ્યતિ ।
પશુત્વાદિતિ સત્યં વઃ પ્રતિજ્ઞાતં સમાહિતાઃ ॥ ૧૮॥

યે ચાપ્યન્યે કરિષ્યન્તિ વ્રતં પાશુપતં મમ ।
મોક્ષ્યન્તિ તે ન સન્દેહઃ પશુત્વાત્સુરસત્તમાઃ ॥ ૧૯॥

નૈષ્ઠિકં દ્વાદશાબ્દં વા તદર્દ્ધં વર્ષકત્રયમ્ ।
શુશ્રૂષાં કારયેદ્યસ્તુ સ પશુત્વાદ્વિમુચ્યતે ॥ ૨૦॥

તસ્માત્પરમિદં દિવ્યં ચરિષ્યથ સુરોત્તમાઃ ।
પશુત્વાન્મોક્ષ્યથ તદા યૂયમત્ર ન સંશયઃ ॥ ૨૧॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય મહેશસ્ય પરાત્મનઃ ।
તથેતિ ચાબ્રુવન્દેવા હરિબ્રહ્માદયસ્તથા ॥ ૨૨॥

તસ્માદ્વૈ પશવઃ સર્વે દેવાસુરવરાઃ પ્રભોઃ ।
રુદ્રઃ પશુપતિશ્ચૈવ પશુપાશવિમોચકઃ ॥ ૨૩॥

તદા પશુપતીત્યેતત્તસ્ય નામ મહેશિતુઃ ।
પ્રસિદ્ધમભવદ્ હ્યદ્ધા સર્વલોકેષુ શર્મદમ્ ॥ ૨૪॥

મુદા જયેતિ ભાષન્તઃ સર્વે દેવર્ષયસ્તદા ।
અમુદંશ્ચાતિ દેવેશો બ્રહ્મા વિષ્ણુઃ પરેઽપિ ચ ॥ ૨૫॥

તસ્મિંશ્ચ સમયે યચ્ચ રૂપં તસ્ય મહાત્મનઃ ।
જાતં તદ્વર્ણિતું શક્યં ન હિ વર્ષશતૈરપિ ॥ ૨૬॥

એવંવિધો મહેશાનો મહેશાન્યખિલેશ્વરઃ ।
જગામ ત્રિપુરં હન્તું સર્વેષાં સુખદાયકઃ ॥ ૨૭॥

તં દેવદેવં ત્રિપુરં નિહન્તું
તદાનુ સર્વે તુ રવિપ્રકાશાઃ ।
ગજૈર્હયૈસ્સિંહવરૈ રથૈશ્ચ
વૃષૈર્યયુસ્તેઽમરરાજમુખ્યાઃ ॥ ૨૮॥

હલૈશ્ચ શાલૈર્મુશલૈર્ભુશુણ્ડૈ-
ર્ગિરીન્દ્રકલ્પૈર્ગિરિસન્નિભાશ્ચ ।
નાનાયુધૈઃ સંયુતબાહવસ્તે
તતો નુ હૃષ્ટાઃ પ્રયયુઃ સુરેશાઃ ॥ ૨૯॥

નાનાયુધાઢ્યાઃ પરમપ્રકાશા
મહોત્સવાઃ શમ્ભુજયં વદન્તઃ ।
યયુઃ પુરસ્તસ્ય મહેશ્વરસ્ય
તદેન્દ્રપદ્મોદ્ભવવિષ્ણુમુખ્યાઃ ॥ ૩૦॥

જહૃષુર્મુનયઃ સર્વે દણ્ડહસ્તા જટાધરાઃ ।
વવૃષુઃ પુષ્પવર્ષાણિ ખેચરાસ્સિદ્ધચારણાઃ ॥ ૩૧॥

પુરત્રયં ચ વિપ્રેન્દ્ર વ્રજન્સર્વે ગણેશ્વરાઃ ।
તેષાં સઙ્ખ્યા ચ કઃ કર્તું સમર્થો વચ્મિ કાંશ્ચન ॥ ૩૨॥

ગણેશ્વરૈર્દેવગણૈશ્ચ ભૃઙ્ગી
સમાવૃતઃ સર્વગણેન્દ્રવર્યઃ ।
જગામ યોગાંસ્ત્રિપુરં નિહન્તું
વિમાનમારુહ્ય યથા મહેન્દ્રઃ ॥ ૩૩॥

કેશો વિગતવાસશ્ચ મહાકેશો મહાજ્વરઃ ।
સોમવલ્લીસવર્ણશ્ચ સોમપઃ સનકસ્તથા ॥ ૩૪॥

સોમધૃક્ સૂર્યવર્ચાશ્ચ સૂર્યપ્રેષણકસ્તથા ।
સૂર્યાક્ષઃ સૂરિનામા ચ સુરઃ સુન્દર એવ ચ ॥ ૩૫॥

પ્રસ્કન્દઃ કુન્દરશ્ચણ્ડઃ કમ્પનશ્ચાતિકમ્પનઃ ।

ઇન્દ્રશ્ચેન્દ્રજવશ્ચૈવ યન્તા હિમકરસ્તથા ॥ ૩૬॥

શતાક્ષશ્ચૈવ પઞ્ચાક્ષઃ સહસ્રાક્ષો મહોદરઃ ।
સતીજુહઃ શતાસ્યશ્ચ રઙ્કુઃ કર્પૂરપૂતનઃ ॥ ૩૭॥

દ્વિશિખસ્ત્રિશિખશ્ચૈવ તથાહઙ્કારકારકઃ ।
અજવક્ત્રોઽષ્ટવક્ત્રશ્ચ હયવક્ત્રોઽર્દ્ધવક્ત્રકઃ ॥ ૩૮॥

ઇત્યાદ્યા ગણપા વીરા બહવોઽપરિમેયકાઃ ।
પ્રયયુઃ પરિવાર્યેશં લક્ષ્યલક્ષણવર્જિતાઃ ॥ ૩૯॥

સમાવૃત્ય મહાદેવં તદાપુસ્તે પિનાકિનમ્ ।
દગ્ધું સમર્થા મનસા ક્ષણેન સચરાચરમ્ ॥ ૪૦॥

દગ્ધું જગત્સર્વમિદં સમર્થાઃ
કિં ત્વત્ર દગ્ધું ત્રિપુરં પિનાકી ।
રથેન કિં ચાત્ર શરેણ તસ્ય
ગણૈશ્ચ કિં દેવગણૈશ્ચ શમ્ભોઃ ॥ ૪૧॥

સ એવ દગ્ધું ત્રિપુરાણિ તાનિ
દેવદ્વિષાં વ્યાસ પિનાકપાણિઃ ।
સ્વયં ગતસ્તત્ર ગણૈશ્ચ સાર્દ્ધં
નિર્જૈસ્સુરાણામપિ સોઽદ્ભુતોતિઃ ॥ ૪૨॥

કિં તત્ર કારણં ચાન્યદ્વચ્મિ તે ઋષિસત્તમ ।
લોકેષુ ખ્યાપનાર્થં વૈ યશઃ પરમલાપહમ્ ॥ ૪૩॥

અન્યચ્ચ કારણં હ્યેતદ્દુષ્ટાનાં પ્રત્યયાય વૈ ।
સર્વેષ્વપિ ચ દેવેષુ યસ્માન્નાન્યો વિશિષ્યતે ॥ ૪૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શિવયાત્રાવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૨.૫.૯॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

# ૨.૫.૧૦. દશમોઽધ્યાયઃ । ત્રિપુરદાહવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
અથ શમ્ભુર્મહાદેવો રથસ્થઃ સર્વસંયુતઃ ।
ત્રિપુરં સકલં દગ્ધુમુદ્યતોઽભૂત્સુરદ્વિષામ્ ॥ ૧॥

શીર્ષં સ્થાનકમાસ્થાય સન્ધાય ચ શરોત્તમમ્ ।
સજ્જં તત્કાર્મુકં કૃત્વા પ્રત્યાલીઢં મહાદ્ભુતમ્ ॥ ૨॥

નિવેશ્ય દૃઢમુષ્ટૌ ચ દૃષ્ટિં દૃષ્ટૌ નિવેશ્ય ચ ।
અતિષ્ઠન્નિશ્ચલસ્તત્ર શતં વર્ષસહસ્રકમ્ ॥ ૩॥

તતોઽઙ્ગુષ્ઠે ગણાધ્યક્ષઃ સ તુદત્યનિશં સ્થિતઃ ।
ન લક્ષ્યં વિવિશુસ્તાનિ પુરાણ્યસ્ય ત્રિશૂલિનઃ ॥ ૪॥

તતોઽન્તરિક્ષાદશ‍ૃણોદ્ધનુર્બાણધરો હરઃ ।
મુઞ્જકેશો વિરૂપાક્ષો વાચં પરમશોભનામ્ ॥ ૫॥

ભો ભો ન યાવદ્ભગવન્નર્ચિતોઽસૌ વિનાયકઃ ।
પુરાણિ જગદીશેશ સામ્પ્રતં ન હનિષ્યતિ ॥ ૬॥

એતચ્છ્રુત્વા તુ વચનં ગજવક્ત્રમપૂજયત્ ।
ભદ્રકાલીં સમાહૂય તતોઽન્ધકનિષૂદનઃ ॥ ૭॥

તસ્મિન્ સમ્પૂજિતે હર્ષાત્પરિતુષ્ટે પુરસ્સરે ।
વિનાયકે તતો વ્યોમ્નિ દદર્શ ભગવાન્હરઃ ॥ ૮॥

પુરાણિ ત્રીણિ દૈત્યાનાં તારકાણાં મહાત્મનામ્ ।
યથાતથં હિ યુક્તાનિ કેચિદિત્થં વદન્તિ હ ॥ ૯॥

પરબ્રહ્મણિ દેવેશ સર્વોપાસ્યે મહેશ્વરે ।
અન્યપ્રસાદતઃ કાર્યસિદ્ધિર્ઘટતિ નેતિ હિ ॥ ૧૦॥

સ સ્વતન્ત્રઃ પરં બ્રહ્મ સગુણો નિર્ગુણોઽપિ હ ।
અલક્ષ્યઃ સકલૈઃ સ્વામી પરમાત્મા નિરઞ્જનઃ ॥ ૧૧॥

પઞ્ચદેવાત્મકઃ પઞ્ચદેવોપાસ્યઃ પરઃ પ્રભુઃ ।
તસ્યોપાસ્યો ન કોઽપ્યસ્તિ સ એવોપાસ્ય આલયમ્ ॥ ૧૨॥

અથવા લીલયા તસ્ય સર્વં સઙ્ઘટતે મુને ।
ચરિતં દેવદેવસ્ય વરદાતુર્મહેશિતુઃ ॥ ૧૩॥

તસ્મિંસ્થિતે મહાદેવે પૂજયિત્વા ગણાધિપમ્ ।
પુરાણિ તત્ર કાલેન જગ્મુરેકત્વમાશુ વૈ ॥ ૧૪॥

એકીભાવં મુને તત્ર ત્રિપુરે સમુપાગતે ।
બભૂવ તુમુલો હર્ષો દેવાદીનાં મહાત્મનામ્ ॥ ૧૫॥

તતો દેવગણાઃ સર્વે સિદ્ધાશ્ચ પરમર્ષયઃ ।
જયેતિ વાચો મુમુચુઃ સ્તુવન્તશ્ચાષ્ટમૂર્તિકમ્ ॥ ૧૬॥

અથાહેતિ તદા બ્રહ્મા વિષ્ણુશ્ચ જગતાં પતિઃ ।
સમયોઽપિ સમાયાતો દૈત્યાનાં વધકર્મણઃ ॥ ૧૭॥

તેષાં તારકપુત્રાણાં ત્રિપુરાણાં મહેશ્વર ।
દેવકાર્યં કુરુ વિભો એકત્વમપિ ચાગતમ્ ॥ ૧૮॥

યાવન્ન યાન્તિ દેવેશ વિપ્રયોગં પુરાણિ વૈ ।
તાવદ્બાણં વિમુઞ્ચસ્વ ત્રિપુરં ભસ્મસાત્કુરુ ॥ ૧૯॥

અથ સજ્યં ધનુઃ કૃત્વા શર્વઃ સન્ધાય તં શરમ્ ।
પૂજ્યં પાશુપતાસ્ત્રં સ ત્રિપુરં સમચિન્તયત્ ॥ ૨૦॥

અથ દેવો મહાદેવો વરલીલાવિશારદઃ ।
કેનાપિ કારણેનાત્ર સાવજ્ઞં તદવૈક્ષત ॥ ૨૧॥

પુરત્રયં વિરૂપાક્ષઃ કર્તું તદ્ભસ્મસાત્ક્ષણાત્ ।
સમર્થઃ પરમેશાનો જાનાતુ ચ સતાં ગતિઃ ॥ ૨૨॥

દગ્ધું સમર્થો દેવેશો વીક્ષણેન જગત્ત્રયમ્ ।
અસ્મદ્યશો વિવૃદ્ધ્યર્થં શરં મોક્તુમિહાર્હસિ ॥ ૨૩॥

ઇતિ સ્તુતોઽમરૈઃ સર્વૈર્વિષ્ણ્વાદિવિધિભિસ્તદા ।
દગ્ધું પુરત્રયં તદ્વૈ બાણેનૈચ્છન્મહેશ્વરઃ ॥ ૨૪॥

મુહૂર્તેઽભિજિદાખ્યે તુ વિકૃષ્ય ધનુરદ્ભુતમ્ ।
કૃત્વા જ્યાતલનિર્ઘોષં નાદમત્યન્તદુસ્સહમ્ ॥ ૨૫॥

આત્મનો નામ વિશ્રાવ્ય સમાભાષ્ય મહાસુરાન્ ।
માર્તણ્ડકોટિવપુષં કાણ્ડમુગ્રો મુમોચ હ ॥ ૨૬॥

દદાહ ત્રિપુરસ્થાંસ્તાન્દૈત્યાઁસ્ત્રીન્વિમલાપહઃ ।

સ આશુગો વિષ્ણુમયો વહ્નિશલ્યો મહાજ્વલન્ ॥ ૨૭॥

તતઃ પુરાણિ દગ્ધાનિ ચતુર્જલધિમેખલામ્ ।
ગતાનિ યુગપદ્ભૂમિં ત્રીણિ દગ્ધાનિ ભસ્મશઃ ॥ ૨૮॥

દૈત્યાસ્તુ શતશો દગ્ધાસ્તસ્ય બાણસ્થવહ્નિના ।
હાહાકારં પ્રકુર્વન્તશ્શિવપૂજાવ્યતિક્રમાત્ ॥ ૨૯॥

તારકાક્ષસ્તુ નિર્દગ્ધો ભ્રાતૃભ્યાં સહિતોઽભવત્ ।
સસ્માર સ્વપ્રભું દેવં શઙ્કરં ભક્તવત્સલમ્ ॥ ૩૦॥

ભક્ત્યા પરમયા યુક્તઃ પ્રલપન્ વિવિધા ગિરઃ ।
મહાદેવં સમુદ્વીક્ષ્ય મનસા તમુવાચ સઃ ॥ ૩૧॥

તારકાક્ષ ઉવાચ ।
ભવ જ્ઞાતોઽસિ તુષ્ટોઽસિ યદ્યસ્માન્ સહ બન્ધુભિઃ ।
તેન સત્યેન ભૂયોઽપિ કદા ત્વં પ્રદહિષ્યસિ ॥ ૩૨॥

દુર્લભં લબ્ધમસ્માભિર્યદપ્રાપ્યં સુરાસુરૈઃ ।
ત્વદ્ભાવભાવિતા બુદ્ધિર્જાતે જાતે ભવત્વિતિ ॥ ૩૩॥

ઇત્યેવં વિબ્રુવન્તસ્તે દાનવાસ્તેન વહ્નિના ।
શિવાજ્ઞયાદ્ભુતં દગ્ધા ભસ્મસાદભવન્મુને ॥ ૩૪॥

અન્યેઽપિ બાલા વૃદ્ધાશ્ચ દાનવાસ્તેન વહ્નિના ।
શિવાજ્ઞયા દ્રુતં વ્યાસ નિર્દગ્ધા ભસ્મસાત્કૃતાઃ ॥ ૩૫॥

સ્ત્રિયો વા પુરુષા વાપિ વાહનાનિ ચ તત્ર યે ।
સર્વે તેનાગ્નિના દગ્ધાઃ કલ્પાન્તે તુ જગદ્યથા ॥ ૩૬॥

ભર્તૄન્કણ્ઠગતાન્હિત્વા કાશ્ચિદ્દગ્ધા વરસ્ત્રિયઃ ।
કાશ્ચિત્સુપ્તાઃ પ્રમત્તાશ્ચ રતિશ્રાન્તાશ્ચ યોષિતઃ ॥ ૩૭॥

અર્દ્ધદગ્ધા વિબુદ્ધાશ્ચ બભ્રમુર્મોહમૂર્ચ્છિતાઃ ।
તેન નાસીત્સુસૂક્ષ્મોઽપિ ઘોરત્રિપુરવહ્નિના ॥ ૩૮॥

અવિદગ્ધો વિનિર્મુક્તઃ સ્થાવરો જઙ્ગમોઽપિ વા ।
વર્જયિત્વા મયં દૈત્યં વિશ્વકર્માણમવ્યયમ્ ॥ ૩૯॥

અવિરુદ્ધં તુ દેવાનાં રક્ષિતં શમ્ભુતેજસા ।
વિપત્કાલેઽપિ સદ્ભક્તં મહેશશરણાગતમ્ ॥ ૪૦॥

સન્નિપાતો હિ યેષાં નો વિદ્યતે નાશકારકઃ ।
દૈત્યાનામન્યસત્ત્વાનાં ભાવાભાવે કૃતાકૃતે ॥ ૪૧॥

તસ્માદ્યત્નઃ સુસમ્ભાવ્યઃ સદ્ભિઃ કર્તવ્ય એવ હિ ।
ગર્હણાત્ક્ષીયતે લોકો ન તત્કર્મ સમાચરેત્ ॥ ૪૨॥

ન સંયોગો યથા તેષાં ભૂયાત્ ત્રિપુરવાસિનામ્ ।
મતમેતદ્ધિ સર્વેષાં દૈવાદ્યદિ યતો ભવેત્ ॥ ૪૩॥

યે પૂજયન્તસ્તત્રાપિ દૈત્યા રુદ્રં સબાન્ધવાઃ ।
ગાણપત્યં યયુઃ સર્વે શિવપૂજાવિધેર્બલાત્ ॥ ૪૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે ત્રિપુરદાહવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૨.૫.૧૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૧૧. એકાદશોઽધ્યાયઃ । દેવસ્તુતિવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
બ્રહ્મપુત્ર મહાપ્રાજ્ઞ ધન્યસ્ત્વં શૈવસત્તમ ।
કિમકાર્ષુસ્તતો દેવા દગ્ધે ચ ત્રિપુરેઽખિલાઃ ॥ ૧॥

મયઃ કુત્ર ગતોઽદગ્ધો યતયઃ કુત્ર તે ગતાઃ ।
તત્સર્વં મે સમાચક્ષ્વ યદિ શમ્ભુકથાશ્રયમ્ ॥ ૨॥

સૂત ઉવાચ ।
વ્યાસવાક્યં સમાકર્ણ્ય ભગવાન્ભવકૃત્સુતઃ ।
સનત્કુમારઃ પ્રોવાચ શિવપાદયુગં સ્મરન્ ॥ ૩॥

સનત્કુમાર ઉવાચ ।
શૃણુ વ્યાસ મહાબુદ્ધે પારાશર્ય્ય મહેશિતુઃ ।
ચરિતં સર્વપાપઘ્નં લોકલીલાનુસારિણઃ ॥ ૪॥

મહેશ્વરેણ સર્વસ્મિંસ્ત્રિપુરે દૈત્યસઙ્કુલે ।
દગ્ધે વિશેષતસ્તત્ર વિસ્મિતાસ્તેઽભવન્સુરાઃ ॥ ૫॥

ન કિઞ્ચિદબ્રુવન્દેવાઃ સેન્દ્રોપેન્દ્રાદયસ્તદા ।
મહાતેજસ્વિનં રુદ્રં સર્વે વીક્ષ્ય સસમ્ભ્રમાઃ ॥ ૬॥

મહાભયઙ્કરં રૌદ્રં પ્રજ્વલન્તં દિશો દશ ।
કોટિસૂર્યપ્રતીકાશં પ્રલયાનલસન્નિભમ્ ॥ ૭॥

ભયાદ્દેવં નિરીક્ષ્યૈવ દેવીં ચ હિમવત્સુતામ્ ।
બિભ્યિરે નિખિલા દેવપ્રમુખાસ્તસ્થુરાનતાઃ ॥ ૮॥

દૃષ્ટ્વાનીકં તદા ભીતં દેવાનામૃષિપુઙ્ગવાઃ ।
ન કિઞ્ચિદૂચુઃ સન્તસ્થુઃ પ્રણેમુસ્તે સમન્તતઃ ॥ ૯॥

અથ બ્રહ્માપિ સમ્ભીતો દૃષ્ટ્વા રૂપં ચ શાઙ્કરમ્ ।
તુષ્ટાવ તુષ્ટહૃદયો દેવૈઃ સહ સમાહિતઃ ॥ ૧૦॥

વિષ્ણુના ચ સભીતેન દેવદેવં ભવં હરમ્ ।
ત્રિપુરારિં સગિરિજં ભક્તાધીનં મહેશ્વરમ્ ॥ ૧૧॥

બ્રહ્મોવાચ ।
દેવદેવ મહાદેવ ભક્તાનુગ્રહકારક ।
પ્રસીદ પરમેશાન સર્વદેવહિતપ્રદ ॥ ૧૨॥

પ્રસીદ જગતાં નાથ પ્રસીદાનન્દદાયક ।
પ્રસીદ શઙ્કર સ્વામિન્ પ્રસીદ પરમેશ્વર ॥ ૧૩॥

ઓઙ્કારાય નમસ્તુભ્યમાકારપરતારક ।
પ્રસીદ સર્વદેવેશ ત્રિપુરઘ્ન મહેશ્વર ॥ ૧૪॥

નાનાવાચ્યાય દેવાય પ્રણતપ્રિય શઙ્કર ।
અગુણાય નમસ્તુભ્યં પ્રકૃતેઃ પુરુષાત્પર ॥ ૧૫॥

નિર્વિકારાય નિત્યાય નિત્યતૃપ્તાય ભાસ્વતે ।
નિરઞ્જનાય દિવ્યાય ત્રિગુણાય નમોઽસ્તુ તે ॥ ૧૬॥

સગુણાય નમસ્તુભ્યં સ્વર્ગેશાય નમોસ્તુ તે ।
સદાશિવાય શાન્તાય મહેશાય પિનાકિને ॥ ૧૭॥

સર્વજ્ઞાય શરણ્યાય સદ્યોજાતાય તે નમઃ ।

વામદેવાય રુદ્રાય તદાપ્યપુરુષાય ચ ॥ ૧૮॥

અઘોરાય સુસેવ્યાય ભક્તાધીનાય તે નમઃ ।
ઈશાનાય વરેણ્યાય ભક્તાનન્દપ્રદાયિને ॥ ૧૯॥

રક્ષ રક્ષ મહાદેવ ભીતાન્નઃ સકલામરાન્ ।
દગ્ધ્વા ચ ત્રિપુરં સર્વે કૃતાર્થા અમરાઃ કૃતાઃ ॥ ૨૦॥

સ્તુત્વૈવં દેવતાઃસર્વે નમસ્કારં પૃથક્પૃથક્ ।
ચક્રુસ્તે પરમપ્રીતા બ્રહ્માદ્યાસ્તુ સદાશિવમ્ ॥ ૨૧॥

અથ બ્રહ્મા સ્વયં દેવં ત્રિપુરારિં મહેશ્વરમ્ ।
તુષ્ટાવ પ્રણતો ભૂત્વા નતસ્કન્ધઃ કૃતાઞ્જલિઃ ॥ ૨૨॥

બ્રહ્મોવાચ ।
ભગવન્દેવદેવેશ ત્રિપુરાન્તક શઙ્કર ।
ત્વયિ ભક્તિઃ પરા મેઽસ્તુ મહાદેવાનપાયિની ॥ ૨૩॥

સર્વદા મેઽસ્તુ સારથ્યં તવ દેવેશ શઙ્કર ।
અનુકૂલો ભવ વિભો સદા ત્વં પરમેશ્વર ॥ ૨૪॥

સનત્કુમાર ઉવાચ ।
ઇતિ સ્તુત્વા વિધિઃ શમ્ભું ભક્તવત્સલમાનતઃ ।
વિરરામ નતસ્કન્ધઃ કૃતાઞ્જલિરુદારધીઃ ॥ ૨૫॥

જનાર્દનોઽપિ ભગવાન્ નમસ્કૃત્ય મહેશ્વરમ્ ।
કૃતાઞ્જલિપુટો ભૂત્વા તુષ્ટાવ ચ મહેશ્વરમ્ ॥ ૨૬॥

વિષ્ણુરુવાચ ।
દેવાધીશ મહેશાન દીનબન્ધો કૃપાકર ।
પ્રસીદ પરમેશાન કૃપાં કુરુ નતપ્રિય ॥ ૨૭॥

નિર્ગુણાય નમસ્તુભ્યં પુનશ્ચ સગુણાય ચ ।
પુનઃ પ્રકૃતિરૂપાય પુનશ્ચ પુરુષાય ચ ॥ ૨૮॥

પશ્ચાદ્ ગુણસ્વરૂપાય નતો વિશ્વાત્મને નમઃ ।
ભક્તિપ્રિયાય શાન્તાય શિવાય પરમાત્મને ॥ ૨૯॥

સદાશિવાય રુદ્રાય જગતાં પતયે નમઃ ।
ત્વયિ ભક્તિર્દૃઢા મેઽદ્ય વર્દ્ધમાના ભવત્વિતિ ॥ ૩૦॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા વિરરામાસૌ શૈવપ્રવરસત્તમઃ ।
સર્વે દેવાઃ પ્રણમ્યોચુસ્તતસ્તં પરમેશ્વરમ્ ॥ ૩૧॥

દેવા ઊચુઃ ।
દેવનાથ મહાદેવ કરુણાકર શઙ્કર ।
પ્રસીદ જગતાં નાથ પ્રસીદ પરમેશ્વર ॥ ૩૨॥

પ્રસીદ સર્વકર્તા ત્વં નમામસ્ત્વાં વયં મુદા ।
ત્વયિ ભક્તિર્દૃઢાસ્માકં નિત્યં સ્યાદનપાયિની ॥ ૩૩॥

સનત્કુમાર ઉવાચ ।
ઇતિ સ્તુતશ્ચ દેવેશો બ્રહ્મણા હરિણામરૈઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા શઙ્કરો લોકશઙ્કરઃ ॥ ૩૪॥

શઙ્કર ઉવાચ ।
હે વિધે હે હરે દેવાઃ પ્રસન્નોઽસ્મિ વિશેષતઃ ।
મનોઽભિલષિતં બ્રૂત વરં સર્વે વિચારતઃ ॥ ૩૫॥

સનત્કુમારઃ ઉવાચ ।
ઇત્યુક્તં વચનં શ્રુત્વા હરેણ મુનિસત્તમ ।
પ્રત્યૂચુઃ સર્વદેવાશ્ચ પ્રસન્નેનાન્તરાત્મના ॥ ૩૬॥

સર્વે દેવા ઊચુઃ ।
યદિ પ્રસન્નો ભગવન્યદિ દેયો વરસ્ત્વયા ।
દેવદેવેશ ચાસ્મભ્યં જ્ઞાત્વા દાસાન્હિ નઃ સુરાન્ ॥ ૩૭॥

યદા દુઃખં તુ દેવાનાં સમ્ભવેદ્દેવસત્તમ ।
તદા ત્વં પ્રકટો ભૂત્વા દુઃખં નાશય સર્વદા ॥ ૩૮॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તો ભગવાન્ રુદ્રો બ્રહ્મણા હરિણામરૈઃ ।
યુગપત્પ્રાહ તુષ્ટાત્મા તથેત્યસ્તુ નિરન્તરમ્ ॥ ૩૯॥

સ્તવૈરેતૈશ્ચ તુષ્ટોઽસ્મિ દાસ્યામિ સર્વદા ધ્રુવમ્ ।
યદભીષ્ટતમં લોકે પઠતાં શૃણ્વતાં સુરાઃ ॥ ૪૦॥

ઇત્યુક્ત્વા શઙ્કરઃ પ્રીતો દેવદુઃખહરઃ સદા ।
સર્વદેવપ્રિયં યદ્વૈ તત્સર્વં ચ પ્રદત્તવાન્ ॥ ૪૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે દેવસ્તુતિવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૨.૫.૧૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૧૨. દ્વાદશોઽધ્યાયઃ । દેવસ્તુતિવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
એતસ્મિન્નન્તરે શમ્ભું પ્રસન્નં વીક્ષ્ય દાનવઃ ।
તત્રાજગામ સુપ્રીતો મયોઽદગ્ધઃ કૃપાબલાત્ ॥ ૧॥

પ્રણનામ હરં પ્રીત્યા સુરાનન્યાનપિ ધ્રુવમ્ ।
કૃતાઞ્જલિર્નતસ્કન્ધઃ પ્રણનામ પુનસ્શિવમ્ ॥ ૨॥

અથોત્થાય શિવં દૃષ્ટ્વા પ્રેમ્ણા ગદ્ગદસુસ્વરઃ ।
તુષ્ટાવ ભક્તિપૂર્ણાત્મા સ દાનવવરો મયઃ ॥ ૩॥

મય ઉવાચ ।
દેવદેવ મહાદેવ ભક્તવત્સલ શઙ્કર ।
કલ્પવૃક્ષસ્વરૂપોઽસિ સર્વપક્ષવિવર્જિતઃ ॥ ૪॥

જ્યોતીરૂપો નમસ્તેઽસ્તુ વિશ્વરૂપ નમોઽસ્તુ તે ।
નમઃ પૂતાત્મને તુભ્યં પાવનાય નમો નમઃ ॥ ૫॥

ચિત્રરૂપાય નિત્યાય રૂપાતીતાય તે નમઃ ।
દિવ્યરૂપાય દિવ્યાય સુદિવ્યાકૃતયે નમઃ ॥ ૬॥

નમઃ પ્રણતસર્વાર્તિનાશકાય શિવાત્મને ।
કર્ત્રે ભર્ત્રે ચ સંહર્ત્રે ત્રિલોકાનાં નમો નમઃ ॥ ૭॥

ભક્તિગમ્યાય ભક્તાનાં નમસ્તુભ્યં કૃપાલવે ।
તપઃસત્ફલદાત્રે તે શિવાકાન્ત શિવેશ્વર ॥ ૮॥

ન જાનામિ સ્તુતિં કર્તું સ્તુતિપ્રિય પરેશ્વર ।

પ્રસન્નો ભવ સર્વેશ પાહિ માં શરણાગતમ્ ॥ ૯॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય મયોક્તાં હિ સંસ્તુતિં પરમેશ્વરઃ ।
પ્રસન્નોઽભૂદ્ દ્વિજશ્રેષ્ઠ મયં પ્રોવાચ ચાદરાત્ ॥ ૧૦॥

શિવ ઉવાચ ।
વરં બ્રૂહિ પ્રસન્નોઽહં મય દાનવસત્તમ ।
મનોઽભિલષિતં યત્તે તદ્દાસ્યામિ ન સંશયઃ ॥ ૧૧॥

સનત્કુમાર ઉવાચ ।
શ્રુત્વા શિવં વચઃ શમ્ભોઃ સ મયો દાનવર્ષભઃ ।
પ્રત્યુવાચ પ્રભું નત્વા નતસ્કન્ધઃ કૃતાઞ્જલિઃ ॥ ૧૨॥

મય ઉવાચ ।
દેવદેવ મહાદેવ પ્રસન્નો યદિ મે ભવાન્ ।
વરયોગ્યોઽસ્મ્યહં ચેદ્ધિ સ્વભક્તિં દેહિ શાશ્વતીમ્ ॥ ૧૩॥

સ્વભક્તેષુ સદા સખ્યં દીનેષુ ચ દયાં સદા ।
ઉપેક્ષામન્યજીવેષુ ખલેષુ પરમેશ્વર ॥ ૧૪॥

કદાપિ નાસુરો ભાવો ભવેન્મમ મહેશ્વર ।
નિર્ભયઃ સ્યાં સદા નાથ મગ્નસ્ત્વદ્ભજને શુભે ॥ ૧૫॥

સનત્કુમાર ઉવાચ ।
ઇતિ સમ્પ્રાર્થ્યમાનસ્તુ શઙ્કરઃ પરમેશ્વરઃ ।
પ્રત્યુવાચ મયં નાથઃ પ્રસન્નો ભક્તવત્સલઃ ॥ ૧૬॥

મહેશ્વર ઉવાચ ।
દાનવર્ષભ ધન્યસ્ત્વં મદ્ભક્તો નિર્વિકારવાન્ ।
પ્રદત્તાસ્તે વરાઃ સર્વેઽભીપ્સિતા યે તવાધુના ॥ ૧૭॥

ગચ્છ ત્વં વિતલં લોકં રમણીયં દિવોઽપિ હિ ।
સમેતઃ પરિવારેણ નિજેન મમ શાસનાત્ ॥ ૧૮॥

નિર્ભયસ્તત્ર સન્તિષ્ઠ સંહૃષ્ટો ભક્તિમાન્સદા ।
કદાપિ નાસુરો ભાવો ભવિષ્યતિ મદાજ્ઞયા ॥ ૧૯॥

સનત્કુમાર ઉવાચ ।

ઇત્યાજ્ઞાં શિરસાધાય શઙ્કરસ્ય મહાત્મનઃ ।
તં પ્રણમ્ય સુરાંશ્ચાપિ વિતલં પ્રજગામ સઃ ॥ ૨૦॥

એતસ્મિન્નન્તરે તે વૈ મુણ્ડિનશ્ચ સમાગતાઃ ।
પ્રણમ્યોચુશ્ચ તાન્સર્વાન્વિષ્ણુબ્રહ્માદિકાન્ સુરાન્ ॥ ૨૧॥

કુત્ર યામ વયં દેવાઃ કર્મ કિં કરવામહે ।
આજ્ઞાપયત નઃ શીઘ્રં ભવદાદેશકારકાન્ ॥ ૨૨॥

કૃતં દુષ્કર્મ ચાસ્માભિર્હે હરે હે વિધે સુરાઃ ।
દૈત્યાનાં શિવભક્તાનાં શિવભક્તિર્વિનાશિતા ॥ ૨૩॥

કોટિકલ્પાનિ નરકે નો વાસસ્તુ ભવિષ્યતિ ।
નોધ્દારો ભવિતા નૂનં શિવભક્તવિરોધિનામ્ ॥ ૨૪॥

પરન્તુ ભવદિચ્છાત ઇદં દુષ્કર્મ નઃ કૃતમ્ ।
તચ્છાન્તિં કૃપયા બ્રૂત વયં વઃ શરણાગતાઃ ॥ ૨૫॥

સનત્કુમાર ઉવાચ ।
તેષાં તદ્વચનં શ્રુત્વા વિષ્ણુબ્રહ્માદયઃસુરાઃ ।
અબ્રુવન્મુણ્ડિનસ્તાંસ્તે સ્થિતાનગ્રે કૃતાઞ્જલીન્ ॥ ૨૬॥

વિષ્ણ્વાદય ઊચુઃ ।
ન ભેતવ્યં ભવદ્ભિસ્તુ મુણ્ડિનો વૈ કદાચન ।
શિવાજ્ઞયેદં સકલં જાતં ચરિતમુત્તમમ્ ॥ ૨૭॥

યુષ્માકં ભવિતા નૈવ કુગતિર્દુઃખદાયિની ।
શિવદાસા યતો યૂયં દેવર્ષિહિતકારકાઃ ॥ ૨૮॥

સુરર્ષિહિતકૃચ્છમ્ભુઃ સુરર્ષિહિતકૃત્પ્રિયઃ ।
સુરર્ષિહિતકૃન્નૃણાં કદાપિ કુગતિર્ન હિ ॥ ૨૯॥

અદ્યતો મતમેતં હિ પ્રવિષ્ટાનાં નૃણાં કલૌ ।
કુગતિર્ભવિતા બ્રૂમઃ સત્યં નૈવાત્ર સંશયઃ ॥ ૩૦॥

ભવદ્ભિર્મુણ્ડિનો ધીરા ગુપ્તભાવાન્મમાજ્ઞયા ।
તાવન્મરુસ્થલી સેવ્યા કલિર્યાવત્સમાવ્રજેત્ ॥ ૩૧॥

આગતે ચ કલૌ યૂયં સ્વમતં સ્થાપયિષ્યથ ।
કલૌ તુ મોહિતા મૂઢાઃસઙ્ગ્રહીષ્યન્તિ વો મતમ્ ॥ ૩૨॥

ઇત્યાજ્ઞપ્તાઃ સુરેશૈશ્ચ મુણ્ડિનસ્તે મુનીશ્વર ।
નમસ્કૃત્ય ગતાસ્તત્ર યથોદ્દિષ્ટં સ્વમાશ્રમમ્ ॥ ૩૩॥

તતઃ સ ભગવાન્ રુદ્રો દગ્ધ્વા ત્રિપુરવાસિનઃ ।
કૃતકૃત્યો મહાયોગી બ્રહ્માદ્યૈરભિપૂજિતઃ ॥ ૩૪॥

સ્વગણૈર્નિખિલૈર્દેવ્યા શિવયા સહિતઃ પ્રભુઃ ।
કૃત્વામરમહત્કાર્યં સસુતોઽન્તરધાદથ ॥ ૩૫॥

તતશ્ચાન્તર્હિતે દેવે પરિવારાન્વિતે શિવે ।
ધનુઃ શરરથાદ્યૈશ્ચ પ્રાકારોઽન્તર્દ્ધિમાગમત્ ॥ ૩૬॥

તતો બ્રહ્મા હરિર્દેવા મુનિગન્ધર્વકિન્નરાઃ ।
નાગાઃ સર્પાશ્ચાપ્સરસઃ સંહૃષ્ટાશ્ચાથ માનુષાઃ ॥ ૩૭॥

સ્વં સ્વં સ્થાનં મુદા જગ્મુઃ શંસન્તઃ શાઙ્કરં યશઃ ।
સ્વં સ્વં સ્થાનમનુપ્રાપ્ય નિર્વૃતિં પરમાં યયુઃ ॥ ૩૮॥

એતત્તે કથિતં સર્વં ચરિતં શશિમૌલિનઃ ।
ત્રિપુરક્ષયસંસૂચિ પરલીલાન્વિતં મહત્ ॥ ૩૯॥

ધન્યં યશસ્યમાયુષ્યં ધનધાન્યપ્રવર્દ્ધકમ્ ।
સ્વર્ગદં મોક્ષદં ચાપિ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૪૦॥

ઇદં હિ પરમાખ્યાનં યઃ પઠેચ્છૃણુયાત્સદા ।
ઇહ ભુક્ત્વાખિલાન્કામાન્ અન્તે મુક્તિમવાપ્નુયાત્ ॥ ૪૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે સનત્કુમારપારાશર્યસંવાદે ત્રિપુરવધાનન્તરદેવસ્તુતિમયસ્તુતિમુણ્ડિનિવેશનદેવસ્વસ્થાનગમનવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૨.૫.૧૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૧૩. ત્રયોદશોઽધ્યાયઃ । જલન્ધરવધોપાખ્યાને શક્રજીવનમ્ ।

વ્યાસ ઉવાચ ।
ભો બ્રહ્મન્ભગવન્પૂર્વં શ્રુતં મે બ્રહ્મપુત્રક ।

જલન્ધરં મહાદૈત્યમવધીચ્છઙ્કરઃ પ્રભુઃ ॥ ૧॥

તત્ત્વં વદ મહાપ્રાજ્ઞ ચરિતં શશિમૌલિનઃ ।
વિસ્તારપૂર્વકં શ‍ृણ્વન્કસ્તૃપ્યેત્તદ્યશોઽમલમ્ ॥ ૨॥

સૂત ઉવાચ ।
ઇત્યેવં વ્યાસસમ્પૃષ્ટો બ્રહ્મપુત્રો મહામુનિઃ ।
ઉવાચાર્થવદવ્યગ્રં વાક્યં વાક્યવિશારદઃ ॥ ૩॥

સનત્કુમાર ઉવાચ ।
એકદા જીવશક્રૌ ચ ભક્ત્યા પરમયા મુને ।
દર્શનં કર્તુમીશસ્ય કૈલાસં જગ્મતુર્ભૃશમ્ ॥ ૪॥

અથ ગુર્વિન્દ્રયોર્જ્ઞાત્વાઽઽગમનં શઙ્કરઃ પ્રભુઃ ।
પરીક્ષિતું તયોર્જ્ઞાનં સ્વદર્શનરતાત્મનોઃ ॥ ૫॥

દિગમ્બરોઽથ તન્માર્ગમારુદ્ધ્ય સદ્ગતિઃ સતામ્ ।
જટાબદ્ધેન શિરસાતિષ્ઠત્સંશોભિતાનનઃ ॥ ૬॥

અથ તૌ ગુરુશક્રૌ ચ કુર્વન્તૌ ગમનં મુદા ।
આલોક્ય પુરુષં ભીમં માર્ગમધ્યેઽદ્ભુતાકૃતિમ્ ॥ ૭॥

મહાતેજસ્વિનં શાન્તં જટાસમ્બદ્ધમસ્તકમ્ ।
મહાબાહું મહોરસ્કં ગૌરં નયનભીષણમ્ ॥ ૬॥

અથો પુરન્દરોઽપૃચ્છત્સ્વાધિકારેણ દુર્મદઃ ।
પુરુષં તં સ્વમાર્ગાન્તઃ સ્થિતમજ્ઞાય શઙ્કરમ્ ॥ ૯॥

પુરન્દર ઉવાચ ।
કસ્ત્વં ભોઃ કુત આયાતઃ કિં નામ વદ તત્ત્વતઃ ।
સ્વસ્થાને સંસ્થિતઃ શમ્ભુઃ કિં વાન્યત્ર ગતઃ પ્રભુઃ ॥ ૧૦॥

સનત્કુમાર ઉવાચ ।
શક્રેણેત્થં સ પૃષ્ટસ્તુ કિઞ્ચિન્નોવાચ તાપસઃ ।
શક્રઃ પુનરપૃચ્છદ્વૈ નોવાચ સ દિગમ્બરઃ ॥ ૧૧॥

પુનઃ પુરન્દરોઽપૃચ્છલ્લોકાનામધિપેશ્વરઃ ।
તૂષ્ણીમાસ મહાયોગી લીલારૂપધરઃ પ્રભુઃ ॥ ૧૨॥

ઇત્થં પુનઃ પુનઃ પૃષ્ટઃ શક્રેણ સ દિગમ્બરઃ ।

નોવાચ કિઞ્ચિદ્ભગવાન્ શક્રજ્ઞાનપરીક્ષયા ॥ ૧૩॥

અથ ચુક્રોધ દેવેશસ્ત્રૈલોક્યૈશ્વર્યગર્વિતઃ ।
ઉવાચ વચનં ચૈવ તં નિર્ભર્ત્સ્ય જટાધરમ્ ॥ ૧૪॥

ઇન્દ્ર ઉવાચ ।
રે મયા પૃચ્છ્યમાનોઽપિ નોત્તરં દત્તવાનસિ ।
અતસ્ત્વાં હન્મિ વજ્રેણ કસ્તે ત્રાતાસ્તિ દુર્મતે ॥ ૧૫॥

સનત્કુમાર ઉવાચ ।
ઇત્યુદીર્ય તતો વજ્રી સન્નિરીક્ષ્ય ક્રુધા હિ તમ્ ।
હન્તું દિગમ્બરં વજ્રમુદ્યતં સ ચકાર હ ॥ ૧૬॥

પુરન્દરં વજ્રહસ્તં દૃષ્ટ્વા દેવસ્સદાશિવઃ ।
ચકાર સ્તમ્ભનં તસ્ય વજ્રપાતસ્ય શઙ્કરઃ ॥ ૧૭॥

તતો રુદ્રઃ ક્રુધાવિષ્ટઃ કરાલાક્ષો ભયઙ્કરઃ ।
દ્રુતમેવ પ્રજજ્વાલ તેજસા પ્રદહન્નિવ ॥ ૧૮॥

બાહુપ્રતિષ્ટમ્ભભુવા મન્યુનાન્તઃ શચીપતિઃ ।
સમદહ્યત ભોગીવ મન્ત્રરુદ્ધપરાક્રમઃ ॥ ૧૯॥

દૃષ્ટ્વા બૃહસ્પતિસ્તૂર્ણં પ્રજ્વલન્તં સ્વતેજસા ।
પુરુષં તં ધિયા જ્ઞાત્વા પ્રણનામ હરં પ્રભુમ્ ॥ ૨૦॥

કૃતાઞ્જલિપુટો ભૂત્વા તતો ગુરુરુદારધીઃ ।
નત્વા ચ દણ્ડવદ્ભૂમૌ પ્રભું સ્તોતું પ્રચક્રમે ॥ ૨૧॥

ગુરુરુવાચ ।
નમો દેવાધિદેવાય મહાદેવાય ચાત્મને ।
મહેશ્વરાય પ્રભવે ત્ર્યમ્બકાય કપર્દિને ॥ ૨૨॥

દીનનાથાય વિભવે નમોઽન્ધકનિષૂદિને ।
ત્રિપુરઘ્નાય શર્વાય બ્રહ્મણે પરમેષ્ઠિને ॥ ૨૩॥

વિરૂપાક્ષાય રુદ્રાય બહુરૂપાય શમ્ભવે ।
વિરૂપાયાતિરૂપાય રૂપાતીતાય તે નમઃ ॥ ૨૪॥

યજ્ઞવિધ્વંસકર્ત્રે ચ યજ્ઞાનાં ફલદાયિને ।
નમસ્તે મખરૂપાય પરકર્મપ્રવર્તિને ॥ ૨૫॥

કાલાન્તકાય કાલાય કાલભોગિધરાય ચ ।
નમસ્તે પરમેશાય સર્વત્ર વ્યાપિને નમઃ ॥ ૨૬॥

નમો બ્રહ્મશિરોહન્ત્રે બ્રહ્મચન્દ્ર સ્તુતાય ચ ।
બ્રહ્મણ્યાય નમસ્તેઽસ્તુ નમસ્તે પરમાત્મને ॥ ૨૭॥

ત્વમગ્નિરનિલો વ્યોમ ત્વમેવાપો વસુન્ધરા ।
ત્વં સૂર્યશ્ચન્દ્રમા ભાનિ જ્યોતિશ્ચક્રં ત્વમેવ હિ ॥ ૨૮॥

ત્વમેવ વિષ્ણુસ્ત્વં બ્રહ્મા તત્સ્તુતસ્ત્વં પરેશ્વરઃ ।
મુનયઃ સનકાદ્યાસ્ત્વં નારદસ્ત્વં તપોધનઃ ॥ ૨૯॥

ત્વમેવ સર્વલોકેશસ્ત્વમેવ જગદાત્મકઃ ।
સર્વાન્વયઃ સર્વભિન્નસ્ત્વમેવ પ્રકૃતેઃ પરઃ ॥ ૩૦॥

ત્વં વૈ સૃજસિ લોકાંશ્ચ રજસા વિધિનામભાક્ ।
સત્ત્વેન હરિરૂપસ્ત્વં સકલં યાસિ વૈ જગત્ ॥ ૩૧॥

ત્વમેવાસિ મહાદેવ તમસા હરરૂપધૃક્ ।
લીલયા ભુવનં સર્વં નિખિલં પાઞ્ચભૌતિકમ્ ॥ ૩૨॥

ત્વદ્ધ્યાનબલતઃસૂર્યસ્તપતે વિશ્વભાવન ।
અમૃતં ચ્યવતે લોકે શશી વાતિ સમીરણઃ ॥ ૩૩॥

ત્વદ્ધ્યાનબલતો મેઘાશ્ચામ્બુ વર્ષન્તિ શઙ્કર ।
ત્વદ્ધ્યાનબલતઃ શક્રસ્ત્રિલોકીં પાતિ પુત્રવત્ ॥ ૩૪॥

ત્વદ્ધ્યાનબલતો મેઘાઃ સર્વે દેવા મુનીશ્વરાઃ ।
સ્વાધિકારં ચ કુર્વન્તિ ચકિતા ભવતો ભયાત્ ॥ ૩૫॥

ત્વત્પાદકમલસ્યૈવ સેવનાદ્ભુવિ માનવાઃ ।
નાદ્રિયન્તે સુરાન્ રુદ્ર લોકૈશ્વર્યં ચ ભુઞ્જતે ॥ ૩૬॥

ત્વત્પાદકમલસ્યૈવ સેવનાદગમન્પરામ્ ।
ગતિં યોગધનાનામપ્યગમ્યાં સર્વદુર્લભામ્ ॥ ૩૭॥

સનત્કુમાર ઉવાચ ।
બૃહસ્પતિરિતિ સ્તુત્વા શઙ્કરં લોકશઙ્કરમ્ ।
પાદયોઃ પાતયામાસ તસ્યેશસ્ય પુરન્દરમ્ ॥ ૩૮॥

પાતયિત્વા ચ દેવેશમિન્દ્રં નતશિરોધરમ્ ।

બૃહસ્પતિરુવાચેદં પ્રશ્રયાવનતશ્શિવમ્ ॥ ૩૯॥

બૃહસ્પતિરુવાચ ।
દીનાનાથ મહાદેવ પ્રણતં તવ પાદયોઃ ।
સમુદ્ધર ચ શાન્તં સ્વં ક્રોધં નયનજં કુરુ ॥ ૪૦॥

તુષ્ટો ભવ મહાદેવ પાહીન્દ્રં શરણાગતમ્ ।
અગ્નિરેષ શમં યાતુ ભાલનેત્રસમુદ્ભવઃ ॥ ૪૧॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય ગુરોર્વાક્યં દેવદેવો મહેશ્વરઃ ।
ઉવાચ કરુણાસિન્ધુર્મેઘનિર્હ્રાદયા ગિરા ॥ ૪૨॥

મહેશ્વર ઉવાચ ।
ક્રોધં ચ નિસ્સૃતં નેત્રાદ્ધારયામિ બૃહસ્પતે ।
કથં હિ કઞ્ચુકીં સર્પઃ સન્ધત્તે નોજ્ઝિતાં પુનઃ ॥ ૪૩॥

સનત્કુમાર ઉવાચુ
ઇતિ શ્રુત્વા વચસ્તસ્ય શઙ્કરસ્ય બૃહસ્પતિઃ ॥

ઉવાચ ક્લિષ્ટરૂપશ્ચ ભયવ્યાકુલમાનસઃ । ૪૪॥

બૃહસ્પતિરુવાચ ।
હે દેવ ભગવન્ભક્તા અનુકમ્પ્યાઃ સદૈવ હિ ।
ભક્તવત્સલનામેતિ ત્વં સત્યં કુરુ શઙ્કર ॥ ૪૫॥

ક્ષેમુમન્યત્ર દેવેશ સ્વતેજોઽત્યુગ્રમર્હસિ ।
ઉદ્ધર્તઃ સર્વભક્તાનાં સમુદ્ધર પુરન્દરમ્ ॥ ૪૬॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તો ગુરુણા રુદ્રો ભક્તવત્સલનામભાક્ ।
પ્રત્યુવાચ પ્રસન્નાત્મા સુરેજ્યં પ્રણતાર્ત્તિહા ॥ ૪૭॥

શિવ ઉવાચ ।
પ્રીતઃ સ્તુત્યાનયા તાત દદામિ વરમુત્તમમ્ ।
ઇન્દ્રસ્ય જીવદાનેન જીવેતિ ત્વં પ્રથાં વ્રજ ॥ ૪૮॥

સમુદ્ભૂતોઽનલો યોઽયં ભાલનેત્રાત્સુરેશહા ।
એનં ત્યક્ષ્યામ્યહં દૂરે યથેન્દ્રં નૈવ પીડયેત્ ॥ ૪૯॥

સનત્કુમાર ઉવાચ્ ।
ઇત્યુક્ત્વા તં કરે ધૃત્વા સ્વતેજોઽનલમદ્ભુતમ્ ॥

ભાલનેત્રાત્સમુદ્ભૂતં પ્રાક્ષિપલ્લવણામ્ભસિ । ૫૦॥

તતશ્ચાન્તર્દધે રુદ્રો મહાલીલાકરઃ પ્રભુઃ ।
ગુરુશક્રૌ ભયાન્મુક્તૌ જગ્મતુઃ સુખમુત્તમમ્ ॥ ૫૧॥

યદર્થં ગમનોદ્યુક્તૌ દર્શનં પ્રાપ્ય તસ્ય વૈ ।
કૃતાર્થૌ ગુરુશક્રૌ હિ સ્વસ્થાનં જગ્મતુર્મુદા ॥ ૫૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધોપાખ્યાને શક્રજીવનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૨.૫.૧૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૧૪. ચતુર્દશોઽધ્યાયઃ । જલન્ધરવધોપાખ્યાને જલન્ધરોત્પત્તિવિવાહવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ બ્રહ્મપુત્ર નમોઽસ્તુ તે ।
શ્રુતેયમદ્ભુતા મેઽદ્ય કથા શમ્ભોર્મહાત્મનઃ ॥ ૧॥

ક્ષિપ્તે સ્વતેજસિ બ્રહ્મન્ભાલનેત્રસમુદ્ભવે ।
લવણામ્ભસિ કિં તાતાભવત્તત્ર વદાશુ તત્ ॥ ૨॥

સનત્કુમાર ઉવાચ ।
શૃણુ તાત મહાપ્રાજ્ઞ શિવલીલાં મહાદ્ભુતામ્ ।
યચ્છ્રુત્વા શ્રદ્ધયા ભક્તો યોગિનાં ગતિમાપ્નુયાત્ ॥ ૩॥

અથો શિવસ્ય તત્તેજો ભાલનેત્રસમુદ્ભવમ્ ।
ક્ષિપ્તં ચ લવણામ્ભોધૌ સદ્યો બાલત્વમાપ હ ॥ ૪॥

તત્ર વૈ સિન્ધુગઙ્ગાયાઃ સાગરસ્ય ચ સઙ્ગમે ।
રુરોદોચ્ચૈઃ સ વૈ બાલઃ સર્વલોકભયઙ્કરઃ ॥ ૫॥

રુદતસ્તસ્ય શબ્દેન પ્રાકમ્પદ્ધરણી મુહુઃ ।

સ્વર્ગશ્ચ સત્યલોકશ્ચ તત્સ્વનાદ્ બધિરીકૃતઃ ॥ ૬॥

બાલસ્ય રોદનેનૈવ સર્વે લોકાશ્ચ તત્રસુઃ ।
સર્વતો લોકપાલાશ્ચ વિહ્વલીકૃતમાનસાઃ ॥ ૭॥

કિં બહૂક્તેન વિપ્રેન્દ્ર ચચાલ સચરાચરમ્ ।
ભુવનં નિખિલં તાત રોદનાત્તચ્છિશોર્વિભો ॥ ૮॥

અથ તે વ્યાકુલાઃ સર્વે દેવાઃ સમુનયો દ્રુતમ્ ।
પિતામહં લોકગુરું બ્રહ્માણં શરણં યયુઃ ॥ ૯॥

તત્ર ગત્વા ચ તે દેવા મુનયશ્ચ સવાસવાઃ ।
પ્રણમ્ય ચ સુસંસ્તુત્ય પ્રોચુસ્તં પરમેષ્ઠિનમ્ ॥ ૧૦॥

દેવા ઊચુઃ ।
લોકાધીશ સુરાધીશ ભયં નઃ સમુપસ્થિતમ્ ।
તન્નાશય મહાયોગિન્ જાતોઽયં હ્યદ્ભુતો રવઃ ॥ ૧૧॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં બ્રહ્મા લોકપિતામહઃ ॥

ગન્તુમૈચ્છત્તતસ્તત્ર કિમેતદિતિ વિસ્મિતઃ । ૧૨॥

તતો બ્રહ્મા સુરૈસ્તાતાવતરત્સત્યલોકતઃ ।
રસાં તજ્જ્ઞાતુમિચ્છન્સ સમુદ્રમગમત્તદા ॥ ૧૩॥

યાવત્તત્રાગતો બ્રહ્મા સર્વલોકપિતામહઃ ।
તાવત્સમુદ્રસ્યોત્સઙ્ગે તં બાલં સ દદર્શ હ ॥ ૧૪॥

આગતં વિધિમાલોક્ય દેવરૂપ્યથ સાગરઃ ।
પ્રણમ્ય શિરસા બાલં તસ્યોત્સઙ્ગે ન્યવેશયત્ ॥ ૧૫॥

તતો બ્રહ્માબ્રવીદ્વાક્યં સાગરં વિસ્મયાન્વિતઃ ।
જલરાશે દ્રુતં બ્રૂહિ કસ્યાયં શિશુરદ્ભુતઃ ॥ ૧૬॥

સનત્કુમાર ઉવાચ ।
બ્રહ્મણો વાક્યમાકર્ણ્ય મુદિતઃ સાગરસ્તદા ।
પ્રત્યુવાચ પ્રજેશં સ નત્વા સ્તુત્વા કૃતાઞ્જલિઃ ॥ ૧૭॥

સમુદ્ર ઉવાચ ।
ભો ભો બ્રહ્મન્મયા પ્રાપ્તો બાલકોઽયમજાનતા ।

પ્રભવં સિન્ધુગઙ્ગાયામકસ્માત્સર્વલોકપ ॥ ૧૮॥

જાતકર્માદિસંસ્કારાન્કુરુષ્વાસ્ય જગદ્ગુરો ।
જાતકોક્તફલં સર્વં વિધાતર્વક્તુમર્હસિ ॥ ૧૯॥

સનત્કુમાર ઉવાચ ।
એવં વદતિ પાથોધૌ સ બાલઃ સાગરાત્મજઃ ।
બ્રહ્માણમગ્રહીત્કણ્ઠે વિધુન્વન્તં મુહુર્મુહુઃ ॥ ૨૦॥

વિધૂનનં ચ તસ્યૈવં સર્વલોકકૃતો વિધેઃ ।
પીડિતસ્ય ચ કાલેય નેત્રાભ્યામગમજ્જલમ્ ॥ ૨૧॥

કરાભ્યામબ્ધિજાતસ્ય તત્સુતસ્ય મહૌજસઃ ।
કથઞ્ચિન્મુક્તકણ્ઠસ્તુ બ્રહ્મા પ્રોવાચ સાદરમ્ ॥ ૨૨॥

બ્રહ્મોવાચ ।
શ‍ૃણુ સાગર વક્ષ્યામિ તવાસ્ય તનયસ્ય હિ ।
જાતકોક્તફલં સર્વં સમાધાનરતઃ ખલુ ॥ ૨૩॥

નેત્રાભ્યાં વિધૃતં યસ્માદનેનૈવ જલં મમ ।
તસ્માજ્જલન્ધરેતીહ ખ્યાતો નામ્ના ભવત્વસૌ ॥ ૨૪॥

અધુનૈવૈષ તરુણઃ સર્વશાસ્ત્રાર્થપારગઃ ।
મહાપરાક્રમો ધીરો યોદ્ધા ચ રણદુર્મદઃ ॥ ૨૫॥

ભવિષ્યતિ ચ ગમ્ભીરઃ ત્વં યથા સમરે ગુહઃ ।
સર્વજેતા ચ સઙ્ગ્રામે સર્વસમ્પદ્ભિરાજિતઃ ॥ ૨૬॥

દૈત્યાનામધિપો બાલઃ સર્વેષાં ચ ભવિષ્યતિ ।
વિષ્ણોરપિ ભવેજ્જેતા ન કુતશ્ચિત્પરાભવઃ ॥ ૨૭॥

અવધ્યઃ સર્વભૂતાનાં વિના રુદ્રં ભવિષ્યતિ ।
યત એષ સમુદ્ભૂતસ્તત્રેદાનીં ગમિષ્યતિ ॥ ૨૮॥

પતિવ્રતાસ્ય ભવિતા પત્ની સૌભાગ્યવર્દ્ધિની ।
સર્વાઙ્ગસુન્દરી રમ્યા પ્રિયવાક્છીલસાગરા ॥ ૨૯॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા શુક્રમાહૂય રાજ્યે તં ચાભ્યષેચયત્ ।
આમન્ત્ર્ય સરિતાં નાથં બ્રહ્માન્તર્દ્ધાનમન્વગાત્ ॥ ૩૦॥

અથ તદ્દર્શનોત્ફુલ્લનયનઃ સાગરસ્તદા ।
તમાત્મજં સમાદાય સ્વગેહમગમન્મુદા ॥ ૩૧॥

અપોષયન્મહોપાયૈઃ સ્વબાલં મુદિતાત્મકઃ ।
સર્વાઙ્ગસુન્દરં રમ્યં મહાદ્ભુતસુતેજસમ્ ॥ ૩૨॥

અથામ્બુધિઃ સમાહૂય કાલનેમિં મહાસુરમ્ ।
વૃન્દાભિધાં સુતાં તસ્ય તદ્ભાર્યાર્થમયાચત ॥ ૩૩॥

કાલનેમ્યસુરો વીરોઽસુરાણાં પ્રવરઃ સુધીઃ ।
સાધુ મેનેમ્બુધેર્યાચ્ઞાં સ્વકર્મનિપુણો મુને ॥ ૩૪॥

જલન્ધરાય વીરાય સાગરપ્રભવાય ચ ।
દદૌ બ્રહ્મવિધાનેન સ્વસુતાં પ્રાણવલ્લભામ્ ॥ ૩૫॥

તદોત્સવો મહાનાસીદ્વિવાહે ચ તયોસ્તદા ।
સુખં પ્રાપુર્નદા નદ્યોઽસુરાશ્ચૈવાખિલા મુને ॥ ૩૬॥

સમુદ્રોઽતિ સુખં પ્રાપ સુતં દૃષ્ટ્વા હિ સસ્ત્રિયમ્ ।
દાનં દદૌ દ્વિજાતિભ્યોઽપ્યન્યેભ્યશ્ચ યથાવિધિ ॥ ૩૭॥

યે દેવૈર્નિર્જિતાઃ પૂર્વં દૈત્યાઃ પાતાલસંસ્થિતાઃ ।
તે હિ ભૂમણ્ડલં યાતા નિર્ભયાઃ તમુપાશ્રિતાઃ ॥ ૩૮॥

તે કાલનેમિપ્રમુખાસ્તતોઽસુરાઃ
તસ્મૈ સુતાં સિન્ધુસુતાય દત્ત્વા ।
બભૂવુરત્યન્તમુદાન્વિતા હિ
તમાશ્રિતા દેવવિનિર્જયાય ॥ ૩૯॥

સ ચાપિ વીરોઽમ્બુધિબાલકોઽસૌ
જલન્ધરાખ્યોઽસુરવીરવીરઃ ।
સમ્પ્રાપ્ય ભાર્યામતિસુન્દરીં વશી
ચકાર રાજ્યં હિ કવિપ્રભાવાત્ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધોપાખ્યાને જલન્ધરોત્પત્તિવિવાહવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૨.૫.૧૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૧૫. પઞ્ચદશોઽધ્યાયઃ । જલન્ધરવધોપાખ્યાને દેવજલન્ધરયુદ્ધવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
એકદા વારિધિસુતો વૃન્દાપતિરુદારધીઃ ।
સભાર્યઃ સંસ્થિતો વીરોઽસુરૈઃ સર્વૈઃ સમન્વિતઃ ॥ ૧॥

તત્રાજગામ સુપ્રીતઃ સુવર્ચાસ્ત્વથ ભાર્ગવઃ ।
તેજઃ પુઞ્જો મૂર્ત ઇવ ભાસયન્સકલા દિશઃ ॥ ૨॥

તં દૃષ્ટ્વા ગુરુમાયાન્તમસુરાસ્તેઽખિલા દ્રુતમ્ ।
પ્રણેમુઃ પ્રીતમનસઃ સિન્ધુપુત્રોઽપિ સાદરમ્ ॥ ૩॥

દત્ત્વાશીર્વચનં તેભ્યો ભાર્ગવસ્તેજસાં નિધિઃ ।
નિષસાદાસને રમ્યે સન્તસ્થુસ્તેઽપિ પૂર્વવત્ ॥ ૪॥

અથ સિન્ધ્વાત્મજો વીરો દૃષ્ટ્વા પ્રીત્યા નિજાં સભામ્ ।
જલન્ધરઃ પ્રસન્નોઽભૂદનષ્ટવરશાસનઃ ॥ ૫॥

તત્સ્થિતં છિન્નશિરસં દૃષ્ટ્વા રાહું સ દૈત્યરાટ્ ।
પપ્રચ્છ ભાર્ગવં શીઘ્રમિદં સાગરનન્દનઃ ॥ ૬॥

જલન્ધર ઉવાચ ।
કેનેદં વિહિતં રાહોઃ શિરશ્છેદનકં પ્રભો ।
તદ્બ્રૂહિ નિખિલં વૃત્તં યથાવત્તત્ત્વતો ગુરો ॥ ૭॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય સિન્ધુપુત્રસ્ય ભાર્ગવઃ ।
સ્મૃત્વા શિવપદામ્ભોજં પ્રત્યુવાચ યથાર્થવત્ ॥ ૮॥

શુક્ર ઉવાચ ।
જલન્ધર મહાવીર સર્વાસુરસહાયક ।
શૃણુ વૃત્તાન્તમખિલં યથાવત્કથયામિ તે ॥ ૯॥

પુરાઽભવદ્ બલિર્વીરો વિરોચનસુતો બલી ।
હિરણ્યકશિપોશ્ચૈવ પ્રપૌત્રો ધર્મવિત્તમ ॥ ૧૦॥

પરાજિતાઃ સુરાસ્તેન રમેશં શરણં યયુઃ ।
સવાસવાઃ સ્વવૃત્તાન્તમાચખ્યુઃ સ્વાર્થસાધકાઃ ॥ ૧૧॥

તદાજ્ઞયાઽસુરૈઃ સાર્દ્ધં ચક્રુઃ સન્ધિમથો સુરાઃ ।
સ્વકાર્યસિદ્ધયે તાત છલકર્મવિચક્ષણાઃ ॥ ૧૨॥

અથામૃતાર્થે સિન્ધોશ્ચ મન્થનં ચક્રુરાદરાત્ ।
વિષ્ણોઃ સહાયિનસ્તે હિ સુરાઃ સર્વેઽસુરૈસ્સહ ॥ ૧૩॥

તતો રત્નોપહરણમકાર્ષુર્દૈત્યશત્રવઃ ।
જગૃહુર્યત્નતો દેવાઃ પપુરપ્યમૃતં છલાત્ ॥ ૧૪॥

તતઃ પરાભવં ચક્રુરસુરાણાં સહાયતઃ ।
વિષ્ણોઃ સુરાઃ સશક્રાસ્તેઽમૃતપાનાદ્બલાન્વિતાઃ ॥ ૧૫॥

શિરશ્છેદં ચકારાસૌ પિબતશ્ચામૃતં હરિઃ ।
રાહોર્દેવસભાયાં વૈ પક્ષપાતી હરેસ્સદા ॥ ૧૬॥

સનત્કુમાર ઉવાચ ।
એવં કવિસ્તસ્ય શિરશ્છેદં રાહોઃ શશંસ ચ ।
અમૃતાર્થે સમુદ્રસ્ય મન્થનં દેવકારિતમ્ ॥ ૧૭॥

રત્નોપહરણં ચૈવ દૈત્યાનાં ચ પરાભવમ્ ।
દેવૈરમૃતપાનં ચ કૃતં સર્વં ચ વિસ્તરાત્ ॥ ૧૮॥

તદાકર્ણ્ય મહાવીરોઽમ્બુધિબાલઃ પ્રતાપવાન્ ।
ચુક્રોધ ક્રોધરક્તાક્ષઃ સ્વપિતુર્મન્થનં તદા ॥ ૧૯॥

અથ દૂતં સમાહૂય ઘસ્મરાભિધમુત્તમમ્ ।
સર્વં શશંસ ચરિતં યદાહ ગુરુરાત્મવાન્ ॥ ૨૦॥

અથ તં પ્રેષયામાસ સ્વદૂતં શક્રસન્નિધૌ ।
સમ્માન્ય બહુશઃ પ્રીત્યાઽભયં દત્ત્વા વિશારદમ્ ॥ ૨૧॥

દૂતસ્ત્રિવિષ્ટપં તસ્ય જગામારમલં સુધીઃ ।
ઘસ્મરોઽમ્બુધિબાલસ્ય સર્વદેવસમન્વિતમ્ ॥ ૨૨॥

તત્ર ગત્વા સ દૂતસ્તુ સુધર્માં પ્રાપ્ય સત્વરમ્ ।
ગર્વાદખર્વમૌલિર્હિ દેવેન્દ્રં વાક્યમબ્રવીત્ ॥ ૨૩॥

ઘસ્મર ઉવાચ ।

જલન્ધરોઽબ્ધિતનયઃ સર્વદૈત્યજનેશ્વરઃ ।
સુપ્રતાપી મહાવીરઃ સ્વયં કવિસહાયવાન્ ॥ ૨૪॥

દૂતોઽહં તસ્ય વીરસ્ય ઘસ્મરાખ્યો ન ઘસ્મરઃ ।
પ્રેષિતસ્તેન વીરેણ ત્વત્સકાશમિહાગતઃ ॥ ૨૫॥

અવ્યાહતાજ્ઞઃ સર્વત્ર જલન્ધર ઉદગ્રધીઃ ।
નિર્જિતાખિલદૈત્યારિઃ સ યદાહ શ‍ૃણુષ્વ તત્ ॥ ૨૬॥

જલન્ધર ઉવાચ ।
કસ્માત્ત્વયા મમ પિતા મથિતઃ સાગરોઽદ્રિણા ।
નીતાનિ સર્વરત્નાનિ પિતુર્મે દેવતાધમ ॥ ૨૭॥

ઉચિતં ન કૃતં તેઽદ્ય તાનિ શીઘ્રં પ્રયચ્છ મે ।
મમાયાહિ વિચાર્યેત્થં શરણં દૈવતૈઃ સહ ॥ ૨૮॥

અન્યથા તે ભયં ભૂરિ ભવિષ્યતિ સુરાધમ ।
રાજ્યવિધ્વંસનં ચૈવ સત્યમેતદ્બ્રવીમ્યહમ્ ॥ ૨૯॥

સનત્કુમાર ઉવાચ ।
ઇતિ દૂતવચઃ શ્રુત્વા વિસ્મિતસ્ત્રિદશાધિપઃ ।
ઉવાચ તં સ્મરન્નિન્દ્રો ભયરોષસમન્વિતઃ ॥ ૩૦॥

અદ્રયો મદ્ભયાત્ ત્રસ્તાઃ સ્વકુક્ષિસ્થા યતઃ કૃતાઃ ।
અન્યેઽપિ મદ્ દ્વિષસ્તેન રક્ષિતા દિતિજાઃ પુરા ॥ ૩૧॥

તસ્માત્તદ્રત્નજાતં તુ મયા સર્વં હૃતં કિલ ।
ન તિષ્ઠતિ મમ દ્રોહી સુખં સત્યં બ્રવીમ્યહમ્ ॥ ૩૨॥

શઙ્ખોઽપ્યેવં પુરા દૈત્યો માં દ્વિષન્સાગરાત્મજઃ ।
અભવન્મૂઢચિત્તસ્તુ સાધુસઙ્ગાત્સમુજ્ઝિતઃ ॥ ૩૩॥

મમાનુજેન હરિણા નિહતઃ સ હિ પાપધીઃ ।
હિંસકઃ સાધુસઙ્ઘસ્ય પાપિષ્ઠઃ સાગરોદરે ॥ ૩૪॥

તદ્ ગચ્છ દૂત શીઘ્રં ત્વં કથયસ્વાસ્ય તત્ત્વતઃ ।
અબ્ધિપુત્રસ્ય સર્વં હિ સિન્ધોર્મન્થનકારણમ્ ॥ ૩૫॥

સનત્કુમાર ઉવાચ ।
ઇત્થં વિસર્જિતો દૂતો ઘસ્મરાખ્યઃ સુબુદ્ધિમાન્ ।

તદેન્દ્રેણાગમત્તૂર્ણં યત્ર વીરો જલન્ધરઃ ॥ ૩૬॥

તદિદં વચનં દૈત્યરાજો હિ તેન ધીમતા ।
કથિતો નિખિલં શક્રપ્રોક્તં દૂતેન વૈ તદા ॥ ૩૭॥

તન્નિશમ્ય તતો દૈત્યો રોષાત્પ્રસ્ફુરિતાધરઃ ।
ઉદ્યોગમકરોત્તૂર્ણં સર્વદેવજિગીષયા ॥ ૩૮॥

તદોદ્યોગેઽસુરેન્દ્રસ્ય દિગ્ભ્યઃ પાતાલતસ્તથા ।
દિતિજાઃ પ્રત્યપદ્યન્તે કોટિશઃ કોટિશસ્તથા ॥ ૩૯॥

અથ શુમ્ભનિશુમ્ભાદ્યૈર્બલાધિપતિકોટિભિઃ ।
નિર્જગામ મહાવીરઃ સિન્ધુપુત્રઃ પ્રતાપવાન્ ॥ ૪૦॥

પ્રાપ ત્રિવિષ્ટપં સદ્યઃ સર્વસૈન્યસમાવૃતઃ ।
દધ્મૌ શઙ્ખં જલધિજો નેદુર્વીરાશ્ચ સર્વતઃ ॥ ૪૧॥

ગત્વા ત્રિવિષ્ટપં દૈત્યો નન્દનાધિષ્ઠિતોઽભવત્ ।
સર્વસૈન્યં સમાવૃત્ય કુર્વાણઃ સિંહવદ્રવમ્ ॥ ૪૨॥

પુરમાવૃત્ય તિષ્ઠત્તદ્ દૃષ્ટ્વા સૈન્યબલં મહત્ ।
નિર્યયુસ્ત્વમરાવત્યા દેવા યુદ્ધાય દંશિતાઃ ॥ ૪૩॥

તતઃ સમભવદ્યુદ્ધં દેવદાનવસેનયોઃ ।
મુસલૈઃ પરિઘૈર્બાણૈર્ગદાપરશુશક્તિભિઃ ॥ ૪૪॥

તેઽન્યોઽન્યં સમધાવેતાં જઘ્નતુશ્ચ પરસ્પરમ્ ।
ક્ષણેનાભવતાં સેને રુધિરૌઘપરિપ્લુતે ॥ ૪૫॥

પતિતૈઃ પાત્યમાનૈશ્ચ ગજાશ્વરથપત્તિભિઃ ।
વ્યરાજત રણે ભૂમિઃ સન્ધ્યાભ્રપટલૈરિવ ॥ ૪૬॥

તત્ર યુદ્ધે મૃતાન્દૈત્યાન્ભાર્ગવસ્તાનજીવયત્ ।
વિદ્યયામૃતજીવિન્યા મન્ત્રિતૈસ્તોયબિન્દુભિઃ ॥ ૪૭॥

દેવાનપિ તથા યુદ્ધે તત્રાજીવયદઙ્ગિરાઃ ।
દિવ્યૌષધૈઃ સમાનીય દ્રોણાદ્રેઃ સ પુનઃ પુનઃ ॥ ૪૮॥

દૃષ્ટ્વાન્સ તથા યુદ્ધે પુનરેવ સમુત્થિતાન્ ।
જલન્ધરઃ ક્રોધવશો ભાર્ગવં વાક્યમબ્રવીત્ ॥ ૪૯॥

જલન્ધર ઉવાચ ।
મયા દેવા હતા યુદ્ધે ઉત્તિષ્ઠન્તિ કથં પુનઃ ।
ત્વત્તઃ સઞ્જીવિની વિદ્યા નૈવાન્યત્રેતિ વૈ શ્રુતા ॥ ૫૦॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય સિન્ધુપુત્રસ્ય ભાર્ગવઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા ગુરુઃ શુક્રો જલન્ધરમ્ ॥ ૫૧॥

શુક્ર ઉવાચ ।
દિવ્યૌષધીઃ સમાનીય દ્રોણાદ્રેરઙ્ગિરાઃ સુરાન્ ।
જીવયત્યેષ વૈ તાત સત્યં જાનીહિ મે વચઃ ॥ ૫૨॥

જયમિચ્છસિ ચેત્તાત શૃણુ મે વચનં શુભમ્ ।
તતઃ સોઽરં ભુજાભ્યાં ત્વં દ્રોણમબ્ધાવુપાહર ॥ ૫૩॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તઃ સ તુ દૈત્યેન્દ્રો ગુરુણા ભાર્ગવેણ હ ।
દ્રુતં જગામ યત્રાસાવાસ્તે ચૈવાદ્રિરાટ્ ચ સઃ ॥ ૫૪॥

ભુજાભ્યાં તરસા દૈત્યો નીત્વા દ્રોણં ચ તં તદા ।
પ્રાક્ષિપત્સાગરે તૂર્ણં ચિત્રં ન હરતેજસિ ॥ ૫૫॥

પુનરાયાન્મહાવીરસ્સિન્ધુપુત્રો મહાહવમ્ ।
જઘાનાસ્ત્રૈશ્ચ વિવિધૈઃ સુરાન્કૃત્વા બલં મહત્ ॥ ૫૬॥

અથ દેવાન્હતાન્દૃષ્ટ્વા દ્રોણાદ્રિમગમદ્ ગુરુઃ ।
તાવત્તત્ર ગિરીદ્રં તં ન દદર્શ સુરાર્ચિતઃ ॥ ૫૭॥

જ્ઞાત્વા દૈત્યહૃતં દ્રોણં ધિષણો ભયવિહ્વલઃ ।
આગત્ય દેવાન્પ્રોવાચ જીવો વ્યાકુલમાનસઃ ॥ ૫૮॥

ગુરુરુવાચ ।
પલાયધ્વં સુરાઃ સર્વે દ્રોણો નાસ્તિ ગિરિર્મહાન્ ।
ધ્રુવં ધ્વસ્તશ્ચ દૈત્યેન પાથોધિતનયેન હિ ॥ ૫૯॥

જલન્ધરો મહાદૈત્યો નાયં જેતું ક્ષમો યતઃ ।
રુદ્રાંશસમ્ભવો હ્યેષ સર્વામરવિમર્દનઃ ॥ ૬૦॥

મયા જ્ઞાતઃ પ્રભાવોઽસ્ય યથોત્પન્નઃ સ્વયં સુરાઃ ।

શિવાપમાનકૃચ્છક્રચેષ્ટિતં સ્મરતાખિલમ્ ॥ ૬૧॥

સનત્કુમાર ઉવાચ ।
શ્રુત્વા તદ્વચનં દેવાઃસુરાચાર્યપ્રકીર્તિતમ્ ।
જયાશાં ત્યક્તવન્તસ્તે ભયવિહ્વલિતાસ્તથા ॥ ૬૨॥

દૈત્યરાજેન તેનાતિહન્યમાનાઃ સમન્તતઃ ।
ધૈર્યં ત્યક્ત્વાઽપલાયન્ત દિશો દશ સવાસવાઃ ॥ ૬૩॥

દેવાન્વિદ્રાવિતાન્દૃષ્ટ્વા દૈત્યઃ સાગરનન્દનઃ ।
શઙ્ખભેરીજયરવૈઃ પ્રવિવેશામરાવતીમ્ ॥ ૬૪॥

પ્રવિષ્ટે નગરીં દૈત્યે દેવાઃ શક્રપુરોગમાઃ ।
સુવર્ણાદ્રિગુહાં પ્રાપ્તા ન્યવસન્દૈત્યતાપિતાઃ ॥ ૬૫॥

તદૈવ સર્વેષ્વસુરોઽધિકારે-
ષ્વિન્દ્રાદિકાનાં વિનિવેશ્ય સમ્યક્ ।
શુમ્ભાદિકાન્દૈત્યવરાન્ પૃથક્પૃથક્
સ્વયં સુવર્ણાદ્રિગુહાં વ્યગાન્મુને ॥ ૬૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધોપાખ્યાને દેવજલન્ધરયુદ્ધવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૨.૫.૧૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૧૬. ષોડશોઽધ્યાયઃ । દેવયુદ્ધવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
પુનર્દૈત્યં સમાયાન્તં દૃષ્ટ્વા દેવાઃ સવાસવાઃ ।
ભયાત્પ્રકમ્પિતાઃ સર્વે સહૈવાદુદ્રુવુર્દ્રુતમ્ ॥ ૧॥

વૈકુણ્ઠં પ્રયયુઃ સર્વે પુરસ્કૃત્ય પ્રજાપતિમ્ ।
તુષ્ટુવુસ્તે સુરા નત્વા સપ્રજાપતયોઽખિલાઃ ॥ ૨॥

દેવા ઊચુઃ ।

હૃષીકેશ મહાબાહો ભગવન્ મધુસૂદન ।
નમસ્તે દેવદેવેશ સર્વદૈત્યવિનાશક ॥ ૩॥

મત્સ્યરૂપાય તે વિષ્ણો વેદાન્નીતવતે નમઃ ।
સત્યવ્રતેન સદ્રાજ્ઞા પ્રલયાબ્ધિવિહારિણે ॥ ૪॥

કુર્વાણાનાં સુરાણાં ચ મથનાયોદ્યમં ભૃશમ્ ।
બિભ્રતે મન્દરગિરિં કૂર્મરૂપાય તે નમઃ ॥ ૫॥

નમસ્તે ભગવન્નાથ ક્રતવે સૂકરાત્મને ।
વસુન્ધરાં જનાધારાં મૂર્દ્ધતો બિભ્રતે નમઃ ॥ ૬॥

વામનાય નમસ્તુભ્યમુપ્રેન્દ્રાખ્યાય વિષ્ણવે ।
વિપ્રરૂપેણ દૈત્યેન્દ્રં બલિં છલયતે વિભો ॥ ૭॥

નમઃ પરશુરામાય ક્ષત્રનિઃ ક્ષત્રકારિણે ।
માતુર્હિતકૃતે તુભ્યં કુપિતાયાસતાં દ્રુહે ॥ ૮॥

રામાય લોકરામાય મર્યાદાપુરુષાય તે ।
રાવણાન્તકરાયાશુ સીતાયાઃ પતયે નમઃ ॥ ૯॥

નમસ્તે જ્ઞાનગૂઢાય કૃષ્ણાય પરમાત્મને ।
રાધાવિહારશીલાય નાનાલીલાકરાય ચ ॥ ૧૦॥

નમસ્તે ગૂઢદેહાય વેદનિન્દાકરાય ચ ।
યોગાચાર્યાય જૈનાય બૌદ્ધરૂપાય માપતે ॥ ૧૧॥

નમસ્તે કલ્કિરૂપાય મ્લેચ્છાનામન્તકારિણે ।
અનન્તશક્તિરૂપાય સદ્ધર્મસ્થાપનાય ચ ॥ ૧૨॥

નમઃ કપિલરૂપાય દેવહૂત્યૈ મહાત્મને ।
વદતે સાઙ્ખ્યયોગં ચ સાઙ્ખ્યાચાર્યાય વૈ પ્રભો ॥ ૧૩॥

નમઃ પરમહંસાય જ્ઞાનં સંવદતે પરમ્ ।
વિધાત્રે જ્ઞાનરૂપાય યેનાત્મા સમ્પ્રસીદતિ ॥ ૧૪॥

વેદવ્યાસાય વેદાનાં વિભાગં કુર્વતે નમઃ ।
હિતાય સર્વલોકાનાં પુરાણરચનાય ચ ॥ ૧૫॥

એવં મત્સ્યાદિતનુભિર્ભક્તકાર્યોદ્યતાય તે ।
સર્ગસ્થિતિધ્વંસકર્ત્રે નમસ્તે બ્રહ્મણે પ્રભો ॥ ૧૬॥

આર્તિહન્ત્રે સ્વદાસાનાં સુખદાય શુભાય ચ ।
પીતામ્બરાય હરયે તાર્ક્ષ્યયાનાય તે નમઃ ॥
સર્વક્રિયાયૈકકર્ત્રે શરણ્યાય નમો નમઃ । ૧૭॥

દૈત્યસન્તાપિતામર્ત્યદુઃખાદ્રિધ્વંસવજ્રક ।
શેષતલ્પશયાયાર્કચન્દ્રનેત્રાય તે નમઃ ॥ ૧૮॥

કૃપાસિન્ધો રમાનાથ પાહિ નઃ શરણાગતાન્ ।
જલન્ધરેણ દેવાશ્ચ સ્વર્ગાત્સર્વે નિરાકૃતાઃ ॥ ૧૯॥

સૂર્યો નિસ્સારિતઃ સ્થાનાચ્ચન્દ્રો વહ્નિસ્તથૈવ ચ ।
પાતાલાન્નાગરાજશ્ચ ધર્મરાજો નિરાકૃતઃ ॥ ૨૦॥

વિચરન્તિ યથા મર્ત્યાઃ શોભન્તે નૈવ તે સુરાઃ ।
શરણં તે વયં પ્રાપ્તા વધસ્તસ્ય વિચિન્ત્યતામ્ ॥ ૨૧॥

સનત્કુમાર ઉવાચ ।
ઇતિ દીનવચઃ શ્રુત્વા દેવાનાં મધુસૂદનઃ ।
જગાદ કરુણાસિન્ધુર્મેઘનિર્હ્રાદયા ગિરા ॥ ૨૨॥

વિષ્ણુરુવાચ ।
ભયં ત્યજત હે દેવા ગમિષ્યામ્યહમાહવમ્ ।
જલન્ધરેણ દૈત્યેન કરિષ્યામિ પરાક્રમમ્ ॥ ૨૩॥

ઇત્યુક્ત્વા સહસોત્થાય દૈત્યારિઃ ખિન્નમાનસઃ ।
આરોહદ્ગરુડં વેગાત્કૃપયા ભક્તવત્સલઃ ॥ ૨૪॥

ગચ્છન્તં વલ્લભં દૃષ્ટ્વા દેવૈસ્સાર્દ્ધં સમુદ્રજા ।
સાઞ્જલિર્બાષ્પનયના લક્ષ્મીર્વચનમબ્રવીત્ ॥ ૨૫॥

લક્ષ્મ્યુવાચ ।
અહં તે વલ્લભા નાથ ભક્તા યદિ ચ સર્વદા ।
તત્કથં તે મમ ભ્રાતા યુદ્ધે વધ્યઃ કૃપાનિધે ॥ ૨૬॥

વિષ્ણુરુવાચ ।
જલન્ધરેણ દૈત્યેન કરિષ્યામિ પરાક્રમમ્ ।
તૈઃ સંસ્તુતો ગમિષ્યામિ યુદ્ધાય ત્વરિતાન્વિતઃ ॥ ૨૭॥

રુદ્રાંશસમ્ભવત્વાચ્ચ બ્રહ્મણો વચનાદપિ ।
પ્રીત્યા ચ તવ નૈવાયં મમ વધ્યો જલન્ધરઃ ॥ ૨૮॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા ગરુડારૂઢઃ શઙ્ખચક્રગદાસિભૃત્ ।
વિષ્ણુર્વેગાદ્યયૌ યોદ્ધું દેવૈઃ શક્રાદિભિસ્સહ ॥ ૨૯॥

દ્રુતં સ પ્રાપ તત્રૈવ યત્ર દૈત્યો જલન્ધરઃ ।
કુર્વન્ સિંહરવં દેવૈર્જ્વલદ્ભિર્વિષ્ણુતેજસા ॥ ૩૦॥

અથારુણાનુજજવપક્ષવાતપ્રપીડિતાઃ ।
વાત્યાવિવર્તિતા દૈત્યા બભ્રમુઃ ખે યથા ઘનાઃ ॥ ૩૧॥

તતો જલન્ધરો દૃષ્ટ્વા દૈત્યાન્ વાત્યાપ્રપીડિતાન્ ।
ઉદ્ધૃત્ય વચનં ક્રોધાદ્ દ્રુતં વિષ્ણું સમભ્યગાત્ ॥ ૩૨॥

એતસ્મિન્નન્તરે દેવાશ્ચક્રુર્યુદ્ધં પ્રહર્ષિતાઃ ।
તેજસા ચ હરેઃ પુષ્ટા મહાબલસમન્વિતાઃ ॥ ૩૩॥

યુદ્ધોદ્યતં સમાલોક્ય દેવસૈન્યમુપસ્થિતમ્ ।
દૈત્યાનાજ્ઞાપયામાસ સમરે ચાતિદુર્મદાન્ ॥ ૩૪॥

જલન્ધર ઉવાચ ।
ભો ભો દૈત્યવરા યૂયં યુદ્ધં કુરુત દુસ્તરમ્ ।
શક્રાદ્યૈરમરૈરદ્ય પ્રબલૈઃ કાતરૈઃ સદા ॥ ૩૫॥

મૌર્યાસ્તુ લક્ષસઙ્ખ્યાતા ધૌમ્રા હિ શતસઙ્ખ્યકાઃ ।
અસુરાઃ કોટિસઙ્ખ્યાતાઃ કાલકેયાસ્તથૈવ ચ ॥ ૩૬॥

કાલકાનાં દૌર્હૃદાનાં કઙ્કાનાં લક્ષસઙ્ખ્યયા ।
અન્યેઽપિ સ્વબલૈર્યુક્તા વિનિર્યાન્તુ મમાજ્ઞયા ॥ ૩૭॥

સર્વે સજ્જા વિનિર્યાત બહુસેનાભિસંયુતાઃ ।
નાનાશસ્ત્રાસ્ત્રસંયુક્તા નિર્ભયા ગતસંશયાઃ ॥ ૩૮॥

ભો ભો શુમ્ભનિશુમ્ભૌ ચ દેવાન્સમરકાતરાન્ ।
ક્ષણેન સુમહાવીર્યૌ તુચ્છાન્નાશયતં યુવામ્ ॥ ૩૯॥

સનત્કુમાર ઉવાચ ।
દૈત્યા જલન્ધરાજ્ઞપ્તા ઇત્થં યુદ્ધવિશારદાઃ ।

યુયુધુસ્તેઽસુરાઃ સર્વે ચતુરઙ્ગબલાન્વિતાઃ ॥ ૪૦॥

ગદાભિસ્તીક્ષ્ણબાણૈશ્ચ શૂલપટ્ટિશતોમરૈઃ ।
કેચિત્પરશુશૂલૈશ્ચ નિજઘ્નુસ્તે પરસ્પરમ્ ॥ ૪૧॥

નાનાયુધૈઃ પરૈસ્તત્ર નિજઘ્નુસ્તે બલાન્વિતાઃ ।
દેવાસ્તથા મહાવીરા હૃષીકેશબલાન્વિતાઃ ।
યુયુધુસ્તીક્ષ્ણબાણાશ્ચ ક્ષિપન્તઃ સિંહવદ્રવાઃ । ૪૨॥

કેચિદ્બાણૈઃ સુતીક્ષ્ણૈશ્ચ કેચિન્મુસલતોમરૈઃ ।
કેચિત્પરશુશૂલૈશ્ચ નિજઘ્નુસ્તે પરસ્પરમ્ ॥ ૪૩॥

ઇત્થં સુરાણાં દૈત્યાનાં સઙ્ગ્રામઃ સમભૂન્મહાન્ ।
અત્યુલ્બણો મુનીનાં હિ સિદ્ધાનાં ભયકારકઃ ॥ ૪૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધોપાખ્યાને દેવયુદ્ધવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૨.૫.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૧૭. સપ્તદશોઽધ્યાયઃ । જલન્ધરોપાખ્યાને વિષ્ણુજલન્ધરયુદ્ધવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
અથ દૈત્યા મહાવીર્યાઃ શૂલૈઃ પરશુપટ્ટિશૈઃ ।
નિજઘ્નુઃસર્વદેવાંશ્ચ ભયવ્યાકુલમાનસાન્ ॥ ૧॥

દૈત્યાયુધૈઃ સમાવિદ્ધદેહા દેવાઃ સવાસવાઃ ।
રણાદ્વિદુદ્રુવુઃ સર્વે ભયવ્યાકુલમાનસાઃ ॥ ૨॥

પલાયનપરાન્ દૃષ્ટ્વા હૃષીકેશઃ સુરાનથ ।
વિષ્ણુર્વૈ ગરુડારૂઢો યોદ્ધુમભ્યાયયૌ દ્રુતમ્ ॥ ૩॥

સુદર્શનેન ચક્રેણ સર્વતઃ પ્રસ્ફુરન્ રુચા ।
સુશોભિતકરાબ્જશ્ચ રેજે ભક્તાભયઙ્કરઃ ॥ ૪॥

શઙ્ખખડ્ગગદાશાર્ઙ્ગધારી ક્રોધસમન્વિતઃ ।

કઠોરાસ્ત્રો મહાવીરઃ સર્વયુદ્ધવિશારદઃ ॥ ૫॥

ધનુષં શાર્ઙ્ગનામાનં વિસ્ફૂર્ય્ય વિનનાદ હ ।
તસ્ય નાદેન ત્રૈલોક્યં પૂરિતં મહતા મુને ॥ ૬॥

શાર્ઙ્ગનિસ્સૃતબાણૈશ્ચ દિતિજાનાં શિરાંસિ વૈ ।
ચકર્ત્ત ભગવાન્ વિષ્ણુઃ કોટિશો રુટ્સમાકુલઃ ॥ ૭॥

અથારુણાનુજજવપક્ષવાતપ્રપીડિતાઃ ।
વાત્યાવિવર્ત્તિતા દૈત્યા બભ્રમુઃ ખે યથા ઘનાઃ ॥ ૮॥

તતો જલન્ધરો દૃષ્ટ્વા દૈત્યાન્વાત્યાપ્રપીડિતાન્ ।
ચુક્રોધાતિ મહાદૈત્યો દેવવૃન્દભયઙ્કરઃ ॥ ૯॥

મર્દ્દયન્તં ચ તં દૃષ્ટ્વા દૈત્યાન્ પ્રસ્ફુરિતાધરઃ ।
યોદ્ધુમભ્યાયયૌ વીરો વેગેન હરિણા સહ ॥ ૧૦॥

સ ચકાર મહાનાદં દેવાસુરભયઙ્કરમ્ ।
દૈત્યાનામધિપઃ કર્ણા વિદીર્ણાઃ શ્રવણાત્તતઃ ॥ ૧૧॥

ભયંઙ્કરેણ દૈત્યસ્ય નાદેનાપૂરિતં તદા ।
જલન્ધરસ્ય મહતા ચકમ્પે સકલં જગત્ ॥ ૧૨॥

તતઃ સમભવદ્યુદ્ધં વિષ્ણુદૈત્યેન્દ્રયોર્મહત્ ।
આકાશં કુર્વતોર્બાણૈસ્તદા નિરવકાશવત્ ॥ ૧૩॥

તયોશ્ચ તેન યુદ્ધેન પરસ્પરમભૂન્મુને ।
દેવાસુરર્ષિસિદ્ધાનાં ભીકરેણાતિવિસ્મયઃ ॥ ૧૪॥

વિષ્ણુર્દૈત્યસ્ય બાણૌઘૈર્ધ્વજં છત્રં ધનુઃ શરાન્ ।
ચિચ્છેદ તં ચ હૃદયે બાણેનૈકેન તાડયન્ ॥ ૧૫॥

તતો દૈત્યઃ સમુત્પત્ય ગદાપાણિસ્ત્વરાન્વિતઃ ।
આહત્ય ગરુડં મૂર્ધ્નિ પાતયામાસ ભૂતલે ॥ ૧૬॥

વિષ્ણું જઘાન શૂલેન તીક્ષ્ણેન પ્રસ્ફુરદ્રુચા ।
હૃદયે ક્રોધસંયુક્તો દૈત્યઃ પ્રસ્ફુરિતાધરઃ ॥ ૧૭॥

વિષ્ણુર્ગદાં ચ ખડ્ગેન ચિચ્છેદ પ્રહસન્નિવ ।
તં વિવ્યાધ શરૈસ્તીક્ષ્ણૈઃ શાર્ઙ્ગં વિસ્ફૂર્ય દૈત્યહા ॥ ૧૮॥

વિષ્ણુર્જલન્ધરં દૈત્યં ભયદેન શરેણ હ ।
ક્રોધાવિષ્ટોઽતિતીક્ષ્ણેન જઘાનાશુ સુરારિહા ॥ ૧૯॥

આગતં તસ્ય તં બાણં દૃષ્ટ્વા દૈત્યો મહાબલઃ ।
છિત્ત્વા બાણેન વિષ્ણું ચ જઘાન હૃદયે દ્રુતમ્ ॥ ૨૦॥

કેશવોઽપિ મહાબાહું વિક્ષિપ્તમસુરેણ તમ્ ।
શરં તિલપ્રમાણેન ચ્છિત્ત્વા વીરો નનાદ હ ॥ ૨૧॥

પુનર્બાણં સમાધત્ત ધનુષિ ક્રોધવેપિતઃ ।
મહાબલોઽથ બાણેન ચિચ્છેદ સ શિલીમુખમ્ ॥ ૨૨॥

વાસુદેવઃ પુનર્બાણં નાશાય વિબુધદ્વિષઃ ।
ક્રોધેનાધત્ત ધનુષિ સિંહવદ્વિનનાદ હ ॥ ૨૩॥

જલન્ધરોઽથ દૈત્યેન્દ્રઃ કોપાચ્છિન્નાધરો બલી ।
શરેણ સ્વેન શાર્ઙ્ગાખ્યં ધનુશ્ચિચ્છેદ વૈષ્ણવમ્ ॥ ૨૪॥

પુનર્બાણૈઃ સુતીક્ષ્ણૈશ્ચ જઘાન મધુસૂદનમ્ ।
ઉગ્રવીર્યો મહાવીરો દેવાનાં ભયકારકઃ ॥ ૨૫॥

સ ચ્છિન્નધન્વા ભગવાન્ કેશવો લોકરક્ષકઃ ।
જલન્ધરસ્ય નાશાય ચિક્ષેપ સ્વગદાં પરામ્ ॥ ૨૬॥

સા ગદા હરિણા ક્ષિપ્તા જ્વલજ્જ્વલનસન્નિભા ।
અમોઘગતિકા શીઘ્રં તસ્ય દેહે લલાગ હ ॥ ૨૭॥

તયા હતો મહાદૈત્યો ન ચચાલાપિ કિઞ્ચન ।
જલન્ધરો મદોન્મત્તઃ પુષ્પમાલાહતો યથા ॥ ૨૮॥

તતો જલન્ધરઃ ક્રોધી દેવત્રાસકરોઽક્ષિપત્ ।
ત્રિશૂલમનલાકારં હરયે રણદુર્મ્મદઃ ॥ ૨૯॥

અથ વિષ્ણુસ્તત્ત્રિશૂલં ચિચ્છેદ તરસા દ્રુતમ્ ।
નન્દકાખ્યેન ખડ્ગેન સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૩૦॥

છિન્ને ત્રિશૂલે દૈત્યેન્દ્ર ઉત્પ્લુત્ય સહસા દ્રુતમ્ ।
આગત્ય હૃદયે વિષ્ણું જઘાન દૃઢમુષ્ટિના ॥ ૩૧॥

સોઽપિ વિષ્ણુર્મહાવીરોઽવિગણય્ય ચ તદ્વ્યથામ ।
જલન્ધરં ચ હૃદયે જઘાન દૃઢમુષ્ટિના ॥ ૩૨॥

તતસ્તૌ બાહુયુદ્ધેન યુયુધાતે મહાબલૌ ।
બાહુભિર્મુષ્ટિભિશ્ચૈવ જાનુભિર્નાદયન્મહીમ્ ॥ ૩૩॥

એવં હિ સુચિરં યુદ્ધં કૃત્વા તેનાસુરેણ વૈ ।
વિસ્મિતોઽભૂન્મુનિશ્રેષ્ઠ હૃદિ ગ્લાનિમવાપ હ ॥ ૩૪॥

અથ પ્રસન્નો ભગવાન્માયી માયાવિદાં વરઃ ।
ઉવાચ દૈત્યરાજાનં મેઘગમ્ભીરયા ગિરા ॥ ૩૫॥

વિષ્ણુરુવાચ ।
ભો ભો દૈત્યવરશ્રેષ્ઠ ધન્યસ્ત્વં રણદુર્મદઃ ।
મહાયુધવરૈર્યત્ત્વં ન ભીતો હિ મહાપ્રભુઃ ॥ ૩૬॥

એભિરેવાયુધૈરુગ્રૈર્દૈત્યા હિ બહવો હતાઃ ।
મહાજૌ દુર્મદા વીરાશ્છિન્નદેહા મૃતિં ગતાઃ ॥ ૩૭॥

યુદ્ધેન તે મહાદૈત્ય પ્રસન્નોઽસ્મિ મહાન્ભવાન્ ।
ન દૃષ્ટસ્ત્વત્સમો વીરસ્ત્રૈલોક્યે સચરાચરે ॥ ૩૮॥

વરં વરય દૈત્યેન્દ્ર પ્રીતોઽસ્મિ તવ વિક્રમાત્ ।
અદેયમપિ તે દદ્મિ યત્તે મનસિ વર્તતે ॥ ૩૯॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય વિષ્ણોર્માયાવિનો હરેઃ ।
પ્રત્યુવાચ મહાબુદ્ધિર્દૈત્યરાજો જલન્ધરઃ ॥ ૪૦॥

જલન્ધર ઉવાચ ।
યદિ ભાવુક તુષ્ટોઽસિ વરમેતં દદસ્વ મે ।
મદ્ભગિન્યા મયા સાર્દ્ધં મદ્ગેહે સગણો વસ ॥ ૪૧॥

સનત્કુમાર ઉવાચ ।
તદાકર્ણ્ય વચસ્તસ્ય મહાદૈત્યસ્ય ખિન્નધીઃ ।
તથાસ્ત્વિતિ ચ દેવેશો જગાદ ભગવાન્ હરિઃ ॥ ૪૨॥

ઉવાસ સ તતો વિષ્ણુઃ સર્વદેવગણૈસ્સહ ।
જલન્ધરં નામ પુરમાગત્ય રમયા સહ ॥ ૪૩॥

અથો જલન્ધરો દૈત્યઃ સ્વભગિન્યા ચ વિષ્ણુના ।

ઉવાસ સ્વાલયં પ્રાપ્તો હર્ષાકુલિતમાનસઃ ॥ ૪૪॥

જલન્ધરોઽથ દેવાનામધિકારેષુ દાનવાન્ ।
સ્થાપયિત્વા સહર્ષઃ સન્ પુનરાગાન્મહીતલમ્ ॥ ૪૫॥

દેવગન્ધર્વસિદ્ધેષુ યત્કિઞ્ચિદ્રત્નસઞ્ચિતમ્ ।
તદાત્મવશગં કૃત્વાઽતિષ્ઠત્સાગરનન્દનઃ ॥ ૪૬॥

પાતાલભવને દૈત્યં નિશુમ્ભં સુમહાબલમ્ ।
સ્થાપયિત્વા સ શેષાદીનાનયદ્ભૂતલં બલી ॥ ૪૭॥

દેવગન્ધર્વસિદ્ધૌઘાન્ સર્પરાક્ષસમાનુષાન્ ।
સ્વપુરે નાગરાન્કૃત્વા શશાસ ભુવનત્રયમ્ ॥ ૪૮॥

એવં જલન્ધરઃ કૃત્વા દેવાન્સ્વવશવર્તિનઃ ।
ધર્મેણ પાલયામાસ પ્રજાઃ પુત્રાનિવૌરસાન્ ॥ ૪૯॥

ન કશ્ચિદ્વ્યાધિતો નૈવ દુઃખિતો ન કૃશસ્તથા ।
ન દીનો દૃશ્યતે તસ્મિન્ધર્માદ્રાજ્યં પ્રશાસતિ ॥ ૫૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરોપાખ્યાને વિષ્ણુજલન્ધરયુદ્ધવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૨.૫.૧૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૧૮. અષ્ટાદશોઽધ્યાયઃ । જલન્ધરવધોપાખ્યાને દેવર્ષિજલન્ધરસંવાદઃ ।

સનત્કુમાર ઉવાચ ।
એવં શાસતિ ધર્મેણ મહીં તસ્મિન્મહાસુરે ।
બભૂવુર્દુઃખિનો દેવા ભર્ત્રભાવાન્મુનીશ્વર ॥ ૧॥

દુઃખિતાસ્તે સુરાઃ સર્વે શિવં શરણમાયયુઃ ।
મનસા શઙ્કરં દેવદેવં સર્વપ્રભું પ્રભુમ્ ॥ ૨॥

તુષ્ટુવુર્વાગ્ભિરિષ્ટાભિર્ભગવન્તં મહેશ્વરમ્ ।
નિવૃત્તયે સ્વદુઃખસ્ય સર્વદં ભક્તવત્સલમ્ ॥ ૩॥

આહૂય સ મહાદેવો ભક્તાનાં સર્વકામદઃ ।
નારદં પ્રેરયામાસ દેવકાર્યચિકીર્ષયા ।૪॥

અથ દેવમુનિર્જ્ઞાની શમ્ભુભક્તઃ સતાં ગતિઃ ।
શિવાજ્ઞયા યયૌ દૈત્યપુરે દેવાન્સ નારદઃ ॥ ૫॥

વ્યાકુલાસ્તે સુરાઃ સર્વે વાસવાદ્યા દ્રુતં મુનિમ્ ।
આગચ્છન્તં સમાલોક્ય સમુત્તસ્થુર્હિ નારદમ્ ॥ ૬॥

દદુસ્ત આસનં નત્ત્વા મુનયે પ્રીતિપૂર્વકમ્ ।
નારદાય સુરાઃ શક્રમુખા ઉત્કણ્ઠિતાનનાઃ ॥ ૭॥

સુખાસીનં મુનિવરમાસને સુપ્રણમ્ય તમ્ ।
પુનઃ પ્રોચુઃ સુરા દીના વાસવાદ્યા મુનીશ્વરમ્ ॥ ૮॥

દેવા ઊચુઃ ।
ભો ભો મુનિવરશ્રેષ્ઠ દુઃખં શ ૃણુ કૃપાકર ।
શ્રુત્વા તન્નાશય ક્ષિપ્રં પ્રભુસ્ત્વં શઙ્કરપ્રિયઃ ॥ ૯॥

જલન્ધરેણ દૈત્યેન સુરા વિદ્રાવિતા ભૃશમ્ ।
સ્વસ્થાનાદ્ભર્તૃભાવાચ્ચ દુઃખિતા વયમાકુલાઃ ॥ ૧૦॥

સ્વસ્થાનાદુષ્ણરશ્મિશ્ચ ચન્દ્રો નિસ્સારિતસ્તથા ।
વહ્નિશ્ચ ધર્મરાજશ્ચ લોકપાલાસ્તથેતરે ॥ ૧૧॥

સુબલિષ્ઠેન વૈ તેન સર્વે દેવાઃ પ્રપીડિતાઃ ।
દુઃખં પ્રાપ્તા વયં ચાતિ શરણં ત્વાં સમાગતાઃ ॥ ૧૨॥

સઙ્ગ્રામે સ હૃષીકેશં સ્વવશં કૃતવાન્ બલી ।
જલન્ધરો મહાદૈત્યઃ સર્વામરવિમર્દકઃ ॥ ૧૩॥

તસ્ય વશ્યો વરાધીનોઽવાત્સીત્તત્સદને હરિઃ ।
સ લક્ષ્મ્યા સહિતો વિષ્ણુર્યો નઃ સર્વાર્થસાધકઃ ॥ ૧૪॥

જલન્ધરવિનાશાય યત્નં કુરુ મહામતે ।
ત્વં નો દૈવવશાત્પ્રાપ્તઃ સદા સર્વાર્થસાધકઃ ॥ ૧૫॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષામમરાણાં સ નારદઃ ।
આશ્વાસ્ય મુનિશાર્દૂલસ્તાનુવાચ કૃપાકરઃ ॥ ૧૬॥

નારદ ઉવાચ ।
જાનેઽહં વૈ સુરા યૂયં દૈત્યરાજપરાજિતાઃ ।
દુઃખ પ્રાપ્તાઃ પીડિતાશ્ચ સ્થાનાન્નિસ્સારિતાઃ ખલુ ॥ ૧૭॥

સ્વશક્ત્યા ભવતાં સ્વાર્થં કરિષ્યે નાત્ર સંશયઃ ।
અનુકૂલોઽહમિહ વો દુઃખં પ્રાપ્તા યતોઽમરાઃ ॥ ૧૮॥

સનત્કુમાર ઉવાચ ।
એવમુક્ત્વા મુનિશ્રેષ્ઠો દ્રષ્ટું દાનવવલ્લભમ્ ।
આશ્વાસ્ય સકલાન્દેવાઞ્જલન્ધરસભાં યયૌ ॥ ૧૯॥

અથાગતં મુનિશ્રેષ્ઠં દૃષ્ટ્વા દૈત્યો જલન્ધરઃ ।
ઉત્થાય પરયા ભક્ત્યા દદૌ શ્રેષ્ઠાસનં વરમ્ ॥ ૨૦॥

સ તં સમ્પૂજ્ય વિધિવદ્દાનવેન્દ્રોઽતિવિસ્મિતઃ ।
સુપ્રહસ્ય તદા વાક્યં જગાદ મુનિસત્તમમ્ ॥ ૨૧॥

જલન્ધર ઉવાચ ।
કુત આગમ્યતે બ્રહ્મન્ કિં ચ દૃષ્ટં ત્વયા ક્વચિત્ ।
યદર્થમિહ આયાતસ્તદાજ્ઞાપય માં મુને ॥ ૨૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય દૈત્યેન્દ્રસ્ય મહામુનિઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા નારદો હિ જલન્ધરમ્ ॥ ૨૩॥

નારદ ઉવાચ ।
સર્વદાનવદૈત્યેન્દ્ર જલન્ધર મહામતે ।
ધન્યસ્ત્વં સર્વલોકેશ રત્નભોક્તા ત્વમેવ હિ ॥ ૨૪॥

મદાગમનહેતું વૈ શ‍ૃણુ દૈત્યેન્દ્રસત્તમ ।
યદર્થમિહ ચાયાતસ્ત્વહં વક્ષ્યેઽખિલં હિ તત્ ॥ ૨૫॥

ગતઃ કૈલાસશિખરં દૈત્યેન્દ્રાહં યદૃચ્છયા ।
યોજનાયુતવિસ્તીર્ણં કલ્પદ્રુમમહાવનમ્ ॥ ૨૬॥

કામધેનુશતાકીર્ણં ચિન્તામણિસુદીપિતમ્ ।
સર્વરુક્મમયં દિવ્યં સર્વત્રાદ્ભુતશોભિતમ્ ॥ ૨૭॥

તત્રોમયા સહાસીનં દૃષ્ટવાનસ્મિ શઙ્કરમ્ ।

સર્વાઙ્ગસુન્દરં ગૌરં ત્રિનેત્રં ચન્દ્રશેખરમ્ ॥ ૨૮॥

તં દૃષ્ટ્વા મહદાશ્ચર્યં વિતર્કો મેઽભવત્તદા ।
ક્વાપીદૃશી ભવેદ્ વૃદ્ધિસ્ત્રૈલોક્યે વા ન વેતિ ચ ॥ ૨૯॥

તાવત્તવાપિ દૈત્યેન્દ્ર સમૃદ્ધિઃ સંસ્મૃતા મયા ।
તદ્વિલોકનકામોઽહં ત્વત્સાન્નિધ્યમિહાગતઃ ॥ ૩૦॥

સનત્કુમાર ઉવાચ ।
ઇતિ નારદતઃ શ્રુત્વા સ દૈત્યેન્દ્રો જલન્ધરઃ ।
સ્વસમૃદ્ધિં સમગ્રાં વૈ દર્શયામાસ સાદરમ્ ॥ ૩૧॥

દૃષ્ટ્વા સ નારદો જ્ઞાની દેવકાર્યસુસાધકઃ ।
પ્રભુપ્રેરણયા પ્રાહ દૈત્યેન્દ્રં તં જલન્ધરમ્ ॥ ૩૨॥

નારદ્ ઉવાચ ।
તવાસ્તિ સુસમૃદ્ધિર્હિ વરવીરાખિલાધુના ।
ત્રૈલોક્યસ્ય પતિસ્ત્વં હિ ચિત્રં કિં ચાત્ર સમ્ભવમ્ ॥ ૩૩॥

મણયો રત્નપુઞ્જાશ્ચ ગજાદ્યાશ્ચ સમૃદ્ધયઃ ।
તે ગૃહેઽદ્ય વિભાન્તીહ યાનિ રત્નાનિ તાન્યપિ ॥ ૩૪॥

ગજરત્નં ત્વયાનીતં શક્રસ્યૈરાવતસ્તથા ।
અશ્વરત્નં મહાવીર સૂર્યસ્યોચ્ચૈઃશ્રવા હયઃ ॥ ૩૫॥

કલ્પવૃક્ષસ્ત્વયાનીતો નિધયો ધનદસ્ય ચ ।
હંસયુક્તવિમાનં ચ ત્વયાનીતં હિ વેધસઃ ॥ ૩૬॥

ઇત્યેવં વરરત્નાનિ દિવિ પૃથ્વ્યાં રસાતલે ।
યાનિ દૈત્યેન્દ્ર તે ભાન્તિ ગૃહે તાનિ સમન્તતઃ ॥ ૩૭॥

ત્વત્સમૃદ્ધિમિમાં પશ્યન્સમ્પૂર્ણાં વિવિધામહમ્ ।
પ્રસન્નોઽસ્મિ મહાવીર ગજાશ્વાદિસુશોભિતામ્ ॥ ૩૮॥

જાયારત્નં મહાશ્રેષ્ઠં જલન્ધર ન તે ગૃહે ।
તદાનેતું વિશેષેણ સ્ત્રીરત્નં વૈ ત્વમર્હસિ ॥ ૩૯॥

યસ્ય ગેહે સુરત્નાનિ સર્વાણિ હિ જલન્ધર ।
જાયારત્નં ન ચેત્તાનિ ન શોભન્તે વૃથા ધ્રુવમ્ ॥ ૪૦॥

સનત્કુમાર ઉવાચ ।

ઇત્યેવં વચનં શ્રુત્વા નારદસ્ય મહાત્મનઃ ।
ઉવાચ દૈત્યરાજો હિ મદનાકુલમાનસઃ ॥ ૪૧॥

જલન્ધર ઉવાચ ।
ભો ભો નારદ દેવર્ષે નમસ્તેઽસ્તુ મહાપ્રભો ।
જાયારત્નવરં કુત્ર વર્તતે તદ્વદાધુના ॥ ૪૨॥

બ્રહ્માણ્ડે યત્ર કુત્રાપિ તદ્રત્નં યદિ વર્ત્તતે ।
તદાનેષ્યે તતો બ્રહ્મન્સત્યં સત્યં ન સંશયઃ ॥ ૪૩॥

નારદ ઉવાચ ।
કૈલાસે હ્યતિરમ્યે ચ સર્વર્દ્ધિસુસમાકુલે ।
યોગિરૂપધરઃ શમ્ભુરસ્તિ તત્ર દિગમ્બરઃ ॥ ૪૪॥

તસ્ય ભાર્યા સુરમ્યા હિ સર્વલક્ષણલક્ષિતા ।
સર્વાઙ્ગસુન્દરીનામ્ના પાર્વતીતિ મનોહરા ॥ ૪૫॥

તદીદૃશં રૂપમનન્યસઙ્ગતં
દૃષ્ટં ન કુત્રાપિ કુતૂહલાઢ્યમ્ ।
અત્યદ્ભુતં મોહનકૃત્સુયોગિનાં
સુદર્શનીયં પરમર્દ્ધિકારિ ॥ ૪૬॥

સ્વચિત્તે કલ્પયામ્યદ્ય શિવાદન્યઃ સમૃદ્ધિમાન્ ।
જાયારત્નાન્વિતાદ્વીર ત્રિલોક્યાં ન જલન્ધર ॥ ૪૭॥

યસ્યા લાવણ્યજલધૌ નિમગ્નશ્ચતુરાનનઃ ।
સ્વધૈર્યં મુમુચે પૂર્વં તયા કાન્યોપમીયતે ॥ ૪૮॥

ગતરાગોઽપિ હિ યયા મદનારિઃ સ્વલીલયા ।
નિજતન્ત્રોઽપિ યતઃ સ સ્વાત્મવશગઃ કૃતઃ ॥ ૪૯॥

યથા સ્ત્રીરત્નસમ્ભોક્તુઃ સમૃદ્ધિસ્તસ્ય સાભવત્ ।
તથા ન તવ દૈત્યેન્દ્ર સર્વરત્નાધિપસ્ય ચ ॥ ૫૦॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા સ તુ દેવર્ષિર્નારદો લોકવિશ્રુતઃ ।
યયૌ વિહાયસા દેવોપકારકરણોદ્યતઃ ॥ ૫૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધોપાખ્યાને દેવર્ષિજલન્ધરસંવાદો નામાષ્ટાદશોઽધ્યાયઃ ॥ ૨.૫.૧૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૧૯. એકોનવિંશોઽધ્યાયઃ । જલન્ધરવધોપાખ્યાને દૂતસંવાદઃ ।

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ નારદે હિ ગતે દિવિ ।
દૈત્યરાટ્ કિમકાર્ષીત્સ તન્મે વદ સુવિસ્તરાત્ ॥ ૧॥

સનત્કુમાર ઉવાચ ।
તમામન્ત્ર્ય ગતે દૈત્યં નારદે દિવિ દૈત્યરાટ્ ।
તદ્રૂપશ્રવણાદાસીદનઙ્ગજ્વરપીડિતઃ ॥ ૨॥

અથો જલન્ધરો દૈત્યઃ કાલાધીનઃ પ્રનષ્ટધીઃ ।
દૂતમાહ્વાયયામાસ સૈંહિકેયં વિમોહિતઃ ॥ ૩॥

આગતં તં સમાલોક્ય કામાક્રાન્તમનાઃ સ હિ ।
સુસમ્બોધ્ય સમાચષ્ટ સિન્ધુપુત્રો જલન્ધરઃ ॥ ૪॥

જલન્ધર ઉવાચ ।
ભો ભો દૂતવરશ્રેષ્ઠ સર્વકાર્યપ્રસાધક ।
સૈંહિકેય મહાપ્રાજ્ઞ કૈલાસં ગચ્છ પર્વતમ્ ॥ ૫॥

તત્રાસ્તિ યોગી શમ્ભ્વાખ્યસ્તપસ્વી ચ જટાધરઃ ।
ભસ્મભૂષિતસર્વાઙ્ગો વિરક્તો વિજિતેન્દ્રિયઃ ॥ ૬॥

તત્ર ગત્વેતિ વક્તવ્યં યોગિનં દૂત શઙ્કરમ્ ।
જટાધરં વિરક્તં તં નિર્ભયેન હૃદા ત્વયા ॥ ૭॥

હે યોગિંસ્તે દયાસિન્ધો જાયારત્નેન કિં ભવેત્ ।
ભૂતપ્રેતપિશાચાદિસેવિતેન વનૌકસા ॥ ૮॥

મન્નાથે ભુવને યોગિન્નોચિતા ગતિરીદૃશી ।

જાયારત્નમતસ્ત્વં મે દેહિ રત્નભુજે નિજમ્ ॥ ૯॥

યાનિ યાનિ સુરત્નાનિ ત્રૈલોક્યે તાનિ સન્તિ મે ।
મદધીનં જગત્સર્વં વિદ્ધિ ત્વં સચરાચરમ્ ॥ ૧૦॥

ઇન્દ્રસ્ય ગજરત્નં ચોચ્ચૈઃશ્રવોરત્નમુત્તમમ્ ।
બલાદ્ગૃહીતં સહસા પારિજાતસ્તરુસ્તથા ॥ ૧૧॥

વિમાનં હંસસંયુક્તમઙ્ગણે મમ તિષ્ઠતિ ।
રત્નભૂતં મહાદિવ્યમુત્તમં વેધસોદ્ભુતમ્ ॥ ૧૨॥

મહાપદ્માદિકં દિવ્યં નિધિરત્નં સ્વદસ્ય ચ ।
છત્રં મે વારુણં ગેહે કાઞ્ચનસ્રાવિ તિષ્ઠતિ ॥ ૧૩॥

કિઞ્જલ્કિની મહામાલા સર્વદાઽમ્લાનપઙ્કજા ।
મત્પિતુઃ સા મમૈવાસ્તિ પાશશ્ચ કપતેસ્તથા ॥ ૧૪॥

મૃત્યોરુત્ક્રાન્તિદા શક્તિર્મયા નીતા બલાદ્ધરા ।
દદૌ મહ્યં શુચિર્દિવ્યે શુચિશૌચે ચ વાસસી ॥ ૧૫॥

એવં યોગીન્દ્ર રત્નાનિ સર્વાણિ વિલસન્તિ મે ।
અતસ્ત્વમપિ મે દેહિ સ્વસ્ત્રીરત્નં જટાધર ॥ ૧૬॥

સનત્કુમાર ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય નન્દિના સ પ્રવેશિતઃ ।
જગામોગ્રસભાં રાહુર્વિસ્મયોદ્ભુતલોચનઃ ॥ ૧૭॥

તત્ર ગત્વા શિવં સાક્ષાદ્દેવદેવં મહાપ્રભુમ્ ।
સ્વતેજોધ્વસ્તતમસં ભસ્મલેપવિરાજિતમ્ ॥ ૧૮॥

મહારાજોપચારેણ વિલસન્તં મહાદ્ભુતમ્ ।
સર્વાઙ્ગસુન્દરં દિવ્યભૂષણૈર્ભૂષિતં હરમ્ ॥ ૧૯॥

પ્રણનામ ચ તં ગર્વાત્તત્તેજઃ ક્રાન્તવિગ્રહઃ ।
નિકટં ગતવાન્ શમ્ભોઃ સ દૂતો રાહુસંજ્ઞકઃ ॥ ૨૦॥

અથો તદગ્ર આસીનો વક્તુકામો હિ સૈંહિકઃ ।
ત્ર્યમ્બકં સ તદા સંજ્ઞાપ્રેરિતો વાક્યમબ્રવીત્ ॥ ૨૧॥

રાહુરુવાચ ।
દૈત્યપન્નગસેવ્યસ્ય ત્રૈલોક્યાધિપતેઃ સદા ।

દૂતોઽહં પ્રેષિતસ્તેન ત્વત્સકાશમિહાગતઃ ॥ ૨૨॥

જલન્ધરોઽબ્ધિતનયઃ સર્વદૈત્યજનેશ્વરઃ ॥ ઽ
ત્રૈલોક્યસ્યેશ્વરસ્સોઽથાભવત્સર્વાધિનાયકઃ ॥ ૨૩॥

સ દૈત્યરાજો બલવાન્દેવાનામન્તકોપમઃ ।
યોગિનં ત્વાં સમુદ્દિશ્ય સ યદાહ શ઼ૃણુષ્વ તત્ ॥ ૨૪॥

મહાદિવ્યપ્રભાવસ્ય તસ્ય દૈત્યપતેઃ પ્રભોઃ ।
સર્વરત્નેશ્વરસ્ય ત્વમાજ્ઞાં શ઼ૃણુ વૃષધ્વજ ॥ ૨૫॥

શ્મશાનવાસિનો નિત્યમસ્થિમાલાધરસ્ય ચ ।
દિગમ્બરસ્ય તે ભાર્યા કથં હૈમવતી શુભા ॥ ૨૬॥

અહં રત્નાધિનાથોઽસ્મિ સા ચ સ્ત્રીરત્નસંજ્ઞિતા ।
તસ્માન્મમૈવ સા યોગ્યા નૈવ ભિક્ષાશિનસ્તવ ॥ ૨૭॥

મમ વશ્યાસ્ત્રયો લોકા ભુઞ્જેઽહં મખભાગકાન્ ।
યાનિ સન્તિ ત્રિલોકેઽસ્મિન્ રત્નાનિ મમ સદ્મનિ ॥ ૨૮॥

વયં રત્નભુજસ્ત્વં તુ યોગી ખલુ દિગમ્બરઃ ।
સ્વસ્ત્રીરત્નં દેહિ મહ્યં રાજ્ઞઃ સુખકરાઃ પ્રજાઃ ॥ ૨૯॥

સનત્કુમાર ઉવાચ ।
વદત્યેવં તથા રાહૌ ભ્રૂમધ્યાચ્છૂલપાણિનઃ ।
અભવત્પુરુષો રૌદ્રસ્તીવ્રાશનિસમસ્વનઃ ॥ ૩૦॥

સિંહાસ્યપ્રચલજ્જિહ્વઃ સજ્જ્વાલનયનો મહાન્ ।
ઊર્ધ્વકેશઃ શુષ્કતનુર્નૃસિંહ ઇવ ચાપરઃ ॥ ૩૧॥

મહાતનુર્મહાબાહુસ્તાલજઙ્ઘો ભયઙ્કરઃ ।
અભિદુદ્રાવ વેગેન રાહું સ પુરુષો દ્રુતમ્ ॥ ૩૨॥

સ તં ખાદિતુમાયાન્તં દૃષ્ટ્વા રાહુર્ભયાતુરઃ ।
અધાવદાતિવેગેન બહિઃ સ ચ દધાર તમ્ ॥ ૩૩॥

રાહુરુવાચ ।
દેવદેવ મહેશાન પાહિ માં શરણાગતમ્ ।
સુરાઽસુરૈસ્સદા વન્દ્યઃ પરમૈશ્વર્યવાન્ પ્રભુઃ ॥ ૩૪॥

બ્રાહ્મણં માં મહાદેવ ખાદિતું સમુપાગતઃ ।

પુરુષોઽયં તવેશાન સેવકોઽતિભયઙ્કરઃ ॥ ૩૫॥

એતસ્માદ્રક્ષ દેવેશ શરણાગતવત્સલઃ ।
ન ખાદેત યથાયં માં નમસ્તેઽસ્તુ મુહુર્મુહુઃ ॥ ૩૬॥

સનત્કુમાર ઉવાચ ।
મહાદેવો વચઃ શ્રુત્વા બ્રાહ્મણસ્ય તદા મુને ।
અબ્રવીત્સ્વગણં તં વૈ દીનાનાથપ્રિયઃ પ્રભુઃ ॥ ૩૭॥

મહાદેવ ઉવાચ ।
પ્રભું ચ બ્રાહ્મણં દૂતં રાહ્વાખ્યં શરણાગતમ્ ।
શરણ્યા રક્ષણીયા હિ ન દણ્ડ્યા ગણસત્તમ ॥ ૩૮॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તૌ ગિરિજેશેન સગણઃ કરુણાત્મના ।
રાહું તત્યાજ સહસા બ્રાહ્મણેતિ શ્રુતાક્ષરઃ ॥ ૩૯॥

રાહું ત્યક્ત્વામ્બરે સોઽથ પુરુષો દીનયા ગિરા ।
શિવોપકણ્ઠમાગત્ય મહાદેવં વ્યજિજ્ઞપત્ ॥ ૪૦॥

પુરુષ ઉવાચ ।
દેવદેવ મહાદેવ કરુણાકર શઙ્કર ।
ત્યાજિતં મમ ભક્ષ્યં તે શરણાગતવત્સલ ॥ ૪૧॥

ક્ષુધા માં બાધતે સ્વામિન્ક્ષુત્ક્ષામશ્ચાસ્મિ સર્વથા ।
કિં ભક્ષ્યં મમ દેવેશ તદાજ્ઞાપય માં પ્રભો ॥ ૪૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય પુરુષસ્ય મહાપ્રભુઃ ।
પ્રત્યુવાચાદ્ભુતોતિઃ સ કૌતુકી સ્વહિતઙ્કરઃ ॥ ૪૩॥

મહેશ્વર ઉવાચ ।
બુભુક્ષા યદિ તેઽતીવ ક્ષુધા ત્વાં બાધતે યદિ ।
સમ્ભક્ષયાત્મનશ્શીઘ્રં માંસં ત્વં હસ્તપાદયોઃ ॥ ૪૪॥

સનત્કુમાર ઉવાચ ।
સ શિવેનૈવમાજ્ઞમશ્ચખાદ પુરુષઃ સ્વકમ્ ।
હસ્તપાદોદ્ભવં માંસં શિરઃ શેષોઽભવદ્યથા ॥ ૪૫॥

દૃષ્ટ્વા શિરોઽવશેષં તુ સુપ્રસન્નઃસદાશિવઃ ।
પુરુષં ભીમકર્માણં તમુવાચ સવિસ્મયઃ ॥ ૪૬॥

શિવ ઉવાચ ।
હે મહાગણ ધન્યસ્ત્વં મદાજ્ઞાપ્રતિપાલકઃ ।
સન્તુષ્ટશ્ચાસ્મિ તેઽતીવ કર્મણાનેન સત્તમ ॥ ૪૭॥

ત્વં કીર્તિમુખસંજ્ઞો હિ ભવ મદ્દ્વારકઃ સદા ।
મહાગણો મહાવીરઃ સર્વદુષ્ટભયઙ્કરઃ ॥ ૪૮॥

મત્પ્રિયસ્ત્વં મદર્ચાયાં સદા પૂજ્યો હિ મજ્જનૈઃ ।
ત્વદર્ચાં યે ન કુર્વન્તિ નૈવ તે મત્પ્રિયઙ્કરાઃ ॥ ૪૯॥

સનત્કુમાર ઉવાચ ।
ઇતિ શમ્ભોર્વરં પ્રાપ્ય પુરુષઃ પ્રજહર્ષ સઃ ।
તદાપ્રભૃતિ દેવેશદ્વારે કીર્તિમુખઃ સ્થિતઃ ॥ ૫૦॥

પૂજનીયો વિશેષેણ સ ગણશ્શિવપૂજને ।
નાર્ચયન્તીહ યે પૂર્વં તેષામર્ચા વૃથા ભવેત્ ॥ ૫૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધોપાખ્યાને દૂતસંવાદો નામૈકોનવિંશોઽધ્યાયઃ ॥ ૨.૫.૧૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૨૦. વિંશોઽધ્યાયઃ । જલન્ધરવધોપાખ્યાને સામાન્યગણાસુરયુદ્ધવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ કથા તે શ્રાવિતાદ્ભુતા ।
મહાપ્રભોઃ શઙ્કરસ્ય યત્ર લીલા ચ પાવની ॥ ૧॥

ઇદાનીં બ્રૂહિ સુપ્રીત્યા કૃપાં કૃત્વા મમોપરિ ।
રાહુર્મુક્તઃ કુત્ર ગતઃ પુરુષેણ મહામુને ॥ ૨॥

સૂત ઉવાચ ।

ઇત્યાકર્ણ્ય વચસ્તસ્ય વ્યાસસ્યામિતમેધસઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા બ્રહ્મપુત્રો મહામુનિઃ ॥ ૩॥

સનત્કુમાર ઉવાચ ।
રાહુર્વિમુક્તો યસ્તેન સોઽપિ તદ્વર્વરસ્થલે ।
અતઃ સ વર્વરો ભૂત ઇતિ ભૂમૌ પ્રથાં ગતઃ ॥ ૪॥

તતઃ સ મન્યમાનઃ સ્વં પુનર્જનિમથાનતઃ ।
ગતગર્વો જગામાથ જલન્ધરપુરં શનૈઃ ॥ ૫॥

જલન્ધરાય સોઽભ્યેત્ય સર્વમીશવિચેષ્ટિતમ્ ।
કથયામાસ તદ્વ્યાસાદ્વ્યાસ દૈત્યેશ્વરાય વૈ ॥ ૬॥

જલન્ધરસ્તુ તચ્છ્રુત્વા કોપાકુલિતવિગ્રહઃ ।
બભૂવ બલવાન્સિન્ધુપુત્રો દૈત્યેન્દ્રસત્તમઃ ॥ ૭॥

તતઃ કોપપરાધીનમાનસો દૈત્યસત્તમઃ ।
ઉદ્યોગં સર્વસૈન્યાનાં દૈત્યાનામાદિદેશ હ ॥ ૮॥

જલન્ધર ઉવાચ ।
નિર્ગચ્છન્ત્વખિલા દૈત્યાઃ કાલનેમિમુખાઃ ખલુ ।
તથા શુમ્ભનિશુમ્ભાદ્યા વીરાઃ સ્વબલસંયુતાઃ ॥ ૯॥

કોટિર્વીરકુલોત્પન્નાઃ કમ્બુવંશ્યાશ્ચ દૌર્હૃદાઃ ।
કાલકાઃ કાલકેયાશ્ચ મૌર્યા ધૌમ્રાસ્તથૈવ ચ ॥ ૧૦॥

ઇત્યાજ્ઞાપ્યાસુરપતિઃ સિન્ધુપુત્રઃ પ્રતાપવાન્ ।
નિર્જગામાશુ દૈત્યાનાં કોટિભિઃ પરિવારિતઃ ॥ ૧૧॥

તતસ્તસ્યાગ્રતઃ શુક્રો રાહુશ્છિન્નશિરોઽભવત્ ।
મુકુટશ્ચાપતદ્ભૂમૌ વેગાત્પ્રસ્ખલિતસ્તદા ॥ ૧૨॥

વ્યરાજત નભઃ પૂર્ણં પ્રાવૃષીવ યથા ઘનૈઃ ।
જાતા અશકુના ભૂરિ મહાનિદ્રાવિસૂચકાઃ ॥ ૧૩॥

તસ્યોદ્યોગં તથા દૃષ્ટ્વા ગીર્વાણાસ્તે સવાસવાઃ ।
અલક્ષિતાસ્તદા જગ્મુઃ કૈલાસં શઙ્કરાલયમ્ ॥ ૧૪॥

તત્ર ગત્વા શિવં દૃષ્ટ્વા સુપ્રણમ્ય સવાસવાઃ ।
દેવાઃ સર્વે નતસ્કન્ધાઃ કરૌ બદ્ધ્વા ચ તુષ્ટુવુઃ ॥ ૧૫॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ કરુણાકર શઙ્કર ।
નમસ્તેઽસ્તુ મહેશા ન પાહિ નઃ શરણાગતાન્ ॥ ૧૬॥

વિહ્વલાઃ વયમત્યુગ્રં જલન્ધરકૃતાત્પ્રભો ।
ઉપદ્રવાત્સદેવેન્દ્રાઃ સ્થાનભ્રષ્ટાઃ ક્ષિતિસ્થિતાઃ ॥ ૧૭॥

ન જાનાસિ કથં સ્વામિન્દેવાપત્તિમિમાં પ્રભો ।
તસ્માન્નો રક્ષણાર્થાય જહિ સાગરનન્દનમ્ ॥ ૧૮॥

અસ્માકં રક્ષણાર્થાય યત્પૂર્વં ગરુડધ્વજઃ ।
નિયોજિતસ્ત્વયા નાથ ન ક્ષમઃ સોઽદ્ય રક્ષિતુમ્ ॥ ૧૯॥

તદધીનો ગૃહે તસ્ય રમયા સહ તિષ્ઠતિ ।
વયં ચ તત્ર તિષ્ઠામસ્તદાજ્ઞાવશગાઃ સુરાઃ ॥ ૨૦॥

અલક્ષિતા વયં ચાત્રાગતાઃ શમ્ભો ત્વદન્તિકમ્ ।
સ આયાતિ ત્વયા કર્ત્તું રણં સિન્ધુસુતો બલી ॥ ૨૧॥

અતઃ સ્વામિન્ રણે ત્વં તમવિલમ્બં જલન્ધરમ્ ।
હન્તુમર્હસિ સર્વજ્ઞ પાહિ નઃ શરણાગતાન્ ॥ ૨૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા તે સુરાઃ સર્વે પ્રભું નત્વા સવાસવાઃ ।
પાદૌ નિરીક્ષ્ય સન્તસ્થુર્મહેશસ્ય વિનમ્રકાઃ ॥ ૨૩॥

ઇતિ દેવવચઃ શ્રુત્વા પ્રહસ્ય વૃષભધ્વજઃ ।
દ્રુતં વિષ્ણું સમાહૂય વચનં ચેદમબ્રવીત્ ॥ ૨૪॥

ઈશ્વર ઉવાચ ।
હૃષીકેશ મહાવિષ્ણો દેવાશ્ચાત્ર સમાગતાઃ ।
જલન્ધરકૃતાપીડાઃ શરણં મેઽતિવિહ્વલાઃ ॥ ૨૫॥

જલન્ધરઃ કથં વિષ્ણો સઙ્ગરે ન હતસ્ત્વયા ।
તદ્ ગૃહં ચાપિ યાતોઽસિ ત્યક્ત્વા વૈકુણ્ઠમાત્મનઃ ॥ ૨૬॥

મયા નિયોજિતસ્ત્વં હિ સાધુસંરક્ષણાય ચ ।
નિગ્રહાય ખલાનાં ચ સ્વતન્ત્રેણ વિહારિણા ॥ ૨૭॥

સનત્કુમાર ઉવાચ ।

ઇત્યાકર્ણ્ય મહેશસ્ય વચનં ગરુડધ્વજઃ ।
પ્રત્યુવાચ વિનીતાત્મા નતકઃ સાઞ્જલિર્હરિઃ ॥ ૨૮॥

વિષ્ણુરુવાચ ।
તવાંશસમ્ભવત્વાચ્ચ ભ્રાતૃત્વાચ્ચ તથા શ્રિયઃ ।
મયા ન નિહતઃ સઙ્ખ્યે ત્વમેનં જહિ દાનવમ્ ॥ ૨૯॥

મહાબલો મહાવીરોઽજેયસ્સર્વદિવૌકસામ્ ।
અન્યેષાં ચાપિ દેવેશ સત્યમેતદ્ બ્રવીમ્યહમ્ ॥ ૩૦॥

મયા કૃતો રણસ્તેન ચિરં દેવાન્વિતેન વૈ ।
મદુપાયો ન પ્રવૃત્તસ્તસ્મિન્દાનવપુઙ્ગવે ॥ ૩૧॥

તત્પરાક્રમતસ્તુષ્ટો વરં બ્રૂહીત્યહં ખલુ ।
ઇતિ મદ્વચનં શ્રુત્વા સ વવ્રે વરમુત્તમમ્ ॥ ૩૨॥

મદ્ભગિન્યા મયા સાર્દ્ધં મદ્ગેહે સસુરો વસ ।
મદધીનો મહાવિષ્ણો ઇત્યહં તદ્ગૃહં ગતઃ ॥ ૩૩॥

સનત્કુમાર ઉવાચ ।
ઇતિ વિષ્ણોર્વચઃ શ્રુત્વા શકરઃ સ મહેશ્વરઃ ।
વિહસ્યોવાચ સુપ્રીતઃ સદયો ભક્તવત્સલઃ ॥ ૩૪॥

મહેશ્વર ઉવાચ ।
હે વિષ્ણો સુરવર્ય ત્વં શ◌ૃણુ મદ્વાક્યમાદરાત્ ।
જલન્ધરં મહાદૈત્યં હનિષ્યામિ ન સંશયઃ ॥ ૩૫॥

સ્વસ્થાનં ગચ્છ નિર્ભીતો દેવા ગચ્છન્ત્વપિ ધ્રુવમ્ ।
નિર્ભયા વીતસન્દેહા હતં મત્વાઽસુરાધિપમ્ ॥ ૩૬॥

સનત્કુમાર ઉવાચ ।
ઇતિ શ્રુત્વા મહેશસ્ય વચનં સ રમાપતિઃ ।
સનિર્જરો જગામાશુ સ્વસ્થાનં ગતસંશયઃ ॥ ૩૭॥

એતસ્મિન્નન્તરે વ્યાસ સ દૈત્યેન્દ્રોઽતિવિક્રમઃ ।
સન્નદ્ધૈરસુરૈસ્સાર્દ્ધં શૈલપ્રાન્તં યયૌ બલી ॥ ૩૮॥

કૈલાસમવરુધ્યાથ મહત્યા સેનયા યુતઃ ।
સન્તસ્થૌ કાલસઙ્કાશઃ કુર્વન્સિંહરવં મહાન્ ॥ ૩૯॥

અથ કોલાહલં શ્રુત્વા દૈત્યનાદસમુદ્ભવમ્ ।
ચુક્રોધાતિમહેશાનો મહાલીલઃ ખલાન્તકઃ ॥ ૪૦॥

સમાદિદેશ સઙ્ખ્યાય સ્વગણાન્સ મહાબલાન્ ।
નન્દ્યાદિકાન્મહાદેવો મહોતિઃ કૌતુકી હરઃ ॥ ૪૧॥

નન્દીભમુખસેનાનીમુખાસ્સર્વે શિવાજ્ઞયા ।
ગણાશ્ચ સમનહ્યન્ત યુદ્ધાયાતિત્વરાન્વિતાઃ ॥ ૪૨॥

અવતેરુર્ગણાઃ સર્વે કૈલાસાત્ક્રોધદુર્મદાઃ ।
વલ્ગન્તો રણશબ્દાંશ્ચ મહાવીરા રણાય હિ ॥ ૪૩॥

તતઃ સમભવદ્યુદ્ધં કૈલાસોપત્યકાસુ વૈ ।
પ્રમથાધિપદૈત્યાનાં ઘોરં શસ્ત્રાસ્ત્રસઙ્કુલમ્ ॥ ૪૪॥

ભેરીમૃદઙ્ગશઙ્ખૌઘૈર્નિઃસ્વાનૈર્વીરહર્ષણૈઃ ।
ગજાશ્વરથશબ્દૈશ્ચ નાદિતા ભૂર્વ્યકમ્પત ॥ ૪૫॥

શક્તિતોમરબાણૌઘૈર્મુસલૈઃ પાશપટ્ટિશૈઃ ।
વ્યરાજત નભઃ પૂર્ણં મુક્તાભિરિવ સંવૃતમ્ ॥ ૪૬॥

નિહતૈરિવ નાગાશ્વૈઃ પત્તિભિર્ભૂર્વ્યરાજત ।
વજ્રાહતૈઃ પર્વતેન્દ્રૈઃ પૂર્વમાસીત્સુસંવૃતા ॥ ૪૭॥

પ્રમથાહતદૈત્યૌઘૈર્દૈત્યાહતગણૈસ્તથા ।
વસાસૃઙ્માંસપઙ્કાઢ્યા ભૂરગમ્યાભવત્તદા ॥ ૪૮॥

પ્રમથાહતદૈત્યૌઘાન્ભાર્ગવઃ સમજીવયત્ ।
યુદ્ધે પુનઃ પુનશ્ચૈવ મૃતસઞ્જીવની બલાત્ ॥ ૪૯॥

દૃષ્ટ્વા વ્યાકુલિતાંસ્તાંસ્તુ ગણાઃ સર્વે ભયાર્દિતાઃ ।
શશંસુર્દેવદેવાય સર્વં શુક્રવિચેષ્ટિતમ્ ॥ ૫૦॥

તચ્છ્રુત્વા ભગવાન્ રુદ્રશ્ચકાર ક્રોધમુલ્બણમ્ ।
ભયઙ્કરોઽતિરૌદ્રશ્ચ બભૂવ પ્રજ્વલન્દિશઃ ॥ ૫૧॥

અથ રુદ્રમુખાત્કૃત્યા બભૂવાતીવ ભીષણા ।
તાલજઙ્ઘા દરીવક્ત્રા સ્તનાપીડિતભૂરુહા ॥ ૫૨॥

સા યુદ્ધભૂમિં તરસા સસાદ મુનિસત્તમ ।
વિચચાર મહાભીમા ભક્ષયન્તી મહાસુરાન્ ॥ ૫૩॥

અથ સા રણમધ્યે હિ જગામ ગતભીર્દ્રુતમ્ ।
યત્રાસ્તે સંવૃતો દૈત્યવરેન્દ્રૈસ્સ હિ ભાર્ગવઃ ॥ ૫૪॥

સ્વતેજસા નભો વ્યાપ્ય ભૂમિં કૃત્વા ચ સા મુને ।
ભાર્ગવં સ્વભગે ધૃત્વા જગામાન્તર્હિતા નભઃ ॥ ૫૫॥

વિધૃતં ભાર્ગવં દૃષ્ટ્વા દૈત્યસૈન્યગણાસ્તથા ।
પ્રમ્લાનવદના યુદ્ધાન્નિર્જગ્મુર્યુદ્ધદુર્મદાઃ ॥ ૫૬॥

અથોઽભજ્યત દૈત્યાનાં સેના ગણભયાર્દિતા ।
વાયુવેગહતા યદ્વત્પ્રકીર્ણા તૃણસંહતિઃ ॥ ૫૭॥

ભગ્નાં ગણભયાદ્દૈત્યસેનાં દૃષ્ટ્વાતિમર્ષિતાઃ ।
નિશુમ્ભશુમ્ભૌ સેનાન્યૌ કાલનેમિશ્ચ ચુક્રુધુઃ ॥ ૫૮॥

ત્રયસ્તે વારયામાસુર્ગણસેનાં મહાબલાઃ ।
મુઞ્ચન્તઃ શરવર્ષાણિ પ્રાવૃષીવ બલાહકાઃ ॥ ૫૯॥

તતો દૈત્યશરૌઘાસ્તે શલભાનામિવ વ્રજાઃ ।
રુરુધુઃ ખં દિશઃ સર્વા ગણસેનામકમ્પયન્ ॥ ૬૦॥

ગણાઃ શરશતૈર્ભિન્ના રુધિરાસારવર્ષિણઃ ।
વસન્તકિંશુકાભાસા ન પ્રાજાનન્હિ કિઞ્ચન ॥ ૬૧॥

તતઃ પ્રભગ્નં સ્વબલં વિલોક્ય
નન્દ્યાદિલમ્બોદરકાર્ત્તિકેયાઃ ।
ત્વરાન્વિતા દૈત્યવરાન્પ્રસહ્ય
નિવારયામાસુરમર્ષણાસ્તે ॥ ૬૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધોપાખ્યાને સામાન્યગણાસુરયુદ્ધવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૨.૫.૨૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૨૧. એકવિંશોઽધ્યાયઃ । હિરણ્યનેત્રહિરણ્યકશિપુવધવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
તે ગણાધિપતીન્દૃષ્ટ્વા નન્દીભમુખષણ્મુખાન્ ।
અમર્ષાદભ્યધાવન્ત દ્વન્દ્વયુદ્ધાય દાનવાઃ ॥ ૧॥

નન્દિનં કાલનેમિશ્ચ શુમ્ભો લમ્બોદરં તથા ।
નિશુમ્ભઃ ષણ્મુખં દેવમભ્યધાવત શઙ્કિતઃ ॥ ૨॥

નિશુમ્ભઃ કાર્તિકેયસ્ય મયૂરં પઞ્ચભિઃ શરૈઃ ।
હૃદિ વિવ્યાધ વેગેન મૂર્છિતઃ સ પપાત હ ॥ ૩॥

તતઃ શક્તિધરઃ ક્રુદ્ધો બાણૈઃ પઞ્ચભિરેવ ચ ।
વિવ્યાધ સ્યન્દને તસ્ય હયાન્યન્તારમેવ ચ ॥ ૪॥

શરેણાન્યેન તીક્ષ્ણેન નિશુમ્ભં દેવવૈરિણમ્ ।
જઘાન તરસા વીરો જગર્જ રણદુર્મદઃ ॥ ૫॥

અસુરોઽપિ નિશુમ્ભાખ્યો મહાવીરોઽતિવીર્યવાન્ ।
જઘાન કાર્તિકેયં તં ગર્જન્તં સ્વેષુણા રણે ॥ ૬॥

તતઃ શક્તિં કાર્તિકેયો યાવજ્જગ્રાહ રોષતઃ ।
તાવન્નિશુમ્ભો વેગેન સ્વશક્ત્યા તમપાતયત્ ॥ ૭॥

એવં બભૂવ તત્રૈવ કાર્તિકેયનિશુમ્ભયોઃ ।
આહવો હિ મહાન્વ્યાસ વીરશબ્દં પ્રગર્જતોઃ ॥ ૮॥

તતો નન્દીશ્વરો બાણૈઃ કાલનેમિમવિધ્યત ।
સપ્તભિશ્ચ હયાન્કેતું રથં સારથિમાચ્છિનત્ ॥ ૯॥

કાલનેમિશ્ચ સઙ્ક્રુદ્ધો ધનુશ્ચિચ્છેદ નન્દિનઃ ।
સ્વશરાસનનિર્મુક્તૈર્મહાતીક્ષ્ણૈઃ શિલીમુખૈઃ ॥ ૧૦॥

અથ નન્દીશ્વરો વીરઃ કાલનેમિં મહાસુરમ્ ।
તમપાસ્ય ચ શૂલેન વક્ષસ્યભ્યહનદ્ દૃઢમ્ ॥ ૧૧॥

સ શૂલભિન્નહૃદયો હતાશ્વો હતસારથિઃ ।
અદ્રેઃ શિખરમુત્પાટ્ય નન્દિનં સમતાડયત્ ॥ ૧૨॥

અથ શુમ્ભો ગણેશશ્ચ રથમૂષક વાહનૌ ।
યુધ્યમાનૌ શરવ્રાતૈઃ પરસ્પરમવિધ્યતામ્ ॥ ૧૩॥

ગણેશસ્તુ તદા શુમ્ભં હૃદિ વિવ્યાધ પત્રિણા ।
સારથિં ચ ત્રિભિર્બાણૈઃ પાતયામાસ ભૂતલે ॥ ૧૪॥

તતોઽતિક્રુદ્ધઃ શુમ્ભોઽપિ બાણવૃષ્ટ્યા ગણાધિપમ્ ।
મૂષકં ચ ત્રિભિર્વિધ્વા નનાદ જલદસ્વનઃ ॥ ૧૫॥

મૂષકઃ શરભિન્નાઙ્ગશ્ચચાલ દૃઢવેદનઃ ।
લમ્બોદરશ્ચ પતિતઃ પદાતિરભવત્સ હિ ॥ ૧૬॥

તતો લમ્બોદરઃ શુમ્ભં હત્વા પરશુના હૃદિ ।
અપાતયત્તદા ભૂમૌ મૂષકં ચારુરોહ સઃ ॥ ૧૭॥

સમરાયોદ્યતશ્ચાભૂત્પુનર્ગજમુખો વિભુઃ ।
પ્રહસ્ય જઘ્નતુઃ ક્રોધાત્તોત્રેણૈવ મહાદ્વિપમ્ ॥ ૧૮॥

કાલનેમિર્નિશુમ્ભશ્ચ હ્યુભૌ લમ્બોદરં શરૈઃ ।
યુગપચ્ચખ્નતુઃ ક્રોધાદાશીવિષસમૈર્દ્રુતમ્ ॥ ૧૯॥

તં પીડ્યમાનમાલોક્ય વીરભદ્રો મહાબલઃ ।
અભ્યધાવત વેગેન કોટિભૂતયુતસ્તથા ॥ ૨૦॥

કૂષ્માણ્ડા ભૈરવાશ્ચાપિ વેતાલા યોગિનીગણાઃ ।
પિશાચા ડાકિની સઙ્ઘા ગણાશ્ચાપિ સમં યયુઃ ॥ ૨૧॥

તતઃ કિલકિલા શબ્દૈઃ સિંહનાદૈઃ સઘર્ઘરૈઃ ।
વિનાદિતા ડમરુકૈઃ પૃથિવી સમકમ્પત ॥ ૨૨॥

તતો ભૂતાઃ પ્રધાવન્તો ભક્ષયન્તિ સ્મ દાનવાન્ ।
ઉત્પત્ય પાતયન્તિ સ્મ નનૃતુશ્ચ રણાઙ્ગણે ॥ ૨૩॥

એતસ્મિન્નન્તરે વ્યાસાભૂતાં નન્દી ગુહશ્ચ તૌ ।
ઉત્થિતાવાપ્તસંજ્ઞૌ હિ જગર્જતુરલં રણે ॥ ૨૪॥

સ નન્દી કાર્તિકેયશ્ચ સમાયાતૌ ત્વરાન્વિતૌ ।
જઘ્નતુશ્ચ રણે દૈત્યાન્નિરન્તરશરવ્રજૈઃ ॥ ૨૫॥

છિન્નૈર્ભિન્નૈર્હતૈર્દૈત્યૈઃ પાતિતૈર્ભક્ષિતૈસ્તથા ।
વ્યાકુલા સાભવત્સેના વિષણ્ણવદના તદા ॥ ૨૬॥

એવં નન્દી કાર્તિકેયો વિકટશ્ચ પ્રતાપવાન્ ।

વીરભદ્રો ગણાશ્ચાન્યે જગર્જુઃસમરેઽધિકમ્ ॥ ૨૭॥

નિશુમ્ભશુમ્ભૌ સેનાન્યૌ સિન્ધુપુત્રસ્ય તૌ તથા ।
કાલનેમિર્મહાદૈત્યોઽસુરાશ્ચાન્યે પરાજિતાઃ ॥ ૨૮॥

પ્રવિધ્વસ્તાં તતસ્સેનાં દૃષ્ટ્વા સાગરનન્દનઃ ।
રથેનાતિપતાકેન ગણાનભિયયૌ બલી ॥ ૨૯॥

તતઃ પરાજિતા દૈત્યા અપ્યભૂવન્મહોત્સવાઃ ।
જગર્જુરધિકં વ્યાસ સમરાયોદ્ધતાસ્તદા ॥ ૩૦॥

સર્વે રુદ્રગણાશ્ચાપિ જગર્જુર્જયશાલિનઃ ।
નન્દિકાર્તિકદન્ત્યાસ્યવીરભદ્રાદિકા મુને ॥ ૩૧॥

હસ્ત્યશ્વરથસંહ્રાદઃ શઙ્ખભેરીરવસ્તથા ।
અભવત્સિંહનાદશ્ચ સેનયોરુભયોસ્તથા ॥ ૩૨॥

જલન્ધરશરવ્રાતૈર્નીહારપટલૈરિવ ।
દ્યાવાપૃથિવ્યોરાચ્છન્નમન્તરં સમપદ્યત ॥ ૩૩॥

શૈલાદિં પઞ્ચભિર્વિધ્વા ગણેશં પઞ્ચભિશ્શરૈઃ ।
વીરભદ્રં ચ વિંશત્યા નનાદ જલદસ્વનઃ ॥ ૩૪॥

કાર્તિકેયસ્તતો દૈત્યં શક્ત્યા વિવ્યાધ સત્વરમ્ ।
જલન્ધરં મહાવીરો રુદ્રપુત્રો નનાદ ચ ॥ ૩૫॥

સ ઘૂર્ણનયનો દૈત્યઃ શક્તિનિર્ભિન્નદેહકઃ ।
પપાત ભૂમૌ ત્વરિતમુદતિષ્ઠન્મહાબલઃ ॥ ૩૬॥

તતઃ ક્રોધપરીતાત્મા કાર્તિકેયં જલન્ધરઃ ।
ગદયા તાડયામાસ હૃદયે દૈત્યપુઙ્ગવઃ ॥ ૩૭॥

ગદાપ્રભાવં સફલં દર્શયન્ શઙ્કરાત્મજઃ ।
વિધિદત્તવરાદ્ વ્યાસ સ તૂર્ણં ભૂતલેઽપતત્ ॥ ૩૮॥

તથૈવ નન્દી હ્યપતદ્ભૂતલે ગદયા હતઃ ।
મહાવીરોઽપિ રિપુહા કિઞ્ચિદ્વ્યાકુલમાનસઃ ॥ ૩૯॥

તતો ગણેશ્વરઃ ક્રુદ્ધઃ સ્મૃત્વા શિવપદામ્બુજમ્ ।
સમ્પ્રાપ્યાતિબલો દૈત્યગદાં પરશુનાચ્છિનત્ ॥ ૪૦॥

વીરભદ્રસ્ત્રિભિર્બાણૈર્હૃદિ વિવ્યાધ દાનવમ્ ।
સપ્તભિશ્ચ હયાન્કેતું ધનુશ્છત્રં ચ ચિચ્છિદે ॥ ૪૧॥

તતોઽતિક્રુદ્ધો દૈત્યેન્દ્રઃ શક્તિમુદ્યમ્ય દારુણામ્ ।
ગણેશં પાતયામાસ રથમન્યં સમારુહત્ ॥ ૪૨॥

અભ્યગાદથ વેગેન સ દૈત્યેન્દ્રો મહાબલઃ ।
વિગણય્ય હૃદા તં વૈ વીરભદ્રં રુષાન્વિતઃ ॥ ૪૩॥

વીરભદ્રં જઘાનાશુ તીક્ષ્ણેનાશીવિષેણ તમ્ ।
નનાદ ચ મહાવીરો દૈત્યરાજો જલન્ધરઃ ॥ ૪૪॥

વીરભદ્રોઽપિ સઙ્ક્રુદ્ધસ્સિતધારેણ ચેષુણા ।
ચિચ્છેદ તચ્છરં ચૈવ તં વિવ્યાધ મહેષુણા ॥ ૪૫॥

તતસ્તૌ સૂર્યસઙ્કાશૌ યુયુધાતે પરસ્પરમ્ ।
નાનાશસ્ત્રૈસ્તથાસ્ત્રૈશ્ચ ચિરં વીરવરોત્તમૌ ॥ ૪૬॥

વીરભદ્રસ્તતસ્તસ્ય હયાન્બાણૈરપાતયત્ ।
ધનુશ્ચિચ્છેદ રથિનઃ પતાકાં ચાપિ વેગતઃ ॥ ૪૭॥

અથો સ દૈત્યરાજો હિ પુપ્લુવે પરિઘાયુધઃ ।
વીરભદ્રોપકણ્ઠં સ દ્રુતમાપ મહાબલઃ ॥ ૪૮॥

પરિઘેનાતિમહતા વીરભદ્રં જઘાન હ ।
મહાબલોઽબ્ધિતનયો મૂર્ધ્નિ વીરો જગર્જ ચ ॥ ૪૯॥

પરિઘેનાતિમહતા ભિન્નમૂર્ધ્દા ગણાધિપઃ ।
વીરભદ્રઃ પપાતોર્વ્યાં મુમોચ રુધિરં બહુ ॥ ૫૦॥

પતિતં વીરભદ્રં તુ દૃષ્ટ્વા રુદ્રગણા ભયાત્ ।
અપાગચ્છન્ રણં હિત્વા ક્રોશમાના મહેશ્વરમ્ ॥ ૫૧॥

અથ કોલાહલં શ્રુત્વા ગણાનાં ચન્દ્રશેખરઃ ।
નિજપાર્શ્વસ્થિતાન્ વીરાનપૃચ્છદ્ ગણસત્તમાન્ ॥ ૫૨॥

શઙ્કર ઉવાચ ।
કિમર્થં મદ્ગણાનાં હિ મહાકોલાહલોઽભવત્ ।
વિચાર્યતાં મહાવીરાઃ શાન્તિઃ કાર્યા મયા ધ્રુવમ્ ॥ ૫૩॥

ઇતિ યાવત્સ દેવેશો ગણાન્પપ્રચ્છ સાદરમ્ ।

તાવદ્ગણવરાસ્તે હિ સમાયાતાઃ પ્રભું પ્રતિ ॥ ૫૪॥

તાન્દૃષ્ટ્વા વિકલાન્ રુદ્રઃ પપ્રચ્છ કુશલં પ્રભુઃ ।
યથાવત્તે ગણા વૃત્તં સમાચખ્યુશ્ચ વિસ્તરાત્ ॥ ૫૫॥

તચ્છ્રુત્વા ભગવાન્ રુદ્રો મહાલીલાકરઃ પ્રભુઃ ।
અભયં દત્તવાંસ્તેભ્યો મહોત્સાહં પ્રવર્દ્ધયન્ ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરોપાખ્યાને વિશેષયુદ્ધવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૨.૫.૨૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૨૨. દ્વાવિંશોઽધ્યાયઃ । જલન્ધરવધોપાખ્યાને જલન્ધરયુદ્ધવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
અથ વીરગણૈ રુદ્રો રૌદ્રરૂપો મહાપ્રભુઃ ।
અભ્યગાદ્ વૃષભારૂઢઃ સઙ્ગ્રામં પ્રહસન્નિવ ॥ ૧॥

રુદ્રમાયાન્તમાલોક્ય સિંહનાદૈર્ગણાઃ પુનઃ ।
નિવૃત્તાઃ સઙ્ગરે રૌદ્રા યે હિ પૂર્વં પરાજિતાઃ ॥ ૨॥

વીરશબ્દં ચ કુર્વન્તસ્તેઽપ્યન્યે શાઙ્કરા ગણાઃ ।
સોત્સવાઃસાયુધા દૈત્યાન્નિજઘ્નુઃ શરવૃષ્ટિભિઃ ॥ ૩॥

દૈત્યા હિ ભીષણં રુદ્રં સર્વે દૃષ્ટ્વા વિદુદ્રુવુઃ ।
શાઙ્કરં પુરુષં દૃષ્ટ્વા પાતકાનીવ તદ્ભયાત્ ॥ ૪॥

અથો જલન્ધરો દૈત્યાન્નિવૃત્તાન્પ્રેક્ષ્ય સઙ્ગરે ।
અભ્યધાવત્સ ચણ્ડીશં મુઞ્ચન્બાણાન્સહસ્રશઃ ॥ ૫॥

નિશુમ્ભશુમ્ભપ્રમુખા દૈત્યેન્દ્રાશ્ચ સહસ્રશઃ ।
અભિજગ્મુશ્શિવં વેગાદ્રોષાત્સન્દષ્ટદચ્છદાઃ ॥ ૬॥

કાલનેમિસ્તથા વીરઃ ખડ્ગરોમા બલાહકઃ ।
ઘસ્મરશ્ચ પ્રચણ્ડશ્ચાપરે ચાપિ શિવં યયુઃ ॥ ૭॥

બાણૈઃ સઞ્છાદયામાસુર્દ્રુતં રુદ્રગણાંશ્ચ તે ।
અઙ્ગાનિ ચિચ્છિદુર્વીરાઃ શુમ્ભાદ્યા નિખિલા મુને ॥ ૮॥

બાણાન્ધકારસઞ્છન્નં દૃષ્ટ્વા ગણબલં હરઃ ।
તદ્બાણજાલમાચ્છિદ્ય બાણૈરાવવૃતે નભઃ ॥ ૯॥

દૈત્યાંશ્ચ બાણવાત્યાભિઃ પીડિતાનકરોત્તદા ।
પ્રચણ્ડબાણજાલૌઘૈરપાતયત ભૂતલે ॥ ૧૦॥

ખડ્ગરોમશિરઃ કાયાત્તથા પરશુનાચ્છિનત્ ।
બલાહકસ્ય ચ શિરઃ ખટ્વાઙ્ગેનાકરોદ્દ્વિધા ॥ ૧૧॥

સ બધ્વા ઘસ્મરં દૈત્યં પાશેનાભ્યહનદ્ભુવિ ।
મહાવીરં પ્રચણ્ડં ચ ચકર્ત્ત ત્રિશિખેન હ ॥ ૧૨॥

વૃષભેણ હતાઃ કેચિત્કેચિદ્બાણૈર્નિપાતિતા ।
ન શેકુરસુરાઃ સ્થાતું ગજા સિંહાર્દિતા ઇવ ॥ ૧૩॥

તતઃ ક્રોધપરીતાત્મા દૈત્યાન્ ધિક્ કૃતવાન્ રણે ।
શુમ્ભાદિકાન્મહાદૈત્યઃ પ્રહસન્પ્રાહ ધૈર્યવાન્ ॥ ૧૪॥

જલન્ધર ઉવાચ ।
કિં વ ઉચ્ચરિતૈર્માતુર્ધાવદ્ભિઃ પૃષ્ઠતો હતૈઃ ।
ન હિ ભીતવધઃ શ્લાઘ્યઃ સ્વર્ગદઃ શૂરમાનિનામ્ ॥ ૧૫॥

યદિ વઃ પ્રધને શ્રદ્ધા સારો વા ક્ષુલ્લકા હૃદિ ।
અગ્રે તિષ્ઠત માત્રં મે ન ચેદ્ગ્રામ્યસુખે સ્પૃહા ॥ ૧૬॥

રણે મૃત્યુર્વરશ્ચાસ્તિ સર્વકામફલપ્રદઃ ।
યશઃપ્રદો વિશેષેણ મોક્ષદોઽપિ પ્રકીર્ત્તિતઃ ॥ ૧૭॥

સૂર્યસ્ય મણ્ડલં ભિત્ત્વા યાયાદ્વૈ પરમં પદમ્ ।
પરિવ્રાટ્ પરમજ્ઞાની રણે યઃ સમ્મુખે હતઃ ॥ ૧૮॥

મૃત્યોર્ભયં ન કર્તવ્યં કદાચિત્કુત્રચિદ્બુધૈઃ ।
અનિવાર્યો યતો હ્યેષ ઉપાયૈર્નિખિલૈરપિ ॥ ૧૯॥

મૃત્યુર્જન્મવતાં વીરા દેહેન સહ જાયતે ।
અદ્ય વાબ્દશતાન્તે વા મૃત્યુર્વૈ પ્રાણિનાં ધ્રુવઃ ॥ ૨૦॥

તન્મૃત્યુભયમુત્સાર્ય યુધ્યધ્વં સમરે મુદા ।

સર્વથા પરમાનન્દ ઇહામુત્રાપ્યસંશયઃ ॥ ૨૧॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા બોધયામાસ સ્વવીરાન્બહુશઃ સ હિ ।
ધૈર્યં દધુર્ન તે ભીત્યા પલાયન્તો રણાદ્ રુતમ્ ॥ ૨૨॥

અથ દૃષ્ટ્વા સ્વસૈન્યં તત્પલાયનપરાયણમ્ ।
ચુક્રોધાતિ મહાવીરઃ સિન્ધુપુત્રો જલન્ધરઃ ॥ ૨૩॥

તતઃ ક્રોધપરીતાત્મા ક્રોધાદ્રુદ્રં જલન્ધરઃ ।
આહ્વાપયામાસ રણે તીવ્રાશનિસમસ્વનઃ ॥ ૨૪॥

જલન્ધર ઉવાચ ।
યુદ્ધ્યસ્વાદ્ય મયા સાર્ધં કિમેભિર્નિહતૈસ્તવ ।
યચ્ચ કિઞ્ચિદ્બલં તેઽસ્તિ તદ્દર્શય જટાધર ॥ ૨૫॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા બાણ સપ્તત્યા જઘાન વૃષભધ્વજમ્ ।
જલન્ધરો મહાદૈત્યઃ શમ્ભુમક્લિષ્ટકારિણમ્ ॥ ૨૬॥

તાનપ્રાપ્તાન્મહાદેવો જલન્ધરશરાન્દ્રુતમ્ ।
નિજૈર્હિ નિશિતૈર્બાણૈશ્ચિચ્છેદ પ્રહસન્નિવ ॥ ૨૭॥

તતો હયાન્ધ્વજં છત્રં ધનુશ્ચિચ્છેદ સપ્તભિઃ ।
જલન્ધરસ્ય દૈત્યસ્ય ન તચ્ચિત્રં હરે મુને ॥ ૨૮॥

સ ચ્છિન્નધન્વા વિરથઃ પાથોધિતનયોઽસુરઃ ।
અભ્યધાવચ્છિવં ક્રુદ્ધો ગદામુદ્યમ્ય વેગવાન્ ॥ ૨૯॥

પ્રભુર્ગદાં ચ તત્ક્ષિપ્તાં સહસૈવ મહેશ્વરઃ ।
પારાશર્ય્ય મહાલીલો દ્રુતં બાણૈર્દ્વિધાકરોત્ ॥ ૩૦॥

તથાપિ મુષ્ટિમુદ્યમ્ય મહાક્રુદ્ધો મહાસુરઃ ।
અભ્યુદ્યયૌ મહાવેગાદ્રુદ્રં તં તજ્જિઘાંસયા ॥ ૩૧॥

તાવદેવેશ્વરેણાશુ બાણૌઘૈઃ સ જલન્ધરઃ ।
અક્લિષ્ટકર્મકારેણ ક્રોશમાત્રમપાકૃતઃ ॥ ૩૨॥

તતો જલન્ધરો દૈત્યો રુદ્રં મત્વા બલાધિકમ્ ।
સસર્જ માયાં ગાન્ધર્વીમદ્ભુતાં રુદ્રમોહિનીમ્ ॥ ૩૩॥

તસ્ય માયાપ્રભાવાત્તુ ગન્ધર્વાપ્સરસાં ગણાઃ ।
આવિર્ભૂતા અનેકે ચ રુદ્રમોહનહેતવે ॥ ૩૪॥

તતો જગુશ્ચ નનૃતુર્ગન્ધર્વાપ્સરસાં ગણાઃ ।
તાલવેણુમૃદઙ્ગાંશ્ચ વાદયન્તિ સ્મ ચાપરે ॥ ૩૫॥

તદ્ દૃષ્ટ્વા મહદાશ્ચર્યં ગણૈ રુદ્રો વિમોહિતઃ ।
પતિતાન્યપિ શસ્ત્રાણિ કરેભ્યો ન વિવેદ સઃ ॥ ૩૬॥

એકાગ્રીભૂતમાલોક્ય રુદ્રં દૈત્યો જલન્ધરઃ ।
કામતસ્સ જગામાશુ યત્ર ગૌરી સ્થિતાઽભવત્ ॥ ૩૭॥

યુદ્ધે શુમ્ભનિશુમ્ભાખ્યૌ સ્થાપયિત્વા મહાબલૌ ।
દશદોર્દણ્ડપઞ્ચાસ્યસ્ત્રિનેત્રશ્ચ જટાધરઃ ॥ ૩૮॥

મહાવૃષભમારૂઢસ્સર્વથા રુદ્રસન્નિભઃ ।
આસુર્ય્યા માયયા વ્યાસ સ બભૂવ જલન્ધરઃ ॥ ૩૯॥

અથ રુદ્રં સમાયાન્તમાલોક્ય ભવવલ્લભા ।
અભ્યાયયૌ સખીમધ્યાત્તદ્દર્શનપથેઽભવત્ ॥ ૪૦॥

યાવદ્દદર્શ ચાર્વઙ્ગી પાર્વતીં દનુજેશ્વરઃ ।
તાવત્સ વીર્યં મુમુચે જડાઙ્ગશ્ચાભવત્તદા ॥ ૪૧॥

અથ જ્ઞાત્વા તદા ગૌરી દાનવં ભયવિહ્વલા ।
જગામાન્તર્હિતા વેગાત્સા તદોત્તરમાનસમ્ ॥ ૪૨॥

તામદૃષ્ટ્વા તતો દૈત્યઃ ક્ષણાદ્વિદ્યુલ્લતામિવ ।
જવેનાગાત્પુનર્યોદ્ધું યત્ર દેવો મહેશ્વરઃ ॥ ૪૩॥

પાર્વત્યપિ મહાવિષ્ણું સસ્માર મનસા તદા ।
તાવદ્દદર્શ તં દેવં સોપવિષ્ટં સમીપગમ્ ॥ ૪૪॥

તં દૃષ્ટ્વા પાર્વતી વિષ્ણું જગન્માતા શિવપ્રિયા ।
પ્રસન્નમનસોવાચ પ્રણમન્તં કૃતાઞ્જલિમ્ ॥ ૪૫॥

પાર્વત્યુવાચ ।
વિષ્ણો જલન્ધરો દૈત્યઃ કૃતવાન્પરમાદ્ભુતમ્ ।
તત્કિં ન વિદિતં તેઽસ્તિ ચેષ્ટિતં તસ્ય દુર્મતેઃ ॥ ૪૬॥

તચ્છ્રુત્વા જગદમ્બાયા વચનં ગરુડધ્વજઃ ।

પ્રત્યુવાચ શિવાં નત્વા સાઞ્જલિર્નમ્રકન્ધરઃ ॥ ૪૭॥

શ્રીભગવાનુવાચ ।
ભવત્યાઃ કૃપયા દેવિ તદ્વૃત્તં વિદિતં મયા ।
યદાજ્ઞાપય માં માતસ્તત્કુર્યાં ત્વદનુજ્ઞયા ॥ ૪૮॥

સનત્કુમાર ઉચાચ
તચ્છ્રુત્વા વિષ્ણુવચનં પુનરપ્યાહ પાર્વતી ॥

હૃષીકેશં જગન્માતા ધર્મનીતિં સુશિક્ષયન્ । ૪૯॥

પાર્વત્યુવાચ ।
તેનૈવ દર્શિતઃ પન્થા બુધ્યસ્વ ત્વં તથૈવ હિ ।
તત્સ્ત્રીપાતિવ્રતં ધર્મં ભ્રષ્ટં કુરુ મદાજ્ઞયા ॥ ૫૦॥

નાન્યથા સ મહાદૈત્યો ભવેદ્વધ્યો રમેશ્વર ।
પાતિવ્રતસમો નાન્યો ધર્મોઽસ્તિ પૃથિવીતલે ॥ ૫૧॥

સનત્કુમાર ઉવાચ ।
ઇત્યનુજ્ઞાં સમાકર્ણ્ય શિરસાધાય તાં હરિઃ ।
છલ કર્તું જગામાશુ પુનર્જાલન્ધરં પુરમ્ ॥ ૫૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયા પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધોપાખ્યાને જલન્ધરયુદ્ધવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૨.૫.૨૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૨૩. ત્રયોવિંશોઽધ્યાયઃ । જલન્ધરવધોપાખ્યાને વૃન્દાપાતિવ્રતભઙ્ગદેહત્યાગવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ વદ ત્વં વદતાં વર ।
કિમકાર્ષીદ્ધરિસ્તત્ર ધર્મં તત્યાજ સા કથમ્ ॥ ૧॥

સનત્કુમાર ઉવાચ ।

વિષ્ણુર્જાલન્ધરં ગત્વા દૈત્યસ્ય પુટભેદનમ્ ॥

પાતિવ્રત્યસ્ય ભઙ્ગાય વૃન્દાયાશ્ચાકરોન્મતિમ્ । ૨॥

વૃન્દાં સ દર્શયામાસ સ્વપ્નં માયાવિનાં વરઃ ।
સ્વયં તન્નગરોદ્યાનમાસ્થિતોઽદ્ભુતવિગ્રહઃ ॥ ૩॥

અથ વૃન્દા તદા દેવી તત્પત્ની નિશિ સુવ્રતા ।
હરેર્માયાપ્રભાવાત્તુ દુસ્સ્વપ્નં સા દદર્શ હ ॥ ૪॥

સ્વપ્નમધ્યે હિ સા વિષ્ણુમાયયા પ્રદદર્શ હ ।
ભર્ત્તારં મહિષારૂઢં તૈલાભ્યક્તં દિગમ્બરમ્ ॥ ૫॥

કૃષ્ણપ્રસૂનભૂષાઢ્યં ક્રવ્યાદગણસેવિતમ્ ।
દક્ષિણાશાં ગતં મુણ્ડં તમસા ચ વૃતં તદા ॥ ૬॥

સ્વપુરં સાગરે મગ્નં સહસૈવાત્મના સહ ।
ઇત્યાદિ બહુદુઃસ્વપ્નાન્નિશાન્તે સા દદર્શ હ ॥ ૭॥

તતઃ પ્રબુધ્ય સા બાલા તં સ્વપ્નં સ્વં વિચિન્વતી ।
દદર્શોદિતમાદિત્યં સચ્છિદ્રં નિષ્પ્રભં મુહુઃ ॥ ૮॥

તદનિષ્ટમિદં જ્ઞાત્વા રુદન્તી ભયવિહ્વલા ।
કુત્રચિન્નાપ સા શર્મ ગોપુરાટ્ટાલભૂમિષુ ॥ ૯॥

તતઃસખીદ્વયયુતા નગરોદ્યાનમાગમત્ ।
તત્રાપિ સા ગતા બાલા ન પ્રાપ કુત્રચિત્સુખમ્ ॥ ૧૦॥

તતો જલન્ધરસ્ત્રી સા નિર્વિણ્ણોદ્વિગ્નમાનસા ।
વનાદ્વનાન્તરં યાતા નૈવ વેદાત્મના તદા ॥ ૧૧॥

ભ્રમતી સા તતો બાલા દદર્શાતીવ ભીષણૌ ।
રાક્ષસૌ સિંહવદનૌ દૃષ્ટ્વા દશનભાસુરૌ ॥ ૧૨॥

તૌ દૃષ્ટ્વા વિહ્વલાતીવ પલાયનપરા તદા ।
દદર્શ તાપસં શાન્તં સશિષ્યં મૌનમાસ્થિતમ્ ॥ ૧૩॥

તતસ્તત્કણ્ઠમાસાદ્ય નિજાં બાહુલતાં ભયાત્ ।
મુને માં રક્ષ શરણમાગતાસ્મીત્યભાષત ॥ ૧૪॥

મુનિસ્તાં વિહ્વલાં દૃષ્ટ્વા રાક્ષસાનુગતાં તદા ।

હુઙ્કારેણૈવ તૌ ઘોરૌ ચકાર વિમુખૌ દ્રુતમ્ ॥ ૧૫॥

તદ્ હુઙ્કારભયત્રસ્તૌ દૃષ્ટ્વા તૌ વિમુખૌ ગતૌ ।
વિસ્મિતાતીવ દૈત્યેન્દ્રપત્ની સાભૂન્મુને હૃદિ ॥ ૧૬॥

તતસ્સા મુનિનાથં તં ભયાન્મુક્તા કૃતાઞ્જલિઃ ।
પ્રણમ્ય દણ્ડવદ્ભૂમૌ વૃન્દા વચનમબ્રવીત્ ॥ ૧૭॥

વૃન્દોવાચ ।
મુનિનાથ દયાસિન્ધો પરપીડાનિવારક ।
રક્ષિતાહં ત્વયા ઘોરાદ્ભયાદસ્માત્ખલોદ્ભવાત્ ॥ ૧૮॥

સમર્થઃ સર્વથા ત્વં હિ સર્વજ્ઞોઽપિ કૃપાનિધે ।
કિઞ્ચિદ્વિજ્ઞપ્તુમિચ્છામિ કૃપયા તન્નિશામય ॥ ૧૯॥

જલન્ધરો હિ મદ્ભર્ત્તા રુદ્રં યોદ્ધું ગતઃ પ્રભો ।
સ તત્રાસ્તે કથં યુદ્ધે તન્મે કથય સુવ્રત ॥ ૨૦॥

સનત્કુમાર ઉવાચ ।
મુનિસ્તદ્વાક્યમાકર્ણ્ય મૌનં કપટમાસ્થિતઃ ।
કર્ત્તું સ્વાર્થં વિધાનજ્ઞઃ કૃપયોર્ધ્વમવૈક્ષત ॥ ૨૧॥

તાવત્કપીશાવાયાતૌ તં પ્રણમ્યાગ્રતઃ સ્થિતૌ ।
તતસ્તદ્ભ્રૂલતાસંજ્ઞાનિયુક્તૌ ગગનં ગતૌ ॥ ૨૨॥

નીત્વા ક્ષણાર્દ્ધમાગત્ય પુનસ્તસ્યાગ્રતઃ સ્થિતૌ ।
તસ્યૈવ કં કબન્ધં ચ હસ્તાવાસ્તાં મુનીશ્વર ॥ ૨૩॥

શિરઃ કબન્ધં હસ્તૌ તૌ દૃષ્ટ્વાબ્ધિતનયસ્ય સા ।
પપાત મૂર્ચ્છિતા ભૂમૌ ભર્તૃવ્યસનદુઃખિતા ॥ ૨૪॥

વૃન્દોવાચ ।
યઃ પુરા સુખસંવાદૈર્વિનોદયસિ માં પ્રભો ।
સ કથં ન વદસ્યદ્ય વલ્લભાં મામનાગસમ્ ॥ ૨૫॥

યેન દેવાઃ સગન્ધર્વા નિર્જિતા વિષ્ણુના સહ ।
કથં સ તાપસેનાદ્ય ત્રૈલોક્યવિજયી હતઃ ॥ ૨૬॥

નાઙ્ગીકૃતં હિ મે વાક્યં રુદ્રતત્ત્વમજાનતા ।
પરં બ્રહ્મ શિવશ્ચેતિ વદન્ત્યા દૈત્યસત્તમ ॥ ૨૭॥

તતસ્ત્વં હિ મયા જ્ઞાતસ્તવ સેવાપ્રભાવતઃ ।
ગર્વિતેન ત્વયા નૈવ કુસઙ્ગવશગેન હિ ॥ ૨૮॥

ઇત્થં પ્રભાષ્ય બહુધા સ્વધર્મસ્થા ચ તત્પ્રિયા ।
વિલલાપ વિચિત્રં સા હૃદયેન વિદૂયતા ॥ ૨૯॥

તતઃસા ધૈર્યમાલમ્બ્ય દુઃખોચ્છ્વાસાન્વિમુઞ્ચતી ।
ઉવાચ મુનિવર્યં તં સુપ્રણમ્ય કૃતાઞ્જલિઃ ॥ ૩૦॥

કૃપાનિધે મુનિશ્રેષ્ઠ પરોપકરણાદર ।
મયિ કૃત્વા કૃપાં સાધો જીવયૈનં મમ પ્રભુમ્ ॥ ૩૧॥

યત્ત્વમસ્ય પુનઃ શક્તો જીવનાય મતો મમ ।
અતઃ સઞ્જીવયૈનં મે પ્રાણનાથં મુનીશ્વર ॥ ૩૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા દૈત્યપત્ની સા પતિવ્રત્યપરાયણા ।
પાદયોઃ પતિતા તસ્ય દુઃખશ્વાસાન્ વિમુઞ્ચતી ॥ ૩૩॥

મુનિરુવાચ ।
નાયં જીવયિતું શક્તો રુદ્રેણ નિહતો યુધિ ।
રુદ્રેણ નિહતા યુદ્ધે ન જીવન્તિ કદાચન ॥ ૩૪॥

તથાપિ કૃપયાવિષ્ટ એનં સઞ્જીવયામ્યહમ્ ।
રક્ષ્યાઃ શરણગાશ્ચેતિ જાનન્ધર્મં સનાતનમ્ ॥ ૩૫॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા સ મુનિસ્તસ્યા જીવયિત્વા પતિં મુને ।
અન્તર્દધે તતો વિષ્ણુઃ સર્વમાયાવિનાં વરઃ ॥ ૩૬॥

દ્રુતં સ જીવિતસ્તેનોત્થિતઃ સાગરનન્દનઃ ।
વૃન્દામાલિઙ્ગ્ય તદ્વક્ત્રં ચુચુમ્બ પ્રીતમાનસઃ ॥ ૩૭॥

અથ વૃન્દાપિ ભર્તારં દૃષ્ટ્વા હર્ષિતમાનસા ।
જહૌ શોકં ચ નિખિલં સ્વપ્નવદ્ હૃધ્યમન્યત ॥ ૩૮॥

અથ પ્રસન્નહૃદયા સા હિ સઞ્જાતહૃચ્છયા ।
રેમે તદ્વનમધ્યસ્થા તદ્યુક્તા બહુવાસરાન્ ॥ ૩૯॥

કદાચિત્સુરતસ્યાન્તે દૃષ્ટ્વા વિષ્ણું તમેવ હિ ।

નિર્ભર્ત્સ્ય ક્રોધસંયુક્તા વૃન્દા વચનમબ્રવીત્ ॥ ૪૦॥

વૃન્દોવાચ ।
ધિક્ તદેવં હરે શીલં પરદારાભિગામિનઃ ।
જ્ઞાતોઽસિ ત્વં મયા સમ્યઙ્માયી પ્રત્યક્ષતાપસઃ ॥ ૪૧॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા ક્રોધમાપન્ના દર્શયન્તી સ્વતેજસમ્ ।
શશાપ કેશવં વ્યાસ પાતિવ્રત્યરતા ચ સા ॥ ૪૨॥

રે મહાધમ દૈત્યારે પરધર્મવિદૂષક ।
ગૃહ્ણીષ્વ શઠ મદ્દત્તં શાપં સર્વવિષોલ્બણમ્ ॥ ૪૩॥

યૌ ત્વયા માયયા ખ્યાતૌ સ્વકીયૌ દર્શિતૌ મમ ।
તાવેવ રાક્ષસૌ ભૂત્વા ભાર્યાં તવ હરિષ્યતઃ ॥ ૪૪॥

ત્વં ચાપિ ભાર્યાદુઃખાર્તો વને કપિસહાયવાન્ ।
ભ્રમ સર્પેશ્વરેણાયં યસ્તે શિષ્યત્વમાગતઃ૪૫॥

ઇત્યુક્ત્વા સા તદા વૃન્દા પ્રવિશદ્ધવ્યવાહનમ્ ।
વિષ્ણુના વાર્યમાણાપિ તત્સ્થિતાસક્તચેતસા ॥ ૪૬॥

તસ્મિન્નવસરે દેવા બ્રહ્માદ્યા નિખિલા મુને ।
આગતાઃ ખે સમં દારૈઃ સદ્ગતિં વૈ દિદૃક્ષવઃ ॥ ૪૭॥

અથ દૈત્યેન્દ્રપત્ન્યાસ્તુ તજ્જ્યોતિઃ પરમં મહત્ ।
પશ્યતાં સર્વદેવાનામલોકમગમદ્દ્રુતમ્ ॥ ૪૮॥

શિવાતનૌ વિલીનં તદ્વૃન્દાતેજો બભૂવ હ ।
આસીજ્જયજયારાવઃ ખસ્થિતામરપઙ્ક્તિષુ ॥ ૪૯॥

એવં વૃન્દા મહારાજ્ઞી કાલનેમિસુતોત્તમા ।
પાતિવ્રત્યપ્રભાવાચ્ચ મુક્તિં પ્રાપ પરાં મુને ॥ ૫૦॥

તતો હરિસ્તામનુસંસ્મરન્મુહુ-
ર્વૃન્દાચિતાભસ્મરજોઽવગુણ્ઠિતઃ ।
તત્રૈવ તસ્થૌ સુરસિદ્ધસઙ્ઘકૈઃ
પ્રબોધ્યમાનોઽપિ યયૌ ન શાન્તિમ્ ॥ ૫૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધોપાખ્યાને વૃન્દાપાતિવ્રતભઙ્ગદેહત્યાગવર્ણનં નામ ત્રયોવિંશોऽધ્યાયઃ ॥ ૨.૫.૨૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૨૪. ચતુર્વિંશોऽધ્યાયઃ । જલન્ધરવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
વિધેઃ શ્રેષ્ઠસુત પ્રાજ્ઞઃ કથેયં શ્રાવિતાદ્ભુતા ।
તતશ્ચ કિમભૂદાજૌ કથં દૈત્યો હતો વદ ॥ ૧॥

સનત્કુમાર ઉવાચ ।
અદૃશ્ય ગિરિજાં તત્ર દૈત્યેન્દ્રે રણમાગતે ।
ગાન્ધર્વે ચ વિલીને હિ ચૈતન્યોऽભૂદ્વૃષધ્વજઃ ॥ ૨॥

અન્તર્ધાનગતાં માયાં દૃષ્ટ્વા બુદ્ધો હિ શઙ્કરઃ ।
ચુક્રોધાતીવ સંહારી લૌકિકીં ગતિમાશ્રિતઃ ॥ ૩॥

તતઃ શિવો વિસ્મિતમાનસઃ પુન-
ર્જગામ યુદ્ધાય જલન્ધરં રુષા ।
સ ચાપિ દૈત્યઃ પુનરાગતં શિવં
દૃષ્ટ્વા શરોઘૈઃસમવાકિરદ્રણે ॥ ૪॥

ક્ષિપ્તં પ્રભુસ્તં શરજાલમુગ્રં
જલન્ધરેણાતિબલીયસા હરઃ ।
દ્રુતં પ્રચિચ્છેદશરૈર્વરૈર્નિજૈ-
ર્ન ચિત્રમત્ર ત્રિભવપ્રહન્તુઃ ॥ ૫॥

તતો જલન્ધરો દૃષ્ટ્વા રુદ્રમદ્ભુતવિક્રમમ્ ।
ચકાર માયયા ગૌરીં ત્ર્યમ્બકં મોહયન્નિવ ॥ ૬॥

રથોપરિ ગતાં બદ્ધાં રુદન્તીં પાર્વતીં શિવઃ ।
નિશુમ્ભશુમ્ભદૈત્યૈશ્ચ વધ્યમાનાં દદર્શ સઃ ॥ ૭॥

ગૌરીં તથાવિધાં દૃષ્ટ્વા લૌકિકીં દર્શયન્ ગતિમ્ ।

બભૂવ પ્રાકૃત ઇવ શિવોઽપ્યુદ્વિગ્નમાનસઃ ॥ ૮॥

અવાઙ્મુખસ્થિતસ્તૂષ્ણીં નાનાલીલાવિશારદઃ ।
શિથિલાઙ્ગો વિષણ્ણાત્મા વિસ્મૃત્ય સ્વપરાક્રમમ્ ॥ ૯॥

તતો જલન્ધરો વેગાત્ ત્રિભિર્વિવ્યાધ સાયકૈઃ ।
આપુઙ્ખમગ્નૈસ્તં રુદ્રં શિરસ્યુરસિ ચોદરે ॥ ૧૦॥

તતો રુદ્રો મહાલીલો જ્ઞાતતત્ત્વઃ ક્ષણાત્પ્રભુઃ ।
રૌદ્રરૂપધરો જાતો જ્વાલામાલાતિભીષણઃ ॥ ૧૧॥

તસ્યાતીવ મહારૌદ્રરૂપં દૃષ્ટ્વા મહાસુરાઃ ।
ન શેકુઃ પ્રમુખે સ્થાતું ભેજિરે તે દિશો દશ ॥ ૧૨॥

નિશુમ્ભશુમ્ભાવપિ યૌ વિખ્યાતૌ વીરસત્તમૌ ।
અપિ તૌ શેકતુર્નૈવ રણે સ્થાતું મુનીશ્વર ॥ ૧૩॥

જલન્ધરકૃતા માયાન્તર્હિતાભૂચ્ચ તત્ક્ષણમ્ ।
હાહાકારો મહાનાસીત્સઙ્ગ્રામે સર્વતોમુખે ॥ ૧૪॥

તતઃ શાપં દદૌ રુદ્રસ્તયોઃ શુમ્ભનિશુમ્ભયોઃ ।
પલાયમાનૌ તૌ દૃષ્ટ્વા ધિક્કૃત્ય ક્રોધસંયુતઃ ॥ ૧૫॥

રુદ્ર ઉવાચ ।
યુવાં દુષ્ટાવતિખલાવપરાધકરૌ મમ ।
પાર્વતીદણ્ડદાતારૌ રણાદસ્માત્પરાઙ્મુખૌ ॥ ૧૬॥

પરાઙ્મુખો ન હન્તવ્ય ઇતિ વધ્યૌ ન મે યુવામ્ ।
મમ યુદ્ધાદતિક્રાન્તૌ ગૌર્યા વધ્યૌ ભવિષ્યતઃ ॥ ૧૭॥

એવં વદતિ ગૌરીશે સિન્ધુપુત્રો જલન્ધરઃ ।
ચુક્રોધાતીવ રુદ્રાય જ્વલજ્જ્વલનસન્નિભઃ ॥ ૧૮॥

રુદ્રે રણે મહાવેગાદ્વવર્ષ નિશિતાન્ શરાન્ ।
બાણાન્ધકારસઞ્છન્નં તથા ભૂમિતલં હ્યભૂત્ ॥ ૧૯॥

યાવદ્ રુદ્રઃ પ્રચિચ્છેદ તસ્ય બાણગણાન્ દ્રુતમ્ ।
તાવત્સ પરિઘેણાશુ જઘાન વૃષભં બલી ॥ ૨૦॥

વૃષસ્તેન પ્રહારેણ પરવૃત્તો રણાઙ્ગણાત્ ।
રુદ્રેણ કૃશ્યમાણોઽપિ ન તસ્થૌ રણભૂમિષુ ॥ ૨૧॥

અથ લોકે મહારુદ્રઃ સ્વીયં તેજોઽતિદુઃસહમ્ ।
દર્શયામાસ સર્વસ્મૈ સત્યમેતન્મુનીશ્વર ॥ ૨૨॥

તતઃ પરમસઙ્ક્રુદ્ધો રુદ્રો રૌદ્રવપુર્ધરઃ ।
પ્રલયાનલવદ્ ઘોરો બભૂવ સહસા પ્રભુઃ ॥ ૨૩॥

દૃષ્ટ્વા પુરઃસ્થિતં દૈત્યં મેરુકૂટમિવ સ્થિતમ્ ।
અવધ્યત્વમપિ શ્રુત્વાપ્યન્યૈરભ્યુદ્યતોઽભવત્ ॥ ૨૪॥

બ્રહ્મણો વચનં રક્ષન્ રક્ષકો જગતાં પ્રભુઃ ।
હૃદાનુગ્રહમાતન્વંસ્તદ્વધાય મનો દધત્ ॥ ૨૫॥

કોપં કૃત્વા પરં શૂલી પાદાઙ્ગુષ્ઠેન લીલયા ।
મહામ્ભસિ ચકારાશુ રથાઙ્ગં રૌદ્રમદ્ભુતમ્ ॥ ૨૬॥

કૃત્વાર્ણવામ્ભસિ શિતં ભગવાન્ રથાઙ્ગં
સ્મૃત્વા જગત્ત્રયમનેન હતં પુરારિઃ ।
દક્ષાન્ધકાન્તકપુરત્રયયજ્ઞહન્તા
લોકત્રયાન્તકકરઃ પ્રહસન્નુવાચ ॥ ૨૭॥

મહારુદ્ર ઉવાચ ।
પાદેન નિર્મિતં ચક્રં જલન્ધર મહામ્ભસિ ।
બલવાન્યદિ ચોદ્ધર્તું તિષ્ઠ યોદ્ધું ન ચાન્યથા ॥ ૨૮॥

સનત્કુમાર ઉવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા ક્રોધેનાદીપ્તલોચનઃ ।
પ્રદહન્નિવ ચક્ષુર્ભ્યાં પ્રાહાલોક્ય સ શઙ્કરમ્ ॥ ૨૯॥

જલન્ધર ઉવાચ ।
રેખામુદ્ધૃત્ય હત્વા ચ સગણં ત્વાં હિ શઙ્કર ।
હત્વા લોકાન્સુરૈઃ સાર્ધં સ્વભાગં ગરુડો યથા ॥ ૩૦॥

હન્તું ચરાચરં સર્વં સમર્થોઽહં સવાસવમ્ ।
કો મહેશ્વર મદ્બાણૈરભેદ્યો ભુવનત્રયે ॥ ૩૧॥

બાલભાવેન ભગવાન્તપસૈવ વિનિર્જિતઃ ।
બ્રહ્મા બલિષ્ઠઃ સ્થાને મે મુનિભિઃ સુરપુઙ્ગવૈઃ ॥ ૩૨॥

દગ્ધં ક્ષણેન સકલં ત્રૈલોક્યં સચરાચરમ્ ।
તપસા કિં ત્વયા રુદ્ર નિર્જિતો ભગવાનપિ ॥ ૩૩॥

ઇન્દ્રાગ્નિયમવિત્તેશવાયુવારીશ્વરાદયઃ ।
ન સેહિરે યથા નાગા ગન્ધં પક્ષિપતેરિવ ॥ ૩૪॥

ન લબ્ધં દિવિ ભૂમૌ ચ વાહનં મમ શઙ્કર ।
સમસ્તાન્પર્વતાન્પ્રાપ્ય ધર્ષિતાશ્ચ ગણેશ્વરાઃ ॥ ૩૫॥

ગિરીન્દ્રો મન્દરઃ શ્રીમાન્નીલો મેરુઃ સુશોભનઃ ।
ધર્ષિતો બાહુદણ્ડેન કણ્ડ્વા ઉત્સર્પણાય મે ॥ ૩૬॥

ગઙ્ગા નિરુદ્ધા બાહુભ્યાં લીલાર્થં હિમવદ્ગિરૌ ।
અરીણાં મમ ભૃત્યૈશ્ચ જયો લબ્ધો દિવૌકસામ્ ॥ ૩૭॥

વડવાયા મુખં બદ્ધં ગૃહીત્વા તાં કરેણ તુ ।
તત્ક્ષણાદેવ સકલમેકાર્ણવમભૂત્તદા ॥ ૩૮॥

ઐરાવતાદયો નાગાઃ ક્ષિપ્તાઃ સિન્ધુજલોપરિ ।
સરથો ભગવાનિન્દ્રઃ ક્ષિપ્તશ્ચ શતયોજનમ્ ॥ ૩૯॥

ગરુડોઽપિ મયા બદ્ધો નાગપાશેન વિષ્ણુના ।
ઉર્વશ્યાદ્યા મયાનીતા નાર્યઃ કારાગૃહાન્તરમ્ ॥ ૪૦॥

માં ન જાનાસિ રુદ્ર ત્વં ત્રૈલોક્યજયકારિણમ્ ।
જલન્ધરં મહાદૈત્યં સિન્ધુપુત્રં મહાબલમ્ ॥ ૪૧॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વાથ મહાદેવં તદા વારિધિનન્દનઃ ।
ન ચચાલ ન સસ્માર નિહતાન્દાનવાન્યુધિ ॥ ૪૨॥

દુર્મદેનાવિનીતેન દોર્ભ્યામાસ્ફોટ્ય દોર્બલાત્ ।
તિરસ્કૃતો મહાદેવો વચનૈઃ કટુકાક્ષરૈઃ ॥ ૪૩॥

તચ્છ્રુત્વા દૈત્યવચનમમઙ્ગલમતીરિતમ્ ।
વિજહાસ મહાદેવઃ પરમં ક્રોધમાદધે ॥ ૪૪॥

સુદર્શનાખ્યં યચ્ચક્રં પાદાઙ્ગુષ્ઠવિનિર્મિતમ્ ।
જગ્રાહ તત્કરે રુદ્રસ્તેન હન્તું સમુદ્યતઃ ॥ ૪૫॥

સુદર્શનાખ્યં તચ્ચક્રં ચિક્ષેપ ભગવાન્હરઃ ।

કોટિસૂર્યપ્રતીકાશં પ્રલયાનલસન્નિભમ્ ॥ ૪૬॥

પ્રદહદ્રોદસી વેગાત્તદાસાદ્ય જલન્ધરમ્ ।
જહાર તચ્છિરો વેગાન્મહદાયતલોચનમ્ ॥ ૪૭॥

રથાત્કાયઃ પપાતોર્વ્યાં નાદયન્વસુધાતલમ્ ।
શિરશ્ચાપ્યબ્ધિપુત્રસ્ય હાહાકારો મહાનભૂત્ ॥ ૪૮॥

દ્વિધા પપાત તદ્દેહો હ્યઞ્જનાદ્રિરિવાચલઃ ।
કુલિશેન યથા વારાન્નિધૌ ગિરિવરો દ્વિધા ॥ ૪૯॥

તસ્ય રૌદ્રેણ રક્તેન સમ્પૂર્ણમભવજ્જગત્ ।
તતઃસમસ્તા પૃથિવી વિકૃતાભૂન્મુનીશ્વર ॥ ૫૦॥

તદ્રક્તમખિલં રુદ્રનિયોગાન્માંસમેવ ચ ।
મહારૌરવમાસાદ્ય રક્તકુણ્ડમભૂદિહ ॥ ૫૧॥

તત્તેજો નિર્ગતં દેહાદ્ રુદ્રે ચ લયમાગમત્ ।
વૃન્દાદેહોદ્ભવં યદ્વદ્ગૌર્ય્યાં હિ વિલયં ગતમ્ ॥ ૫૨॥

જલન્ધરં હતં દૃષ્ટ્વા દેવગન્ધર્વપન્નગાઃ ।
અભવન્સુપ્રસન્નાશ્ચ સાધુ દેવેતિ ચાબ્રુવન્ ॥ ૫૩॥

સર્વે પ્રસન્નતાં યાતા દેવસિદ્ધમુનીશ્વરાઃ ।
પુષ્પવૃષ્ટિં પ્રકુર્વાણાસ્તદ્યશો જગુરુચ્ચકૈઃ ॥ ૫૪॥

દેવાઙ્ગના મહામોદાન્નનૃતુઃ પ્રેમવિહ્વલાઃ ।
કલસ્વરાઃ કલપદં કિન્નરૈઃ સહ સઞ્જગુઃ ॥ ૫૫॥

દિશઃ પ્રસેદુઃ સર્વાશ્ચ હતે વૃન્દાપતૌ મુને ।
વવુઃ પુણ્યાઃ સુખસ્પર્શા વાયવસ્ત્રિવિધા અપિ ॥ ૫૬॥

ચન્દ્રમાઃ શીતતાં યાતો રવિસ્તેપે સુતેજસા ।
અગ્નયો જજ્વલુઃ શાન્તા બભૂવાવિકૃતં નભઃ ॥ ૫૭॥

એવં ત્રૈલોક્યમખિલં સ્વાસ્થ્યમાપાધિકં મુને ।
હતેઽબ્ધિતનયે તસ્મિન્હરેણાનન્તમૂર્તિના ॥ ૫૮॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધોપાખ્યાને જલન્ધરવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૨.૫.૨૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૨૫. પઞ્ચવિંશોઽધ્યાયઃ । જલન્ધરવધોપાખ્યાને દેવસ્તુતિવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
અથ બ્રહ્માદયો દેવા મુનયશ્ચાખિલાસ્તથા ।
તુષ્ટુવુર્દેવદેવેશં વાગ્ભિરિષ્ટાભિરાનતાઃ ॥ ૧॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ શરણાગતવત્સલ ।
સાધુસૌખ્યપ્રદસ્ત્વં હિ સર્વદા ભક્તદુઃખહા ॥ ૨॥

ત્વં મહાદ્ભુતસલ્લીલો ભક્તિગમ્યો દુરાસદઃ ।
દુરારાધ્યોઽસતાં નાથ પ્રસન્નઃ સર્વદા ભવ ॥ ૩॥

વેદોઽપિ મહિમાનં તે ન જાનાતિ હિ તત્ત્વતઃ ।
યથામતિ મહાત્માનઃ સર્વે ગાયન્તિ સદ્યશઃ ॥ ૪॥

માહાત્મ્યમતિગૂઢં તે સહસ્રવદનાદયઃ ।
સદા ગાયન્તિ સુપ્રીત્યા પુનન્તિ સ્વગિરં હિ તે ॥ ૫॥

કૃપયા તવ દેવેશ બ્રહ્મજ્ઞાની ભવેજ્જડઃ ।
ભક્તિગમ્યઃ સદા ત્વં વા ઇતિ વેદા બ્રુવન્તિ હિ ॥ ૬॥

ત્વં વૈ દીનદયાલુશ્ચ સર્વત્ર વ્યાપકઃ સદા ।
આવિર્ભવસિ સદ્ભક્ત્યા નિર્વિકારઃસતાં ગતિઃ ॥ ૭॥

ભક્ત્યૈવ તે મહેશાન બહવઃ સિદ્ધિમાગતાઃ ।
ઇહ સર્વસુખં ભુક્ત્વા દુઃખિતા નિર્વિકારતઃ ॥ ૮॥

પુરા યદુપતિર્ભક્તો દાશાર્હઃ સિદ્ધિમાગતઃ ।
કલાવતી ચ તત્પત્ની ભક્ત્યૈવ પરમાં પ્રભો ॥ ૯॥

તથા મિત્રસહો રાજા મદયન્તી ચ તત્પ્રિયા ।
ભક્ત્યૈવ તવ દેવેશ કૈવલ્યં પરમં યયૌ ॥ ૧૦॥

સૌમિની નામ તનયા કૈકેયાગ્રભુવસ્તથા ।
તવ ભક્ત્યા સુખં પ્રાપ પરં સદ્યોગિદુર્લભમ્ ॥ ૧૧॥

વિમર્ષણો નૃપવરઃ સપ્તજન્માવધિ પ્રભો ।
ભુક્ત્વા ભોગાંશ્ચ વિવિધાંસ્ત્વદ્ભક્ત્યા પ્રાપ સદ્ગતિમ્ ॥ ૧૨॥

ચન્દ્રસેનો નૃપવરઃ ત્વદ્ભક્ત્યા સર્વભોગભુક્ ।
દુઃખમુક્તઃ સુખં પ્રાપ પરમત્ર પરત્ર ચ ॥ ૧૩॥

ગોપીપુત્રઃ શ્રીકરસ્તે ભક્ત્યા ભુક્ત્વેહ સદ્ગતિમ્ ।
પરં સુખં મહાવીરશિષ્યઃ પ્રાપ પરત્ર વૈ । ૧૪॥

ત્વં સત્યરથભૂજાનેર્દુઃખહર્તા ગતિપ્રદઃ ।
ધર્મગુપ્તં રાજપુત્રમતાર્ષીઃસુખિનં ત્વિહ ॥ ૧૫॥

તથા શુચિવ્રતં વિપ્રમદરિદ્રં મહાપ્રભો ।
ત્વદ્ભક્તિવર્તિનં માત્રા જ્ઞાનિનં કૃપયાઽકરોઃ ॥ ૧૬॥

ચિત્રવર્મા નૃપવરસ્ત્વદ્ભક્ત્યા પ્રાપ સદ્ગતિમ્ ।
ઇહ લોકે સદા ભુક્ત્વા ભોગાનમરદુર્લભાન્ ॥ ૧૭॥

ચન્દ્રાઙ્ગદો રાજપુત્રઃ સીમન્તિન્યા સ્ત્રિયા સહ ।
વિહાય સકલં દુઃખં સુખી પ્રાપ મહાગતિમ્ ॥ ૧૮॥

દ્વિજો મન્દરનામાપિ વેશ્યાગામી ખલોઽધમઃ ।
ત્વદ્ભક્તઃ શિવ સમ્પૂજ્ય તયા સહ ગતિં ગતઃ ॥ ૧૯॥

ભદ્રાયુસ્તે નૃપસુતઃ સુખમાપ ગતવ્યથઃ ।
ત્વદ્ભક્તિકૃપયા માત્રા ગતિં ચ પરમાં પ્રભો ॥ ૨૦॥

સર્વસ્ત્રીભોગનિરતો દુર્જનસ્તવ સેવયા ।
વિમુક્તોઽભૂદપિ સદાઽભક્ષ્યભોજી મહેશ્વર ॥ ૨૧॥

શમ્બરઃ શઙ્કરે ભક્તશ્ચિતાભસ્મધરઃ સદા ।
નિયમાદ્ભસ્મનઃ શમ્ભો સ્વસ્ત્રિયા તે પુરં ગતઃ ॥ ૨૨॥

ભદ્રસેનસ્ય તનયસ્તથા મન્ત્રિસુતઃ પ્રભો ।
સુધર્મશુભકર્માણો સદા રુદ્રાક્ષધારિણૌ ॥ ૨૩॥

ત્વત્કૃપાતશ્ચ તૌ મુક્તાવાસ્તાં ભુક્ત્વેહ સત્સુખમ્ ।
પૂર્વજન્મનિ યૌ કીશકુક્કુટૌ રુદ્રભૂષણૌ ॥ ૨૪॥

પિઙ્ગલા ચ મહાનન્દા વેશ્યે દ્વે તવ ભક્તિતઃ ।
સદ્ગતિં પ્રાપતુર્નાથ ભક્તોદ્ધારપરાયણ ॥ ૨૫॥

શારદા વિપ્રતનયા બાલવૈધવ્યમાગતા ।
તવ ભક્તેઃ પ્રભાવાત્તુ પુત્રસૌભાગ્યવત્યભૂત્ ॥ ૨૬॥

બિન્દુગો દ્વિજમાત્રો હિ વેશ્યાભોગી ચ તત્પ્રિયા ।
વઞ્ચુકા ત્વદ્યશઃ શ્રુત્વા પરમાં ગતિમાયયૌ ॥ ૨૭॥

ઇત્યાદિ બહવઃ સિદ્ધિં ગતા જીવાસ્તવ પ્રભો ।
ભક્તિભાવાન્મહેશાન દીનબન્ધો કૃપાલય ॥ ૨૮॥

ત્વં પરઃ પ્રકૃતેર્બ્રહ્મ પુરુષાત્પરમેશ્વર ।
નિર્ગુણસ્ત્રિગુણાધારો બ્રહ્મવિષ્ણુહરાત્મકઃ ॥ ૨૯॥

નાનાકર્મકરો નિત્યં નિર્વિકારોઽખિલેશ્વરઃ ।
વયં બ્રહ્માદયઃ સર્વે તવ દાસા મહેશ્વર ॥ ૩૦॥

પ્રસન્નો ભવ દેવેશ રક્ષાસ્માન્સર્વદા શિવ ।
ત્વત્પ્રજાશ્ચ વયં નાથ સદા ત્વચ્છરણં ગતાઃ ॥ ૩૧॥

સનત્કુમાર ઉવાચ ।
ઇતિ સ્તુત્વા ચ તે દેવા બ્રહ્માદ્યાઃ સમુનીશ્વરાઃ ।
તૂષ્ણીં બભૂવુર્હિ તદા શિવાઙ્ઘ્રિદ્વન્દ્વચેતસઃ ॥ ૩૨॥

અથ શમ્ભુર્મહેશાનઃ શ્રુત્વા દેવસ્તુતિં શુભામ્ ।
દત્ત્વા વરાન્ વરાન્ સદ્યઃ તત્રૈવાન્તર્દધે પ્રભુઃ ॥ ૩૩॥

દેવાઃસર્વેઽપિ મુદિતા બ્રહ્માદ્યા હતશત્રવઃ ।
સ્વં સ્વં ધામ યયુઃ પ્રીતા ગાયન્તઃ શિવસદ્યશઃ ॥ ૩૪॥

ઇદં પરમમાખ્યાનં જલન્ધરવિમર્દનમ્ ।
મહેશચરિતં પુણ્યં મહાઘૌઘવિનાશનમ્ ॥ ૩૫॥

દેવસ્તુતિરિયં પુણ્યા સર્વપાપપ્રણાશિની ।
સર્વસૌખ્યપ્રદા નિત્યં મહેશાનન્દદાયિની ॥ ૩૬॥

યઃ પઠેત્પાઠયેદ્વાપિ સમાખ્યાનમિદં દ્વયમ્ ।
સ ભુક્ત્વેહ પરં સૌખ્યં ગાણપત્યમવાપ્નુયાત્ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધોપાખ્યાને દેવસ્તુતિવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૨.૫.૨૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૨૬. ષડ્વિંશોઽધ્યાયઃ । જલન્ધરવધાનન્તરદેવીસ્તુતિવિષ્ણુમોહવિધ્વંસવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
બ્રહ્મપુત્ર નમસ્તેઽસ્તુ ધન્યસ્ત્વં શૈવસત્તમ ।
યચ્છ્રાવિતા મહાદિવ્યા કથેયં શાઙ્કરી શુભા ॥ ૧॥

ઇદાનીં બ્રૂહિ સુપ્રીત્યા ચરિતં વૈષ્ણવં મુને ।
સ વૃન્દાં મોહયિત્વા તુ કિમકાર્ષીત્કુતો ગતઃ ॥ ૨॥

સનત્કુમાર ઉવાચ ।
શૃણુ વ્યાસ મહાપ્રાજ્ઞ શૈવપ્રવર સત્તમ ।
વૈષ્ણવં ચરિતં શમ્ભુચરિતાઢ્યં સુનિર્મલમ્ ॥ ૩॥

મૌનીભૂતેષુ દેવેષુ બ્રહ્માદિષુ મહેશ્વરઃ ।
સુપ્રસન્નોઽવદચ્છમ્ભુઃ શરણાગતવત્સલઃ ॥ ૪॥

શમ્ભુરુવાચ ।
બ્રહ્મન્દેવવરાઃ સર્વે ભવદર્થે મયા હતઃ ।
જલન્ધરો મદંશોઽપિ સત્યં સત્યં વદામ્યહમ્ ॥ ૫॥

સુખમાપુર્ન વા તાતાઃ સત્યં બ્રૂતામરાઃ ખલુ ।
ભવત્કૃતે હિ મે લીલા નિર્વિકારસ્ય સર્વદા ॥ ૬॥

સનત્કુમાર ઉવાચ ।
અથ બ્રહ્માદયો દેવા હર્ષાદુત્ફુલ્લલોચનાઃ ।
પ્રણમ્ય શિરસા રુદ્રં શશંસુર્વિષ્ણુચેષ્ટિતમ્ ॥ ૭॥

દેવા ઊચુઃ ।
મહાદેવ ત્વયા દેવ રક્ષિતાઃ શત્રુજાદ્ ભયાત્ ।
કિઞ્ચિદન્યત્સમુદ્ભૂતં તત્ર કિં કરવામહૈ ॥ ૮॥

વૃન્દા વિમોહિતા નાથ વિષ્ણુના હિ પ્રયત્નતઃ ।
ભસ્મીભૂતા દ્રુતં વહ્નૌ પરમાં ગતિમાગતા ॥ ૯॥

વૃન્દાલાવણ્યસમ્ભ્રાન્તો વિષ્ણુસ્તિષ્ઠતિ મોહિતઃ ।
તચ્ચિતાભસ્મસન્ધારી તવ માયાવિમોહિતઃ ॥ ૧૦॥

સ સિદ્ધમુનિસઙ્ઘૈશ્ચ બોધિતોઽસ્માભિરાદરાત્ ।
ન બુધ્યતે હરિઃ સોઽથ તવ માયાવિમોહિતઃ ॥ ૧૧॥

કૃપાં કુરુ મહેશાન વિષ્ણું બોધય બોધય ।
ત્વદધીનમિદં સર્વં પ્રાકૃતં સચરાચરમ્ ॥ ૧૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય મહેશો હિ વચનં ત્રિદિવૌકસામ્ ।
પ્રત્યુવાચ મહાલીલઃ સ્વચ્છન્દસ્તાન્કૃતાઞ્જલીન્ ॥ ૧૩॥

મહેશ ઉવાચ ।
હે બ્રહ્મન્હે સુરાઃ સર્વે મદ્વાક્યં શ‍ૃણુતાદરાત્ ।
મોહિની સર્વલોકાનાં મમ માયા દુરત્યયા ॥ ૧૪॥

તદધીનં જગત્સર્વં યદ્દેવાસુરમાનુષમ્ ।
તયૈવ મોહિતો વિષ્ણુઃ કામાધીનોઽભવદ્ધરિઃ ॥ ૧૫॥

ઉમાખ્યા સા મહાદેવી ત્રિદેવજનની પરા ।
મૂલપ્રકૃતિરાખ્યાતા સુરામા ગિરિજાત્મિકા ॥ ૧૬॥

ગચ્છધ્વં શરણં દેવા વિષ્ણુમોહાપનુત્તયે ।
શરણ્યાં મોહિનીં માયાં શિવાખ્યાં સર્વકામદામ્ ॥ ૧૭॥

સ્તુતિં કુરુત તસ્યાશ્ચ મચ્છક્તેસ્તોષકારિણીમ્ ।
સુપ્રસન્ના યદિ ચ સા સર્વં કાર્યં કરિષ્યતિ ॥ ૧૮॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા તાન્સુરાન્ શમ્ભુઃ પઞ્ચાસ્યો ભગવાન્હરઃ ।
અન્તર્દધે દ્રુતં વ્યાસ સર્વૈશ્ચ સ્વગણૈઃ સહ ॥ ૧૯॥

દેવાશ્ચ શાસનાચ્છમ્ભોર્બ્રહ્માદ્યા હિ સવાસવાઃ ।
મનસા તુષ્ટુવુર્મૂલપ્રકૃતિં ભક્તવત્સલામ્ ॥ ૨૦॥

દેવા ઊચુઃ ।
યદુદ્ભવાઃ સત્ત્વરજસ્તમોગુણાઃ
સર્ગસ્થિતિધ્વંસવિધાનકારકાઃ ।
યદિચ્છયા વિશ્વમિદં ભવાભવૌ
તનોતિ મૂલપ્રકૃતિં નતાઃ સ્મ તામ્ ॥ ૨૧॥

પાહિ ત્રયોવિંશગુણાન્ સુશબ્દિતાન્
જગત્યશેષે સમધિષ્ઠિતા પરા ।
યદ્રૂપકર્માણિ જગત્ત્રયોઽપિ તે
વિદુર્ન મૂલપ્રકૃતિં નતાઃ સ્મ તામ્ ॥ ૨૨॥

યદ્ભક્તિયુક્તાઃ પુરુષાસ્તુ નિત્યં
દારિદ્ર્યમોહાત્યયસમ્ભવાદીન્ ।
ન પ્રાપ્નુવન્ત્યેવ હિ ભક્તવત્સલાં
સદૈવ મૂલપ્રકૃતિં નતાઃ સ્મ તામ્ ॥ ૨૩॥

કુરુ કાર્યં મહાદેવિ દેવાનાં નઃ પરેશ્વરિ ।
વિષ્ણુમોહં હર શિવે દુર્ગે દેવિ નમોઽસ્તુ તે ॥ ૨૪॥

જલન્ધરસ્ય શમ્ભોશ્ચ રણે કૈલાસવાસિનઃ ।
પ્રવૃત્તે તદ્વધાર્થાય ગૌરીશાસનતઃ શિવે ॥ ૨૫॥

વૃન્દા વિમોહિતા દેવિ વિષ્ણુના હિ પ્રયત્નતઃ ।
સ્વવૃષાત્ત્યાજિતા વહ્નૌ ભસ્મીભૂતા ગતિં ગતા ॥ ૨૬॥

જલન્ધરો હતો યુદ્ધે તદ્ભયાન્મોચિતા વયમ્ ।
ગિરિશેન કૃપાં કૃત્વા ભક્તાનુગ્રહકારિણા ॥ ૨૭॥

તદાજ્ઞયા વયં સર્વે શરણં તે સમાગતાઃ ।
ત્વં હિ શમ્ભુર્યુવાં દેવિ ભક્તોદ્ધારપરાયણૌ ॥ ૨૮॥

વૃન્દાલાવણ્યસમ્ભ્રાન્તો વિષ્ણુસ્તિષ્ઠતિ તત્ર વૈ ।
તચ્ચિતાભસ્મસન્ધારી જ્ઞાનભ્રષ્ટો વિમોહિતઃ ॥ ૨૯॥

સંસિદ્ધસુરસઙ્ઘૈશ્ચ બોધિતોઽપિ મહેશ્વરિ ।
ન બુધ્યતે હરિઃ સોઽથ તવ માયાવિમોહિતઃ ॥ ૩૦॥

કૃપાં કુરુ મહાદેવિ હરિં બોધય બોધય ।
યથા સ્વલોકં પાયાત્સ સુચિત્તઃ સુરકાર્યકૃત્ ॥ ૩૧॥

ઇતિ સ્તુવન્તસ્તે દેવાઃ તેજોમણ્ડલમાસ્થિતમ્ ।
દદૃશુર્ગગને તત્ર જ્વાલાવ્યાપ્તદિગન્તરમ્ ॥ ૩૨॥

તન્મધ્યાદ્ભારતીં સર્વે બ્રહ્માદ્યાશ્ચ સવાસવાઃ ।
અમરાઃ શુશ્રુવુર્વ્યાસ કામદાં વ્યોમચારિણીમ્ ॥ ૩૩॥

આકાશવાણ્યુવાચ ।
અહમેવ ત્રિધા ભિન્ના તિષ્ઠામિ ત્રિવિધૈર્ગુણૈઃ ।
ગૌરી લક્ષ્મીઃ સુરા જ્યોતી રજઃસત્ત્વતમોગુણૈઃ ॥ ૩૪॥

તત્ર ગચ્છત યૂયં વૈ તાસામન્તિક આદરાત્ ।
મદાજ્ઞયા પ્રસન્નાસ્તા વિધાસ્યન્તે તદીપ્સિતમ્ ॥ ૩૫॥

સનત્કુમાર ઉવાચ ।
શ્ૃણ્વતામિતિ તાં વાચમન્તર્દ્ધાનમગાન્મહઃ ।
દેવાનાં વિસ્મયોત્ફુલ્લનેત્રાણાં તત્તદા મુને ॥ ૩૬॥

તતઃ સર્વેઽપિ તે દેવાઃ શ્રુત્વા તદ્વાક્યમાદરાત્ ।
ગૌરીં લક્ષ્મીં સુરાં ચૈવ નેમુસ્તદ્વાક્યચોદિતાઃ ॥ ૩૭॥

તુષ્ટુવુશ્ચ મહાભક્ત્યા દેવીસ્તાઃ સકલાઃસુરાઃ ।
નાનાવિધાભિર્વાગ્ભિસ્તે બ્રહ્માદ્યા નતમસ્તકાઃ ॥ ૩૮॥

તતોઽરં વ્યાસ દેવ્યસ્તા આવિર્ભૂતાશ્ચ તત્પુરઃ ।
મહાદ્ભુતૈઃ સ્વતેજોભિર્ભાસયન્ત્યો દિગન્તરમ્ ॥ ૩૯॥

અથ તા અમરા દૃષ્ટ્વા સુપ્રસન્નેન ચેતસા ।
પ્રણમ્ય તુષ્ટુવુર્ભક્ત્યા સ્વકાર્યં ચ ન્યવેદયન્ ॥ ૪૦॥

તતશ્ચૈતાઃ સુરાન્દૃષ્ટ્વા પ્રણતાન્ભક્તવત્સલાઃ ।
બીજાનિ પ્રદદુસ્તેભ્યો વાક્યમૂચુશ્ચ સાદરમ્ ॥ ૪૧॥

દેવ્ય ઊચુઃ ।
ઇમાનિ તત્ર બીજાનિ વિષ્ણુર્યત્રાવતિષ્ઠતિ ।
નિર્વપધ્વં તતઃ કાર્યં ભવતાં સિદ્ધિમેષ્યતિ ॥ ૪૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા તાસ્તતો દેવ્યોઽન્તર્હિતા અભવન્મુને ।

રુદ્રવિષ્ણુવિધીનાં હિ શક્તયસ્ત્રિગુણાત્મિકાઃ ॥ ૪૩॥

તતસ્તુષ્ટાઃ સુરાઃસર્વે બ્રહ્માદ્યાશ્ચ સવાસવાઃ ।
તાનિ બીજાનિ સઙ્ગૃહ્ય યયુર્યત્ર હરિઃ સ્થિતઃ ॥ ૪૪॥

વૃન્દાચિતાભૂમિતલે ચિક્ષિપુસ્તાનિ તે સુરાઃ ।
સ્મૃત્વા તાઃ સંસ્થિતાસ્તત્ર શિવશક્ત્યંશકા મુને ॥ ૪૫॥

નિક્ષિપ્તેભ્યશ્ચ બીજેભ્યો વનસ્પત્યસ્ત્રયોઽભવન્ ।
ધાત્રી ચ માલતી ચૈવ તુલસી ચ મુનીશ્વર ॥ ૪૬॥

ધાત્ર્યુદ્ભવા સ્મૃતા ધાત્રી માભવા માલતી સ્મૃતા ।
ગૌરીભવા ચ તુલસી તમઃસત્ત્વરજોગુણાઃ ॥ ૪૭॥

વિષ્ણુર્વનસ્પતીર્દૃષ્ટ્વા તદા સ્ત્રીરૂપિણીર્મુને ।
ઉદતિષ્ઠત્તદા તાસુ રાગાતિશયવિભ્રમઃ ॥ ૪૮॥

દૃષ્ટ્વા સ યાચતે મોહાત્કામાસક્તેન ચેતસા ।
તં ચાપિ તુલસી ધાત્રી રાગેણૈવાવલોકતામ્ ॥ ૪૯॥

યચ્ચ બીજં પુરા લક્ષ્મ્યા માયયૈવ સમર્પિતમ્ ।
તસ્માત્તદુદ્ભવા નારી તસ્મિન્નીર્ષ્યાપરાભવત્ ॥ ૫૦॥

અતઃ સા બર્બરીત્યાખ્યામવાપાતીવ ગર્હિતામ્ ।
ધાત્રીતુલસ્યૌ તદ્રાગાત્તસ્ય પ્રીતિપ્રદે સદા ॥ ૫૧॥

તતો વિસ્મૃતદુઃખોઽસૌ વિષ્ણુસ્તાભ્યાં સહૈવ તુ ।
વૈકુણ્ઠમગમત્તુષ્ટઃ સર્વદેવૈર્નમસ્કૃતઃ ॥ ૫૨॥

કાર્તિકે માસિ વિપ્રેન્દ્ર ધાત્રી ચ તુલસી સદા ।
સર્વદેવપ્રિયા જ્ઞેયા વિષ્ણોશ્ચૈવ વિશેષતઃ ॥ ૫૩॥

તત્રાપિ તુલસી ધન્યાતીવ શ્રેષ્ઠા મહામુને ।
ત્યક્ત્વા ગણેશં સર્વેષાં પ્રીતિદા સર્વકામદા ॥ ૫૪॥

વૈકુણ્ઠસ્થં હરિં દૃષ્ટ્વા બ્રહ્મેન્દ્રાદ્યાશ્ચ તેઽમરાઃ ।
નત્વા સ્તુત્વા મહાવિષ્ણું સ્વસ્વધામાનિ વૈ યયુઃ ॥ ૫૫॥

વૈકુણ્ઠોઽપિ સ્વલોકસ્થો ભ્રષ્ટમોહઃ સુબોધવાન્ ।
સુખી ચાભૂન્મુનિશ્રેષ્ઠ પૂર્વવત્સંસ્મરન્ શિવમ્ ॥ ૫૬॥

ઇત્યાખ્યાનમઘૌઘઘ્નં સર્વકામપ્રદં નૃણામ્ ।
સર્વકામવિકારઘ્નં સર્વવિજ્ઞાનવર્દ્ધનમ્ ॥ ૫૭॥

ય ઇદં હિ પઠેન્નિત્યં પાઠયેદ્વાપિ ભક્તિમાન્ ।
શ‍ૃણુયાચ્છ્રાવયેદ્વાપિ સ યાતિ પરમાં ગતિમ્ ॥ ૫૮॥

પઠિત્વા ય ઇદં ધીમાનાખ્યાનં પરમોત્તમમ્ ।
સઙ્ગ્રામં પ્રવિશેદ્વીરો વિજયી સ્યાન્ન સંશયઃ ॥ ૫૯॥

વિપ્રાનાં બ્રહ્મવિદ્યાદં ક્ષત્રિયાણાં જયપ્રદમ્ ।
વૈશ્યાનાં સર્વધનદં શૂદ્રાણાં સુખદં ત્વિદમ્ ॥ ૬૦॥

શમ્ભુભક્તિપ્રદં વ્યાસ સર્વેષાં પાપનાશનમ્ ।
ઇહલોકે પરત્રાપિ સદા સદ્ગતિદાયકમ્ ॥ ૬૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે જલન્ધરવધાનન્તરદેવીસ્તુતિવિષ્ણુમોહવિધ્વંસવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૨.૫.૨૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૨૭. સપ્તવિંશોઽધ્યાયઃ । શઙ્ખચૂડોત્પત્તિવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
અથાન્યચ્છમ્ભુચરિતં પ્રેમતઃ શ‍ૃણુ વૈ મુને ।
યસ્ય શ્રવણમાત્રેણ શિવભક્તિર્દૃઢા ભવેત્ ॥ ૧॥

શઙ્ખચૂડાભિધો વીરો દાનવો દેવકણ્ટકઃ ।
યથા શિવેન નિહતો રણમૂર્ધ્નિ ત્રિશૂલતઃ ॥ ૨॥

તચ્છમ્ભુચરિતં દિવ્યં પવિત્રં પાપનાશનમ્ ।
શ‍ૃણુ વ્યાસ સુસમ્પ્રીત્યા વચ્મિ સુસ્નેહતસ્તવ ॥ ૩॥

મરીચેસ્તનયો ધાતુઃ પુત્રો યઃ કશ્યપો મુનિઃ ।
સ ધર્મિષ્ઠઃસૃષ્ટિકર્ત્તા વિદ્યાજ્ઞાપ્તઃ પ્રજાપતિઃ ॥ ૪॥

દક્ષઃ પ્રીત્યા દદૌ તસ્મૈ નિજકન્યાસ્ત્રયોદશ ।

તાસાં પ્રસૂતિઃ પ્રસભં ન કથ્યા બહુવિસ્તૃતાઃ ॥ ૫॥

યત્ર દેવાદિનિખિલં ચરાચરમભૂજ્જગત્ ।
વિસ્તરાત્તત્પ્રવક્તું ચ કઃ ક્ષમોઽસ્તિ ત્રિલોકકે ॥ ૬॥

પ્રસ્તુતં શ‍ૃણુ વૃત્તાન્તં શમ્ભુલીલાન્વિતં ચ યત્ ।
તદેવ કથયામ્યદ્ય શ‍ૃણુ ભક્તિપ્રવર્દ્ધનમ્ ॥ ૭॥

તાસુ કશ્યપપત્નીષુ દનુસ્ત્વેકા વરાઙ્ગના ।
મહારૂપવતી સાધ્વી પતિસૌભાગ્યવર્દ્ધિતા ॥ ૮॥

આસંસ્તસ્યા દનોઃ પુત્રા બહવો બલવત્તરાઃ ।
તેષાં નામાનિ નોચ્યન્તે વિસ્તારભયતો મુને ॥ ૯॥

તેષ્વેકો વિપ્રચિત્તિસ્તુ મહાબલપરાક્રમઃ ।
તત્પુત્રો ધાર્મિકો દમ્ભો વિષ્ણુભક્તો જિતેન્દ્રિયઃ ॥ ૧૦॥

નાસીત્તત્તનયો વીરસ્તતશ્ચિન્તાપરોઽભવત્ ।
શુક્રાચાર્યં ગુરું કૃત્વા કૃષ્ણમન્ત્રમવાપ્ય ચ ॥ ૧૧॥

તપશ્ચકાર પરમં પુષ્કરે લક્ષવર્ષકમ્ ।
કૃષ્ણમન્ત્રં જજાપૈવ દૃઢં બદ્ધ્વાસનં ચિરમ્ ॥ ૧૨॥

તપઃ પ્રકુર્વતસ્તસ્ય મૂર્ધ્નો નિઃસૃત્ય પ્રજ્વલત્ ।
વિસસાર ચ સર્વત્ર તત્તેજો હિ સુદુઃસહમ્ ॥ ૧૩॥

તેન તપ્તાઃ સુરાઃ સર્વે મુનયો મનવસ્તથા ।
સુનાસીરં પુરસ્કૃત્ય બ્રહ્માણં શરણં યયુઃ ॥ ૧૪॥

પ્રણમ્ય ચ વિધાતારં દાતારં સર્વસમ્પદામ્ ।
તુષ્ટુવુર્વિકલાઃ પ્રોચુઃ સ્વવૃત્તાન્તં વિશેષતઃ ॥ ૧૫॥

તદાકર્ણ્ય વિધાતાપિ વૈકુણ્ઠં તૈર્યયૌ સહ ।
તદેવ વિજ્ઞાપયિતું નિખિલેન હિ વિષ્ણવે ॥ ૧૬॥

તત્ર ગત્વા ત્રિલોકેશં વિષ્ણું રક્ષાકરં પરમ્ ।
પ્રણમ્ય તુષ્ટુવુઃસર્વે કરૌ બદ્ધ્વા વિનમ્રકાઃ ॥ ૧૭॥

દેવા ઊચુઃ ।
દેવદેવ ન જાનીમો જાતં કિં કારણં ત્વિહ ।
સન્તપ્તાઃ સકલા જાતાસ્તેજસા કેન તદ્વદ ॥ ૧૮॥

તસ્માત્મનાં ત્વમવિતા દીનબન્ધોઽનુજીવિનામ્ ।
રક્ષ રક્ષ રમાનાથ શરણ્યઃ શરણાગતાન્ ॥ ૧૯॥

સનત્કુમાર ઉવાચ ।
ઇતિ શ્રુત્વા વચો વિષ્ણુર્બ્રહ્માદીનાં દિવૌકસામ્ ।
ઉવાચ વિહસન્પ્રેમ્ણા શરણાગતવત્સલઃ ॥ ૨૦॥

વિષ્ણુરુવાચ ।
સુસ્વસ્થા ભવતાવ્યગ્રા ન ભયં કુરુતામરાઃ ।
નોપપ્લવા ભવિષ્યન્તે લયકાલો ન વિદ્યતે ॥ ૨૧॥

દાનવો દમ્ભનામા હિ મદ્ભક્તઃ કુરુતે તપઃ ।
પુત્રાર્થી શમયિષ્યામિ તમહં વરદાનતઃ ॥ ૨૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તાસ્તે સુરાઃસર્વે ધૈર્યમાલમ્બ્ય વૈ મુને ।
યયુર્બ્રહ્માદયઃ સુસ્થાઃ સ્વસ્વધામાનિ સર્વશઃ ॥ ૨૩॥

અચ્યુતોઽપિ વરં દાતું પુષ્કરં સઞ્જગામ હ ।
તપશ્ચરતિ યત્રાસૌ દમ્ભનામા હિ દાનવઃ ॥ ૨૪॥

તત્ર ગત્વા વરં બ્રૂહીત્યુવાચ પરિસાન્ત્વયન્ ।
ગિરા સૂનૃતયા ભક્તં જપન્તં સ્વમનું હરિઃ ॥ ૨૫॥

તચ્છ્રુત્વા વચનં વિષ્ણોર્દૃષ્ટ્વા તં ચ પુરઃ સ્થિતમ્ ।
પ્રણનામ મહાભક્ત્યા તુષ્ટાવ ચ પુનઃ પુનઃ ॥ ૨૬॥

દમ્ભ ઉવાચ ।
દેવદેવ નમસ્તેઽસ્તુ પુણ્ડરીકવિલોચન ।
રમાનાથ ત્રિલોકેશ કૃપાં કુરુ મમોપરિ ॥ ૨૭॥

સ્વભક્તં તનયં દેહિ મહાબલ પરાક્રમમ્ ।
ત્રિલોકજયિનં વીરમજેયં ચ દિવૌકસામ્ ॥ ૨૮॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તો દાનવેન્દ્રેણ તં વરં પ્રદદૌ હરિઃ ।
નિવર્ત્ય ચોગ્રતપસઃ તતઃ સોઽન્તરધાન્મુને ॥ ૨૯॥

ગતે હરૌ દાનવેન્દ્રઃ કૃત્વા તસ્યૈ દિશે નમઃ ।
જગામ સ્વગૃહં સિદ્ધતપાઃ પૂર્ણમનોરથઃ ॥ ૩૦॥

કાલેનાલ્પેન તત્પત્ની સગર્ભા ભાગ્યવત્યભૂત્ ।
રરાજ તેજસાત્યન્તં રોચયન્તી ગૃહાન્તરમ્ ॥ ૩૧॥

સુદામા નામ ગોપો યો કૃષ્ણસ્ય પાર્ષદાગ્રણીઃ ।
તસ્યા ગર્ભે વિવેશાસૌ રાધાશપ્તશ્ચ યન્મુને ॥ ૩૨॥

અસૂત સમયે સાધ્વી સુપ્રભં તનયં તતઃ ।
જાતકં સુચકારાસૌ પિતાઽઽહૂય મુનીન્બહૂન્ ॥ ૩૩॥

ઉત્સવઃ સુમહાનાસીત્તસ્મિઞ્જાતે દ્વિજોત્તમ ।
નામ ચક્રે પિતા તસ્ય શઙ્ખચૂડેતિ સદ્દિને ॥ ૩૪॥

પિતુર્ગેહે સ વવૃધે શુક્લપક્ષે યથા શશી ।
શૈશવેઽભ્યસ્તવિદ્યસ્તુ સ બભૂવ સુદીપ્તિમાન્ ॥ ૩૫॥

સ બાલક્રીડયા નિત્યં પિત્રોર્હર્ષં તતાન હ ।
પ્રિયો બભૂવ સર્વેષાં કુલજાનાં વિશેષતઃ ॥ ૩૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડોત્પત્તિવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૨.૫.૨૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૨૮. અષ્ટાવિંશોઽધ્યાયઃ । શઙ્ખચૂડતપઃકરણવિવાહવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
તતશ્ચ શઙ્ખચૂડોઽસૌ જૈગીષવ્યોપદેશતઃ ।
તતશ્ચકાર સુપ્રીત્યા બ્રહ્મણઃ પુષ્કરે ચિરમ્ ॥ ૧॥

ગુરુદત્તાં બ્રહ્મવિદ્યાં જજાપ નિયતેન્દ્રિયઃ ।
સ એકાગ્રમના ભૂત્વા કરણાનિ નિગૃહ્ય ચ ॥ ૨॥

તપન્તં પુષ્કરે તં વૈ શઙ્ખચૂડં ચ દાનવમ્ ।

વરં દાતું જગામાશુ બ્રહ્મા લોકગુરુર્વિભુઃ ॥ ૩॥

વરં બ્રૂહીતિ પ્રોવાચ દાનવેન્દ્રં વિધિસ્તદા ।
સ દૃષ્ટ્વા તં નનામાતિનમ્રસ્તુષ્ટાવ સદ્ગિરા ॥ ૪॥

વરં યયાચે બ્રહ્માણમજેયત્વં દિવૌકસામ્ ।
તથેત્યાહ વિધિસ્તં વૈ સુપ્રસન્નેન ચેતસા ॥ ૫॥

શ્રીકૃષ્ણકવચં દિવ્યં જગન્મઙ્ગલમઙ્ગલમ્ ।
દત્તવાન્ શઙ્ખચૂડાય સર્વત્ર વિજયપ્રદમ્ ॥ ૬॥

બદરીં સમ્પ્રયાહિ ત્વં તુલસ્યા સહ તત્ર વૈ ।
વિવાહં કુરુ તત્રૈવ સા તપસ્યતિ કામતઃ ॥ ૭॥

ધર્મધ્વજસુતા સેતિ સન્દિદેશ ચ તં વિધિઃ ।
અન્તર્ધાનં જગામાશુ પશ્યતસ્તસ્ય તત્ક્ષણાત્ ॥ ૮॥

તતઃસ શઙ્ખચૂડો હિ તપઃસિદ્ધોઽતિપુષ્કરે ।
ગલે બબન્ધ કવચં જગન્મઙ્ગલમઙ્ગલમ્ ॥ ૯॥

આજ્ઞયા બ્રહ્મણઃ સોઽપિ તપઃસિદ્ધમનોરથઃ ।
સમાયયૌ પ્રહૃષ્ટાસ્યસ્તૂર્ણં બદરિકાશ્રમમ્ ॥ ૧૦॥

યદૃચ્છયાઽઽગતસ્તત્ર શઙ્ખચૂડશ્ચ દાનવઃ ।
તપશ્ચરન્તી તુલસી યત્ર ધર્મધ્વજાત્મજા ॥ ૧૧॥

સુરૂપા સુસ્મિતા તન્વી શુભભૂષણભૂષિતા ।
સકટાક્ષં દદર્શાસૌ તમેવ પુરુષં પરમ્ ॥ ૧૨॥

દૃષ્ટ્વા તાં લલિતાં રમ્યાં સુશીલાં સુન્દરીં સતીમ્ ।
ઉવાસ તત્સમીપે તુ મધુરં તામુવાચ સઃ ॥ ૧૩॥

શઙ્ખચૂડ ઉવાચ ।
કા ત્વં કસ્ય સુતા ત્વં હિ કિં કરોષિ સ્થિતાત્ર કિમ્ ।
મૌનીભૂતા કિઙ્કરં માં સમ્ભાવિતુમિહાર્હસિ ॥ ૧૪॥

સનત્કુમાર ઉવાચ ।
ઇત્યેવં વચનં શ્રુત્વા સકામં તમુવાચ સા । ૧૫॥

તુલસ્યુવાચ ।
ધર્મધ્વજસુતાહં ચ તપસ્યામિ તપસ્વિની ।

તપોવને ચ તિષ્ઠામિ કસ્ત્વં ગચ્છ યથાસુખમ્ ॥ ૧૬॥

નારીજાતિર્મોહિની ચ બ્રહ્માદીનાં વિષોપમા ।
નિન્દ્યા દોષકરી માયા શ‍ૃઙ્ખલા હ્યનુશાયિનામ્ ॥ ૧૭॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા તુલસી તં ચ સરસં વિરરામ હ ।
દૃષ્ટ્વા તાં સસ્મિતાં સોઽપિ પ્રવક્તુમુપચક્રમે ॥ ૧૮॥

શઙ્ખચૂડ ઉવાચ ।
ત્વયા યત્કથિતં દેવિ ન ચ સર્વમલીકકમ્ ।
કિઞ્ચિત્સત્યમલીકં ચ કિઞ્ચિન્મત્તો નિશામય ॥ ૧૯॥

પતિવ્રતાઃ સ્ત્રિયો યાશ્ચ તાસાં મધ્યે ત્વમગ્રણીઃ ।
ન ચાહં પાપદૃક્કામી તથા ત્વં નેતિ ધીર્મમ ॥ ૨૦॥

આગચ્છામિ ત્વત્સમીપમાજ્ઞયા બ્રહ્મણોઽધુના ।
ગાન્ધર્વેણ વિવાહેન ત્વાં ગ્રહીષ્યામિ શોભને ॥ ૨૧॥

શઙ્ખચૂડોઽહમેવાસ્મિ દેવવિદ્રાવકારકઃ ।
માં ન જાનાસિ કિં ભદ્રે ન શ્રુતોઽહં કદાચન ॥ ૨૨॥

દનુવંશ્યો વિશેષેણ દમ્ભપુત્રશ્ચ દાનવઃ ।
સુદામા નામ ગોપોઽહં પાર્ષદશ્ચ હરેઃ પુરા ॥ ૨૩॥

અધુના દાનવેન્દ્રોઽહં રાધિકાયાશ્ચ શાપતઃ ।
જાતિસ્મરોઽહં જાનામિ સર્વં કૃષ્ણપ્રભાવતઃ ॥ ૨૪॥

સનત્કુમાર ઉવાચ ।
એવમુક્ત્વા શઙ્ખચૂડો વિરરામ ચ તત્પુરઃ ।
દાનવેન્દ્રેણ સેત્યુક્તા વચનં સત્યમાદરાત્ ।
સસ્મિતં તુલસી તુષ્ટા પ્રવક્તુમુપચક્રમે ॥ ૨૫॥

તુલસ્યુવાચ ।
ત્વયાહમધુના સત્ત્વવિચારેણ પરાજિતા ।
સ ધન્યઃ પુરુષો લોકે ન સ્ત્રિયા યઃ પરાજિતઃ ॥ ૨૬॥

સત્ક્રિયોઽપ્યશુચિર્નિત્યં સ પુમાન્યઃ સ્ત્રિયા જિતઃ ।
નિન્દન્તિ પિતરો દેવા માનવાઃસકલાશ્ચ તમ્ ॥ ૨૭॥

શુધ્યેદ્વિપ્રો દશાહેન જાતકે મૃતસૂતકે ।
ક્ષત્રિયો દ્વાદશાહેન વૈશ્યઃ પઞ્ચદશાહતઃ ॥ ૨૮॥

શૂદ્રો માસેન શુધ્યેત્તુ હીતિ વેદાનુશાસનમ્ ।
ન શુચિઃ સ્ત્રીજિતઃ ક્વાપિ ચિતાદાહં વિના પુમાન્ ॥ ૨૯॥

ન ગૃહ્ણન્તીચ્છયા તસ્માત્પિતરઃ પિણ્ડતર્પણમ્ ।
ન ગૃહ્ણન્તિ સુરાસ્તેન દત્તં પુષ્પફલાદિકમ્ ॥ ૩૦॥

તસ્ય કિં જ્ઞાનસુતપોજપહોમપ્રપૂજનૈઃ ।
વિદ્યયા દાનતઃ કિં વા સ્ત્રીભિર્યસ્ય મનો હૃતમ્ ॥ ૩૧॥

વિદ્યાપ્રભાવજ્ઞાનાર્થં મયા ત્વં ચ પરીક્ષિતઃ ।
કૃત્વા કાન્તપરીક્ષાં વૈ વૃણુયાત્કામિની વરમ્ ॥ ૩૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યેવં પ્રવદન્ત્યાં તુ તુલસ્યાં તત્ક્ષણે વિધિઃ ।
તત્રાજગામ સંસ્રષ્ટા પ્રોવાચ વચનં તતઃ ॥ ૩૩॥

બ્રહ્મોવાચ ।
કિં કરોષિ શઙ્ખચૂડ સંવાદમનયા સહ ।
ગાન્ધર્વેણ વિવાહેન ત્વમસ્યા ગ્રહણં કુરુ ॥ ૩૪॥

ત્વં વૈ પુરુષરત્નં ચ સ્ત્રીરત્નં ચ ત્વિયં સતી ।
વિદગ્ધાયા વિદગ્ધેન સઙ્ગમો ગુણવાન્ ભવેત્ ॥ ૩૫॥

નિર્વિરોધં સુખં રાજન્ કો વા ત્યજતિ દુર્લભમ્ ।
યોઽવિરોધસુખત્યાગી સ પશુર્નાત્ર સંશયઃ ॥ ૩૬॥

કિં ત્વં પરીક્ષસે કાન્તમીદૃશં ગુણિનં સતિ ।
દેવાનામસુરાણાં ચ દાનવાનાં વિમર્દકમ્ ॥ ૩૭॥

અનેન સાર્ધં સુચિરં વિહારં કુરુ સર્વદા ।
સ્થાને સ્થાને યથેચ્છં ચ સર્વલોકેષુ સુન્દરિ ॥ ૩૮॥

અન્તે પ્રાપ્સ્યતિ ગોલોકે શ્રીકૃષ્ણં પુનરેવ સઃ ।
ચતુર્ભુજં ચ વૈકુણ્ઠે મૃતે તસ્મિંસ્ત્વમાપ્સ્યસિ ॥ ૩૯॥

સનત્કુમાર ઉવાચ ।
ઇત્યેવમાશિષં દત્ત્વા સ્વાલયં તુ યયૌ વિધિઃ ।

ગાન્ધર્વેણ વિવાહેન જગૃહે તાં ચ દાનવઃ ॥ ૪૦॥

એવં વિવાહ્ય તુલસીં પિતુઃ સ્થાનં જગામ હ ।
સ રેમે રમયા સાર્ધં વાસગેહે મનોરમે ॥ ૪૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડતપઃકરણવિવાહવર્ણનં નામાષ્ટવિંશોઽધ્યાયઃ ॥ ૨.૫.૨૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૨૯. એકોનત્રિંશોઽધ્યાયઃ । શઙ્ખચૂડરાજ્યકરણવર્ણનપૂર્વક તત્પૂર્વભવવૃત્તચરિત્રવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
સ્વગેહમાગતે તસ્મિન્ શઙ્ખચૂડે વિવાહિતે ।
તપઃ કૃત્વા વરં પ્રાપ્ય મુમુદુર્દાનવાદયઃ ॥ ૧॥

સ્વલોકાદાશુ નિર્ગત્ય ગુરુણા સ્વેન સંયુતાઃ ।
સર્વેઽસુરાઃ સમ્મિલિતાઃ સમાજગ્મુસ્તદન્તિકમ્ ॥ ૨॥

પ્રણમ્ય તં સવિનયં સંસ્તુત્ય વિવિધાદરાત્ ।
સ્થિતાસ્તત્રૈવ સુપ્રીત્યા મત્વા તેજસ્વિનં વિભુમ્ ॥ ૩॥

સોઽપિ દમ્ભાત્મજો દૃષ્ટ્વાઽઽગતં કુલગુરું ચ તમ્ ।
પ્રણનામ મહાભક્ત્યા સાષ્ટાઙ્ગં પરમાદરાત્ ॥ ૪॥

અથ શુક્રઃ કુલાચાર્યો દૃષ્ટ્વાશિષમનુત્તમમ્ ।
વૃત્તાન્તં કથયામાસ દેવદાનવયોસ્તદા ॥ ૫॥

સ્વાભાવિકં ચ તદ્વૈરમસુરાણાં પરાભવમ્ ।
વિજયં નિર્જરાણાં ચ જીવસાહાય્યમેવ ચ ॥ ૬॥

તતઃ સ સમ્મતં કૃત્વાઽસુરૈઃ સર્વૈઃ સમુત્સવમ્ ।
દાનવાધસુરાણાં તમધિપં વિદધે ગુરુઃ ॥ ૭॥

તદા સમુત્સવો જાતોઽસુરાણાં મુદિતાત્મનામ્ ।

ઉપાયનાનિ સુપ્રીત્યા દદુસ્તસ્મૈ ચ તેઽખિલાઃ ॥ ૬॥

અથ દમ્ભાત્મજો વીરઃ શઙ્ખચૂડઃ પ્રતાપવાન્ ।
રાજ્યાભિષેકમાસાદ્ય સ રેજેઽસુરરાટ્ તદા ॥ ૯॥

સ સેનાં મહતીં કર્ષન્દૈત્યદાનવરક્ષસામ્ ।
રથમાસ્થાય તરસા જેતું શક્રપુરીં યયૌ ॥ ૧૦॥

ગચ્છન્સ દાનવેન્દ્રસ્તુ તેષાં સેવનકુર્વતામ્ ।
વિરેજે શશિવદ્ભાનાં ગ્રહાણાં ગ્રહરાડિવ ॥ ૧૧॥

આગચ્છન્તં શઙ્ખચૂડમાકર્ણ્યાખણ્ડલસ્સ્વરાટ્ ।
નિખિલૈરમરૈઃ સાર્ધં તેન યોદ્ધું સમુદ્યતઃ ॥ ૧૨॥

તદાઽસુરૈઃસુરાણાં ચ સઙ્ગ્રામસ્તુમુલો હ્યભૂત્ ।
વીરાઽઽનન્દકરઃ ક્લીબભયદો રોમહર્ષણઃ ॥ ૧૩॥

મહાન્કોલાહલો જાતો વીરાણાં ગર્જતાં રણે ।
વાદ્યધ્વનિસ્તથા ચાઽઽસીત્તત્ર વીરત્વવર્દ્ધિની ॥ ૧૪॥

દેવાઃ પ્રકુપ્ય યુયુધુરસુરૈર્બલવત્તરાઃ ।
પરાજયં ચ સમ્પ્રાપુરસુરા દુદ્રુવુર્ભયાત્ ॥ ૧૫॥

પલાયમાનાસ્તાન્દૃષ્ટ્વા શઙ્ખચૂડઃ સ્વયં પ્રભુઃ ।
યુયુધે નિર્જરૈઃસાકં સિંહનાદં પ્રગર્જ્ય ચ ॥ ૧૬॥

તરસા સહસા ચક્રે કદનં ત્રિદિવૌકસામ્ ।
પ્રદુદ્રુવુઃ સુરાઃ સર્વે તત્સુતેજો ન સેહિરે ॥ ૧૭॥

યત્ર તત્ર સ્થિતા દીના ગિરીણાં કન્દરાસુ ચ ।
તદધીના ન સ્વતન્ત્રા નિષ્પ્રભાઃ સાગરા યથા ॥ ૧૮॥

સોઽપિ દમ્ભાત્મજઃ શૂરો દાનવેન્દ્રઃ પ્રતાપવાન્ ।
સુરાધિકારાન્સઞ્જહ્રે સર્વાંલ્લોકાન્વિજિત્ય ચ ॥ ૧૯॥

ત્રૈલોક્યં સ્વવશં ચક્રે યજ્ઞભાગાંશ્ચ કૃત્સ્નશઃ ।
સ્વયમિન્દ્રો બભૂવાપિ શાસિતં નિખિલં જગત્ ॥ ૨૦॥

કૌબેરમૈન્દવં સૌર્યમાગ્નેયં યામ્યમેવ ચ ।
કારયામાસ વાયવ્યમધિકારં સ્વશક્તિતઃ ॥ ૨૧॥

દેવાનામસુરાણાં ચ દાનવાનાં ચ રક્ષસામ્ ।
ગન્ધર્વાણાં ચ નાગાનાં કિન્નરાણાં રસૌકસામ્ ॥ ૨૨॥

ત્રિલોકસ્ય પરેષાં ચ સકલાનામધીશ્વરઃ ।
સ બભૂવ મહાવીરઃ શઙ્ખચૂડો મહાબલી ॥ ૨૩॥

એવં સ બુભુજે રાજ્યં રાજરાજેશ્વરો મહાન્ ।
સર્વેષાં ભુવનાનાં ચ શઙ્ખચૂડશ્ચિરં સમાઃ ॥ ૨૪॥

તસ્ય રાજ્યે ન દુર્ભિક્ષં ન મારી નાઽશુભગ્રહાઃ ।
આધયો વ્યાધયો નૈવ સુખિન્યશ્ચ પ્રજાઃ સદા ॥ ૨૫॥

અકૃષ્ટપચ્યા પૃથિવી દદૌ સસ્યાન્યનેકશઃ ।
ઓષધ્યો વિવિધાશ્ચાસન્સફલાઃસરસાઃ સદા ॥ ૨૬॥

મણ્યાકરાશ્ચ નિતરાં રત્નખન્યશ્ચ સાગરાઃ ।
સદા પુષ્પફલા વૃક્ષા નદ્યઃ સુસલિલાવહાઃ ॥ ૨૭॥

દેવાન્ વિનાખિલા જીવાઃ સુખિનો નિર્વિકારકાઃ ।
સ્વસ્વધર્માસ્થિતાઃ સર્વે ચતુર્વર્ણાશ્રમાઃ પરે ॥ ૨૮॥

તસ્મિન્ શાસતિ ત્રૈલોક્યે ન કશ્ચિદ્ દુઃખિતોઽભવત્ ।
ભ્રાતૃવૈરત્વમાશ્રિત્ય કેવલં દુઃખિનોઽમરાઃ ॥ ૨૯॥

સ શઙ્ખચૂડઃ પ્રબલઃ કૃષ્ણસ્ય પરમઃ સખા ।
કૃષ્ણભક્તિરતઃ સાધુઃ સદા ગોલોકવાસિનઃ ॥ ૩૦॥

પૂર્વશાપપ્રભાવેણ દાનવીં યોનિમાશ્રિતઃ ।
ન દાનવમતિઃ સોઽભૂદ્દાનવત્વેઽપિ વૈ મુને ॥ ૩૧॥

તતઃ સુરગણાઃ સર્વે હૃતરાજ્યાઃ પરાજિતાઃ ।
સમ્મન્ત્ર્ય સર્ષયસ્તાત પ્રયયુર્બ્રહ્મણઃસભામ્ ॥ ૩૨॥

તત્ર દૃષ્ટ્વા વિધાતારં નત્વા સ્તુત્વા વિશેષતઃ ।
બ્રહ્મણે કથયામાસુઃ સર્વં વૃત્તાન્તમાકુલાઃ ॥ ૩૩॥

બ્રહ્મા તદા સમાશ્વાસ્ય સુરાન્ સર્વાન્મુનીનપિ ।
તૈશ્ચ સાર્દ્ધં યયૌ લોકે વૈકુણ્ઠં સુખદં સતામ્ ॥ ૩૪॥

દદર્શ તત્ર લક્ષ્મીશં બ્રહ્મા દેવગણૈઃસહ ।
કિરીટિનં કુણ્ડલિનં વનમાલાવિભૂષિતમ્ ॥ ૩૫॥

શઙ્ખચક્રગદાપદ્મધરં દેવં ચતુર્ભુજમ્ ।
સનન્દનાદ્યૈઃ સિદ્ધૈશ્ચ સેવિતં પીતવાસસમ્ ॥ ૩૬॥

દૃષ્ટ્વા વિષ્ણું સુરાઃસર્વે બ્રહ્માદ્યાઃ સમુનીશ્વરાઃ ।
પ્રણમ્ય તુષ્ટુવુર્ભક્ત્યા બદ્ધાઞ્જલિકરા વિભુમ્ ॥ ૩૭॥

દેવા ઊચુ
દેવદેવ જગન્નાથ વૈકુણ્ઠાધિપતે પ્રભો ।
રક્ષાસ્માન્ શરણાપન્નાન્ શ્રીહરે ત્રિજગદ્ગુરો ॥ ૩૮॥

ત્વમેવ જગતાં પાતા ત્રિલોકેશાચ્યુત પ્રભો ।
લક્ષ્મીનિવાસ ગોવિન્દ ભક્તપ્રાણ નમોઽસ્તુ તે ॥ ૩૯॥

ઇતિ સ્તુત્વા સુરાઃ સર્વે રુરુદુઃ પુરતો હરેઃ ।
તચ્છ્રુત્વા ભગવાન્વિષ્ણુર્બ્રહ્માણમિદમબ્રવીત્ ॥ ૪૦॥

વિષ્ણુરુવાચ ।
કિમર્થમાગતોઽસિ ત્વં વૈકુણ્ઠં યોગિદુર્લભમ્ ।
કિં કષ્ટં તે સમુદ્ભૂતં તત્ ત્વં વદ મમાગ્રતઃ ॥ ૪૧॥

સનત્કુમાર ઉવાચ ।
ઇતિ શ્રુત્વા હરેર્વાક્યં પ્રણમ્ય ચ મુહુર્મુહુઃ ।
બદ્ધાઞ્જલિપુટો ભૂત્વા વિનયાનતકન્ધરઃ ॥ ૪૨॥

વૃત્તાન્તં કથયામાસ શઙ્ખચૂડકૃતં તદા ।
દેવકષ્ટસમાખ્યાનં પુરો વિષ્ણોઃ પરાત્મનઃ ॥ ૪૩॥

હરિસ્તદ્વચનં શ્રુત્વા સર્વતઃ સર્વભાવવિત્ ।
પ્રહસ્યોવાચ ભગવાંસ્તદ્રહસ્યં વિધિં પ્રતિ ॥ ૪૪॥

શ્રીભગવાનુવાચ ।
શઙ્ખચૂડસ્ય વૃત્તાન્તં સર્વં જાનામિ પદ્મજ ।
મદ્ભક્તસ્ય ચ ગોપસ્ય મહાતેજસ્વિનઃ પુરા ॥ ૪૫॥ ।

શ‍ૃણુ તત્ સર્વવૃત્તાન્તમિતિહાસં પુરાતનમ્ ।
સન્દેહો નૈવ કર્તવ્યઃ શં કરિષ્યતિ શઙ્કરઃ ॥ ૪૬॥

સર્વોપરિ ચ યસ્યાસ્તિ શિવલોકઃ પરાત્પરઃ ।

યત્ર સંરાજતે શમ્ભુઃ પરબ્રહ્મ પરેશ્વરઃ ॥ ૪૭॥

પ્રકૃતેઃ પુરુષસ્યાપિ યોઽધિષ્ઠાતા ત્રિશક્તિધૃક્ ।
નિર્ગુણઃ સગુણઃ સોઽપિ પરઞ્જ્યોતિઃ સ્વરૂપવાન્ ॥ ૪૮॥

યસ્યાઙ્ગજાસ્તુ વૈ બ્રહ્મંસ્ત્રયઃસૃષ્ટ્યાદિકારકાઃ ।
સત્ત્વાદિગુણસમ્પન્ના વિષ્ણુબ્રહ્મહરાભિધાઃ ॥ ૪૯॥

સ એવ પરમાત્મા હિ વિહરત્યુમયા સહ ।
યત્ર માયાવિનિર્મુક્તો નિત્યાનિત્ય પ્રકલ્પકઃ ॥ ૫૦॥

તત્સમીપે ચ ગોલોકો ગોશાલા શઙ્કરસ્ય વૈ ।
તસ્યેચ્છયા ચ મદ્રૂપઃ કૃષ્ણો વસતિ તત્ર હ ॥ ૫૧॥

તદ્ગવાં રક્ષણાર્થાય તેનાજ્ઞપ્તઃ સદા સુખી ।
તત્સમ્પ્રાપ્તસુખઃ સોઽપિ સઙ્ક્રીડતિ વિહારવિત્ ॥ ૫૨॥

તસ્ય નારી સમાખ્યાતા રાધેતિ જગદમ્બિકા ।
પ્રકૃતેઃ પરમા મૂર્તિઃ પઞ્ચમી સુવિહારિણી ॥ ૫૩॥

બહુગોપાશ્ચ ગોપ્યશ્ચ તત્ર સન્તિ તદઙ્ગજાઃ ।
સુવિહારપરા નિત્યં રાધાકૃષ્ણાનુવર્તિનઃ ॥ ૫૪॥

સ એવ લીલયા શમ્ભોરિદાનીં મોહિતોઽનયા ।
સમ્પ્રાપ્તો દાનવીં યોનિં મુધા શાપાત્સ્વદુઃખદામ્ ॥ ૫૫॥

રુદ્રશૂલેન તન્મૃત્યુઃ કૃષ્ણેન વિહિતઃ પુરા ।
તતઃ સ્વદેહમુત્સૃજ્ય પાર્ષદઃ સ ભવિષ્યતિ ॥ ૫૬॥

ઇતિ વિજ્ઞાય દેવેશ ન ભયં કર્તુમર્હસિ ।
શઙ્કરં શરણં યાહિ સ સદ્યઃ શં વિધાસ્યતિ ॥ ૫૭॥

અહં ત્વં ચામરાઃ સર્વે તિષ્ઠન્ત્વિહ વિસાધ્વસાઃ ॥ ૫૮॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા સવિધિર્વિષ્ણુઃ શિવલોકં જગામ હ ।
સંસ્મરન્મનસા શમ્ભું સર્વેશં ભક્તવત્સલમ્ ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડવધોપાખ્યાને શઙ્ખચૂડરાજ્યકરણવર્ણનપૂર્વક તત્પૂર્વભવવૃત્તચરિત્રવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૨.૫.૨૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૩૦. ત્રિંશોઽધ્યાયઃ । શઙ્ખચૂડવધે દેવદેવસ્તુતિઃ ।

સનત્કુમાર ઉવાચ ।
ગત્વા તદૈવ સવિધિસ્તદા વ્યાસ રમેશ્વરઃ ।
શિવલોકં મહાદિવ્યં નિરાધારમભૌતિકમ્ ॥ ૧॥

સાહ્લાદોઽભ્યન્તરં વિષ્ણુર્જગામ મુદિતાનનઃ ।
નાનારત્નપરિક્ષિપ્તં વિલસન્તં મહોજ્જ્વલમ્ ॥ ૨॥

સમ્પ્રાપ્ય પ્રથમં દ્વારં વિચિત્રં ગણસેવિતમ્ ।
શોભિતં પરયા લક્ષ્મ્યા મહોચ્ચમતિસુન્દરમ્ ॥ ૩॥

દદર્શ દ્વારપાલાંશ્ચ રત્નસિંહાસનસ્થિતાન્ ।
શોભિતાન્ શ્વેતવસ્ત્રૈશ્ચ રત્નભૂષણભૂષિતાન્ ॥ ૪॥

પઞ્ચવક્ત્રત્રિનયનાન્ગૌરસુન્દરવિગ્રહાન્ ।
ત્રિશૂલાદિધરાન્વીરાન્ ભસ્મરુદ્રાક્ષશોભિતાન્ ॥ ૫॥

સ બ્રહ્માપિ રમેશશ્ચ તાન્ પ્રણમ્ય વિનમ્રકઃ ।
કથયામાસ વૃત્તાન્તં પ્રભુસન્દર્શનાર્થકમ્ ॥ ૬॥

તદાજ્ઞાં ચ દદુસ્તસ્મૈ પ્રવિવેશ તદાજ્ઞયા ।
પરં દ્વારં મહારમ્યં વિચિત્રં પરમપ્રભમ્ ॥ ૭॥

પ્રભૂપકણ્ઠગત્યર્થં વૃત્તાન્તં સંન્યવેદયત્ ।
તદ્ દ્વારપાય ચાજ્ઞપ્તસ્તેનાન્યં પ્રવિવેશ હ ॥ ૮॥

એવં પઞ્ચદશદ્વારાન્પ્રવિશ્ય કમલોદ્ભવઃ ।
મહાદ્વારં ગતસ્તત્ર નન્દિનં પ્રદદર્શ હ ॥ ૯॥

સમ્યઙ્નત્વા ચ તં સ્તુત્વા પૂર્વવત્તેન નન્દિના ।
આજ્ઞપ્તશ્ચ શનૈર્વિષ્ણુર્વિવેશાભ્યન્તરં મુદા ॥ ૧૦॥

દદર્શ ગત્વા તત્રોચ્ચૈઃ સભાં શમ્ભોઃ સમુત્પ્રભામ્ ।

તાં પાર્ષદૈઃ પરિવૃતાં લસદ્દેહૈઃ સુભૂષિતામ્ ॥ ૧૧॥

માહેશ્વરસ્ય રૂપૈશ્ચ દિગ્ભુજૈઃ શુભકાન્તિભિઃ ।
પઞ્ચવક્ત્રૈસ્ત્રિનયનૈઃ શિતિકણ્ઠૈર્મહોજ્જ્વલૈઃ ॥ ૧૨॥

સદ્રત્નયુક્તરુદ્રાક્ષભસ્માભરણભૂષિતૈઃ ।
નવેન્દુમણ્ડલાકારાં ચતુરસ્રાં મનોહરામ્ ॥ ૧૩॥

મણીન્દ્રહારનિર્માણહીરસારસુશોભિતામ્ ।
અમૂલ્યરત્નરચિતાં પદ્મપત્રૈશ્ચ શોભિતામ્ ॥ ૧૪॥

માણિક્યજાલમાલાભિર્નાનાચિત્રવિચિત્રિતામ્ ।
પદ્મરાગેન્દ્રરચિતામદ્ભુતાં શઙ્કરેચ્છયા ॥ ૧૫॥

સોપાનશતકૈર્યુક્તાં સ્યમન્તકવિનિર્મિતૈઃ ।
સ્વર્ણસૂત્રગ્રન્થિયુક્તૈશ્ચારુચન્દનપલ્લવૈઃ ॥ ૧૬॥

ઇન્દ્રનીલમણિસ્તમ્ભૈર્વેષ્ટિતાં સુમનોહરામ્ ।
સુસંસ્કૃતાં ચ સર્વત્ર વાસિતાં ગન્ધવાયુના ॥ ૧૭॥

સહસ્રયોજનાયામાં સુપૂર્ણાં બહુકિઙ્કરૈઃ ।
દદર્શ શઙ્કરં સામ્બં તત્ર વિષ્ણુઃ સુરેશ્વરઃ ॥ ૧૮॥

વસન્તં મધ્યદેશે ચ યેથેન્દુતારકાવૃતમ્ ।
અમૂલ્યરત્નનિર્માણચિત્રસિંહાસનસ્થિતમ્ ॥ ૧૯॥

કિરીટિનં કુણ્ડલિનં રત્નમાલાવિભૂષિતમ્ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગં બિભ્રતં કેલિપઙ્કજમ્ ॥ ૨૦॥

પુરતો ગીતનૃત્યઞ્ચ પશ્યન્તં સસ્મિતં મુદા ॥ ૨૧॥

શાન્તં પ્રસન્નમનસમુમાકાન્તં મહોલ્લસમ્ ।
દેવ્યા પ્રદત્તતામ્બૂલં ભુક્તવન્તં સુવાસિતમ્ ॥ ૨૨॥

ગણૈશ્ચ પરયા ભક્ત્યા સેવિતં શ્વેતચામરૈઃ ।
સ્તૂયમાનં ચ સિદ્ધૈશ્ચ ભક્તિનમ્રાત્મકન્ધરૈઃ ॥ ૨૩॥

ગુણાતીતં પરેશાનં ત્રિદેવજનકં વિભુમ્ ।
નિર્વિકલ્પં નિરાકારં સાકારં સ્વેચ્છયા શિવમ્ ॥ ૨૪॥

અમાયમજમાદ્યઞ્ચ માયાધીશં પરાત્પરમ્ ।

પ્રકૃતેઃ પુરુષસ્યાપિ પરમં સ્વપ્રભું સદા ॥ ૨૫॥

એવં વિશિષ્ટં તં દૃષ્ટ્વા પરિપૂર્ણતમં સમમ્ ।
વિષ્ણુર્બ્રહ્મા તુષ્ટુવતુઃ પ્રણમ્ય સુકૃતાઞ્જલી ॥ ૨૬॥

વિષ્ણુવિધી ઊચતુઃ
દેવદેવ મહાદેવ પરબ્રહ્માખિલેશ્વર ॥

ત્રિગુણાતીત નિર્વ્યગ્ર ત્રિદેવજનક પ્રભો । ૨૭॥

વયં તે શરણાપન્ના રક્ષાસ્માન્દુઃખિતાન્વિભો ।
શઙ્ખચૂડાર્દિતાન્ક્લિષ્ટાન્સન્નાથાન્પરમેશ્વર ॥ ૨૮॥

અયં યોઽધિષ્ઠિતો લોકો ગોલોક ઇતિ સ સ્મૃતઃ ।
અધિષ્ઠાતા તસ્ય વિભુઃ કૃષ્ણોઽયં ત્વદધિષ્ઠિતઃ ॥ ૨૯॥

પાર્ષદપ્રવરસ્તસ્ય સુદામા દૈવયન્ત્રિતઃ ।
રાધાશપ્તો બભૂવાથ શઙ્ખચૂડશ્ચ દાનવઃ ॥ ૩૦॥

તેન નિઃસારિતાઃ શમ્ભો પીડ્યમાનાઃ સમન્તતઃ ।
હૃતાધિકારાસ્ત્રિદશા વિચરન્તિ મહીતલે ॥ ૩૧॥

ત્વાં વિના ન સ વધ્યશ્ચ સર્વેષાં ત્રિદિવૌકસામ્ ।
તં ઘાતય મહેશાન લોકાનાં સુખમાવહ ॥ ૩૨॥

ત્વમેવ નિર્ગુણઃ સત્યોઽનન્તોઽનન્તપરાક્રમઃ ।
સગુણઃ સન્નિવેશશ્ચ પ્રકૃતેઃ પુરુષાત્પરઃ ॥ ૩૩॥

રજસા સૃષ્ટિસમયે ત્વં બ્રહ્મા સૃષ્ટિકૃત્પ્રભો ।
સત્ત્વેન પાલને વિષ્ણુસ્ત્રિભુવાવનકારકઃ ॥ ૩૪॥

તમસા પ્રલયે રુદ્રો જગત્સંહારકારકઃ ।
નિસ્ત્રૈગુણ્યે શિવાખ્યાતસ્તુર્યો જ્યોતિઃસ્વરૂપકઃ ॥ ૩૫॥

ત્વં દીક્ષયા ચ ગોલોકે ત્વં ગવાં પરિપાલકઃ ।
ત્વદ્ગોશાલામધ્યગશ્ચ કૃષ્ણઃ ક્રીડત્યહર્નિશમ્ ॥ ૩૬॥

ત્વં સર્વકારણં સ્વામી વિધિર્વિષ્ણ્વીશ્વરઃ પરમ્ ।
નિર્વિકારી સદાસાક્ષી પરમાત્મા પરેશ્વરઃ ॥ ૩૭॥

દીનાનાથસહાયી ચ દીનાનાં પ્રતિપાલકઃ ।

દીનબન્ધુસ્ત્રિલોકેશઃ શરણાગતવત્સલઃ ॥ ૩૮॥

અસ્માનુદ્ધર ગૌરીશ પ્રસીદ પરમેશ્વર ।
ત્વદધીના વયં નાથ યદિચ્છસિ તથા કુરુ ॥ ૩૯॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા તૌ સુરૌ વ્યાસ હરિર્બ્રહ્મા ચ વૈ તદા ।
વિરેમતુઃ શિવં નત્વા કરૌ બદ્ધ્વા વિનીતકૌ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડવધે દેવદેવસ્તુતિર્નામ ત્રિંશોઽધ્યાયઃ ॥ ૨.૫.૩૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૩૧. એકત્રિંશોઽધ્યાયઃ । શઙ્ખચૂડવધે શિવોપદેશઃ ।

સનત્કુમાર ઉવાચ ।
અથાકર્ણ્ય વચઃ શમ્ભુર્હરિવિધ્યોઃ સુદીનયોઃ ।
ઉવાચ વિહસન્વાણ્યા મેઘનાદગભીરયા ॥ ૧॥

શિવ ઉવાચ ।
હે હરે વત્સ હે બ્રહ્મંસ્ત્યજતં સર્વશો ભયમ્ ।
શઙ્ખચૂડોદ્ભવં ભદ્રં સમ્ભવિષ્યત્યસંશયમ્ ॥ ૨॥

શઙ્ખચૂડસ્ય વૃત્તાન્તં સર્વં જાનામિ તત્ત્વતઃ ।
કૃષ્ણભક્તસ્ય ગોપસ્ય સુદામ્નશ્ચ પુરા પ્રભો ॥ ૩॥

મદાજ્ઞયા હૃષીકેશો કૃષ્ણરૂપં વિધાય ચ ।
ગોશાલાયાં સ્થિતો રમ્યે ગોલોકે મદધિષ્ઠિતે ॥ ૪॥

સ્વતન્ત્રોઽહમિતિ સ્વં સ મોહં મત્વા ગતઃ પુરા ।
ક્રીડાઃ સમકરોદ્બહ્વીઃ સ્વૈરવર્તીવ મોહિતઃ ॥ ૫॥

તં દૃષ્ટ્વા મોહયત્યુગ્રં તસ્યાહં માયયા સ્વયા ।
તેષાં સંહૃત્ય સદ્બુદ્ધિં શાપં દાપિતવાન્ કિલ ॥ ૬॥

ઇત્થં કૃત્વા સ્વલીલાં તાં માયાં સંહૃતવાનહમ્ ।
જ્ઞાનયુક્તાસ્તદા તે તુ મુક્તમોહાઃ સુબુદ્ધયઃ ॥ ૭॥

સમીપમાગતાસ્તે મે દીનીભૂય પ્રણમ્ય મામ્ ।
અકુર્વન્સુનુતિં ભક્ત્યા કરૌ બધ્વા વિનમ્રકાઃ ॥ ૮॥

વૃત્તાન્તમવદન્ સર્વં લજ્જાકુલિતમાનસાઃ ।
ઊચુર્મત્પુરતો દીના રક્ષ રક્ષેતિ વૈ ગિરઃ ॥ ૯॥

તદા ત્વહં ભવસ્તેષાં સન્તુષ્ટઃ પ્રોક્તવાન્ વચઃ ।
ભયં ત્યજત હે કૃષ્ણ યૂયં સર્વે મદાજ્ઞયા ॥ ૧૦॥

રક્ષકોઽહં સદા પ્રીત્યા સુભદ્રં વો ભવિષ્યતિ ।
મદિચ્છયાઽખિલં જાતમિદં સર્વં ન સંશયઃ ॥ ૧૧॥

સ્વસ્થાનં ગચ્છ ત્વં સાર્દ્ધં રાધયા પાર્ષદૈન ચ ।
દાનવસ્તુ ભવેત્સોઽયં ભારતેઽત્ર ન સંશયઃ ॥ ૧૨॥

શાપોદ્ધારં કરિષ્યેઽહં યુવયોઃ સમયે ખલુ ।
મદુક્તમિતિ સન્ધાર્ય શિરસા રાધયા સહ ॥ ૧૩॥

શ્રીકૃષ્ણોઽમોદદત્યન્તં સ્વસ્થાનમગમત્સુધીઃ ।
ન્યષ્ઠાતાં સભયં તત્ર મદારાધનતત્પરૌ ॥ ૧૪॥

મત્વાખિલં મદધીનમસ્વતન્ત્રં નિજં ચ વૈ ।
સ સુદામાઽભવદ્રાધાશાપતો દાનવેશ્વરઃ ॥ ૧૫॥

શઙ્ખચૂડાભિધો દેવદ્રોહી ધર્મવિચક્ષણઃ ।
ક્લિશ્નાતિ સુબલાત્કૃત્સ્નં સદા દેવગણં કુધીઃ ॥ ૧૬॥

મન્માયામોહિતઃસોઽતિદુષ્ટમન્ત્રિસહાયવાન્ ।
તદ્ભયં ત્યજતાશ્વેવ મયિ શાસ્તરિ વૈ સતિ ॥ ૧૭॥

સનત્કુમાર ઉવાચ ।
ઇત્યૂચિવાન્ શિવો યાવદ્ધરિબ્રહ્મપુરઃ કથામ્ ।
અભવત્તાવદન્યચ્ચ ચરિતં તન્મુને શ‍ૃણુ ॥ ૧૮॥

તસ્મિન્નેવાન્તરે કૃષ્ણો રાધયા પાર્ષદૈઃ સહ ।
સદ્ગોપૈરાયયૌ શમ્ભુમનુકૂલયિતું પ્રભુમ્ ॥ ૧૯॥

પ્રભું પ્રણમ્ય સદ્ભક્ત્યા મિલિત્વા હરિમાદરાત્ ।

સમ્મતો વિધિના પ્રીત્યા સન્તસ્થૌ શિવશાસનાત્ ॥ ૨૦॥

તતઃ શમ્ભું પુનર્નત્વા તુષ્ટાવ વિહિતાઞ્જલિઃ ।
શ્રીકૃષ્ણો મોહનિર્મુક્તો જ્ઞાત્વા તત્ત્વં શિવસ્ય હિ ॥ ૨૧॥

શ્રીકૃષ્ણ ઉવાચ ।
દેવદેવ મહાદેવ પરબ્રહ્મ સતાઙ્ગતે ।
ક્ષમસ્વ ચાપરાધં મે પ્રસીદ પરમેશ્વર ॥ ૨૨॥

ત્વત્તઃ શર્વ ચ સર્વં ચ ત્વયિ સર્વં મહેશ્વર ।
સર્વં ત્વં નિખિલાધીશ પ્રસીદ પરમેશ્વર ॥ ૨૩॥

ત્વં જ્યોતિઃ પરમં સાક્ષાત્સર્વવ્યાપી સનાતનઃ ।
ત્વયા નાથેન ગૌરીશ સનાથાઃસકલા વયમ્ ॥ ૨૪॥

સર્વોપરિ નિજં મત્વા વિહરન્મોહમાશ્રિતઃ ।
તત્ફલં પ્રાપ્તવાનસ્મિ શાપં પ્રાપ્તઃ સવામકઃ ॥ ૨૫॥

પાર્ષદપ્રવરો યો મે સુદામા નામ ગોપકઃ ।
સ રાધાશાપતઃ સ્વામિન્દાનવીં યોનિમાશ્રિતઃ ॥ ૨૬॥

અસ્માનુદ્ધર દુર્ગેશ પ્રસીદ પરમેશ્વર ।
શાપોદ્ધારં કુરુષ્વાદ્ય પાહિ નઃ શરણાગતાન્ ॥ ૨૭॥

ઇત્યુક્ત્વા વિરરામૈવ શ્રીકૃષ્ણો રાધયા સહ ।
પ્રસન્નોઽભૂચ્છિવસ્તત્ર શરણાગતવત્સલઃ ॥ ૨૮॥

શ્રીશિવ ઉવાચ ।
હે કૃષ્ણ ગોપિકાનાથ ભયં ત્યજ સુખી ભવ ।
મયાનુગૃહ્ણતા તાત સર્વમાચરિતં ત્વિદમ્ ॥ ૨૯॥

સમ્ભવિષ્યતિ તે ભદ્રં ગચ્છ સ્વસ્થાનમુત્તમમ્ ।
સ્થાતવ્યં સ્વાધિકારે ચ સાવધાનતયા સદા ॥ ૩૦॥

વિહરસ્વ યથાકામં માં વિજ્ઞાય પરાત્પરમ્ ।
સ્વકાર્યં કુરુ નિર્વ્યગ્રં રાધયા પાર્ષદૈઃ ખલુ ॥ ૩૧॥

વારાહે પ્રવરે કલ્પે તરુણ્યા રાધયા સહ ।
શાપપ્રભાવં ભુક્ત્વા વૈ પુનરાયાસ્યતિ સ્વકમ્ ॥ ૩૨॥

સુદામા પાર્ષદો યો હિ તવ કૃષ્ણ પ્રિયપ્રિયઃ ।

દાનવીં યોનિમાશ્રિત્યેદાનીં ક્લિશ્નાતિ વૈ જગત્ ॥ ૩૩॥

શાપપ્રભાવાદ્રાધાયા દેવશત્રુશ્ચ દાનવઃ ।
શઙ્ખચૂડાભિધઃ સોઽતિ દૈત્યપક્ષી સુરદ્રુહઃ ॥ ૩૪॥

તેન નિઃસારિતા દેવાઃ સેન્દ્રા નિત્યં પ્રપીડિતાઃ ।
હૃતાધિકારા વિકૃતાઃ સર્વે યાતા દિશો દશ ॥ ૩૫॥

બ્રહ્માચ્યુતૌ તદર્થે હીહાગતૌ શરણં મમ ।
તેષાં ક્લેશવિનિર્મોક્ષં કરિષ્યે નાત્ર સંશયઃ ॥ ૩૬॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા શઙ્કરઃ કૃષ્ણં પુનઃ પ્રોવાચ સાદરમ્ ।
હરિં વિધિં સમાભાષ્ય વચનં ક્લેશનાશનમ્ ॥ ૩૭॥

શિવ ઉવાચ ।
હે હરે હે વિધે પ્રીત્યા મમેદં વચનં શ‍ૃણુ ।
ગચ્છતં ત્વરિતં તાતૌ દેવાનન્દાય નિર્ભયમ્ ॥ ૩૮॥

કૈલાસવાસિનં રુદ્રં મદ્રૂપં પૂર્ણમુત્તમમ્ ।
દેવકાર્યાર્થમુદ્ભૂતં પૃથગાકૃતિધારિણમ્ ॥ ૩૯॥

એતદર્થે હિ મદ્રૂપઃ પરિપૂર્ણતમઃ પ્રભુઃ ।
કૈલાસે ભક્તવશતઃ સન્તિષ્ઠતિ ગિરૌ હરે ॥ ૪૦॥

મત્તસ્ત્વત્તો ન ભેદોઽસ્તિ યુવયોઃ સેવ્ય એવ સઃ ।
ચરાચરાણાં સર્વેષાં સુરાદીનાં ચ સર્વદા ॥ ૪૧॥

આવયોર્ભેદકર્તા યઃ સ નરો નરકં વ્રજેત્ ।
ઇહાપિ પ્રાપ્નુયાત્કષ્ટં પુત્રપૌત્રવિવર્જિતઃ ॥ ૪૨॥

ઇત્યુક્તવન્તં દુર્ગેશં પ્રણમ્ય ચ મુહુર્મુહુઃ ।
રાધયા સહિતઃ કૃષ્ણઃ સ્વસ્થાનં સગણો યયૌ ॥ ૪૩॥

હરિર્બ્રહ્મા ચ તૌ વ્યાસ સાનન્દૌ ગતસાધ્વસૌ ।
મુહુર્મુહુઃ પ્રણમ્યેશં વૈકુણ્ઠં યયતુર્દ્રુતમ્ ॥ ૪૪॥

તત્રાગત્યાખિલં વૃત્તં દેવેભ્યો વિનિવેદ્ય તૌ ।
તાનાદાય બ્રહ્મવિષ્ણૂ કૈલાસં યયતુર્ગિરિમ્ ॥ ૪૫॥

તત્ર દૃષ્ટ્વા મહેશાનં પાર્વતીવલ્લભં પ્રભુમ્ ।

દીનરક્ષાત્તદેહં ચ સગુણં દેવનાયકમ્ ॥ ૪૬॥

તુષ્ટુવુઃ પૂર્વવત્સર્વે ભક્ત્યા ગદ્ગદયા ગિરા ।
કરૌ બદ્ધ્વા નતસ્કન્ધા વિનયેન સમન્વિતાઃ ॥ ૪૭॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ ગિરિજાનાથ શઙ્કર ।
વયં ત્વાં શરણાપન્ના રક્ષ દેવાન્ભયાકુલાન્ ॥ ૪૮॥

શઙ્ખચૂડં દાનવેન્દ્રં જહિ દેવનિષૂદનમ્ ।
તેન વિક્લાવિતા દેવાઃ સઙ્ગ્રામે ચ પરાજિતાઃ ॥ ૪૯॥

હૃતાધિકારાઃ કુતલે વિચરન્તિ યથા નરાઃ ।
દેવલોકો હિ દુર્દૃશ્યસ્તેષામાસીચ્ચ તદ્ભયાત્ ॥ ૫૦॥

દીનોદ્ધાર કૃપાસિન્ધો દેવાનુદ્ધર સઙ્કટાત્ ।
શક્રં ભયાન્મહેશાન હત્વા તં દાનવાધિપમ્ ॥ ૫૧॥

ઇતિ શ્રુત્વા વચઃ શમ્ભુર્દેવાનાં ભક્તવત્સલઃ ।
ઉવાચ વિહસન્ વાણ્યા મેઘનાદગભીરયા ॥ ૫૨॥

શ્રીશઙ્કર ઉવાચ ।
હે હરે હે વિધે દેવાઃ સ્વસ્થાનં ગચ્છત ધ્રુવમ્ ।
શઙ્ખચૂડં વધિષ્યામિ સગણં નાત્ર સંશયઃ ॥ ૫૩॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય મહેશસ્ય વચઃ પીયૂષસન્નિભમ્ ।
તે સર્વે પ્રમુદા હ્યાસન્નષ્ટં મત્વા ચ દાનવમ્ ॥ ૫૪॥

હરિર્જગામ વૈકુણ્ઠં સત્યલોકે વિધિસ્તદા ।
પ્રણિપત્ય મહેશં ચ સુરાદ્યાઃ સ્વપદં યયુઃ ॥ ૫૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડવધે શિવોપદેશો નામૈકત્રિંશોઽધ્યાયઃ ॥ ૨.૫.૩૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૩૨. દ્વાત્રિંશોऽધ્યાયઃ । શઙ્ખચૂડવધે દૂતગમનમ્ ।

સનત્કુમાર ઉવાચ ।
અથેશાનો મહારુદ્રો દુષ્ટકાલઃસતાં ગતિઃ ।
શઙ્ખચૂડવધં ચિત્તે નિશ્ચિકાય સુરેચ્છયા ॥ ૧॥

દૂતં કૃત્વા ચિત્રરથં ગન્ધર્વેશ્વરમીપ્સિતમ્ ।
શીઘ્રં પ્રસ્થાપયામાસ શઙ્ખચૂડાન્તિકે મુદા ॥ ૨॥

સર્વેશ્વરાજ્ઞયા દૂતો યયૌ તન્નગરં ચ સઃ ।
મહેન્દ્રનગરોત્કૃષ્ટં કુબેરભવનાધિકમ્ ॥ ૩॥

ગત્વા દદર્શ તન્મધ્યે શઙ્ખચૂડાલયં વરમ્ ।
રાજિતં દ્વાદશૈર્દ્વારૈર્દ્વારપાલસમન્વિતમ્ ॥ ૪॥

સ દૃષ્ટ્વા પુષ્પદન્તસ્તુ વરં દ્વારં દદર્શ સઃ ।
કથયામાસ વૃત્તાન્તં દ્વારપાલાય નિર્ભયઃ ॥ ૫॥

અતિક્રમ્ય ચ તદ્ દ્વારં જગામાભ્યન્તરે મુદા ।
અતીવ સુન્દરં રમ્યં વિસ્તીર્ણં સમલઙ્કૃતમ્ ॥ ૬॥

સ ગત્વા શઙ્ખચૂડં તં દદર્શ દનુજાધિપમ્ ।
વીરમણ્ડલમધ્યસ્થં રત્નસિંહાસનસ્થિતમ્ ॥ ૭॥

દાનવેન્દ્રૈઃ પરિવૃતં સેવિતં ચ ત્રિકોટિભિઃ ।
શતકોટિભિરન્યૈશ્ચ ભ્રમદ્ભિઃ શસ્ત્રપાણિભિઃ ॥ ૮॥

એવમ્ભૂતં ચ તં દૃષ્ટ્વા પુષ્પદન્તઃ સવિસ્મયઃ ।
ઉવાચ રણવૃત્તાન્તં યદુક્તં શઙ્કરેણ ચ ॥ ૯॥

પુષ્પદન્ત ઉવાચ ।
રાજેન્દ્ર શિવદૂતોऽહં પુષ્પદન્તાભિધઃ પ્રભો ।
યદુક્તં શઙ્કરેણૈવ તચ્છૃણુ ત્વં બ્રવીમિ તે ॥ ૧૦॥

શિવ ઉવાચ ।
રાજ્યં દેહિ ચ દેવાનામધિકારં હિ સામ્પ્રતમ્ ।
નો ચેત્કુરુ રણં સાર્દ્ધં પરેણ ચ મયા સતામ્ ॥ ૧૧॥

દેવા માં શરણાપન્ના દેવેશં શઙ્કરં સતામ્ ।

અહં ક્રુદ્ધો મહારુદ્રસ્ત્વાં વધિષ્યામ્યસંશયમ્ ॥ ૧૨॥

હરોઽસ્મિ સર્વદેવેભ્યો હ્યભયં દત્તવાનહમ્ ।
ખલદણ્ડધરોઽહં વૈ શરણાગતવત્સલઃ ॥ ૧૩॥

રાજ્યં દાસ્યસિ કિં વા ત્વં કરિષ્યસિ રણં ચ કિમ્ ।
તત્ત્વં બ્રૂહિ દ્વયોરેકં દાનવેન્દ્ર વિચાર્ય્ય વૈ ॥ ૧૪॥

પુષ્પદન્ત ઉવાચ ।
ઇત્યુક્તં યન્મહેશેન તુભ્યં તન્મે નિવેદિતમ્ ।
વિતથં શમ્ભુવાક્યં ન કદાપિ દનુજાધિપ ॥ ૧૫॥

અહં સ્વસ્વામિનં ગન્તુમિચ્છામિ ત્વરિતં હરમ્ ।
ગત્વા વક્ષ્યામિ કિં શમ્ભું તથા ત્વં વદ મામિહ ॥ ૧૬॥

સનત્કુમાર ઉવાચ ।
ઇત્થં ચ પુષ્પદન્તસ્ય શિવદૂતસ્ય સત્પતેઃ ।
આકર્ણ્ય વચનં રાજા હસિત્વા તમુવાચ સઃ ॥ ૧૭॥

શઙ્ખચૂડ ઉવાચ ।
રાજ્યં દાસ્યે ન દેવેભ્યો વીરભોગ્યા વસુન્ધરા ।
રણં દાસ્યામિ તે રુદ્ર દેવાનાં પક્ષપાતિને ॥ ૧૮॥

યસ્યોપરિ પ્રયાયી સ્યાત્સ વીરો ભુવેનઽધમઃ ।
અતઃ પૂર્વમહં રુદ્ર ત્વાં ગમિષ્યામ્યસંશયમ્ ॥ ૧૯॥

પ્રભાત આગમિષ્યામિ વીરયાત્રા વિચારતઃ ।
ત્વં ગચ્છાચક્ષ્વ રુદ્રાય હીદૃશં વચનં મમ ॥ ૨૦॥

ઇતિ શ્રુત્વા શઙ્ખચૂડવચનં સુપ્રહસ્ય સઃ ।
ઉવાચ દાનવેન્દ્રં સ શમ્ભુદૂતસ્તુ ગર્વિતમ્ ॥ ૨૧॥

પુષ્પદન્ત ઉવાચ
અન્યેષામપિ રાજેન્દ્ર ગણાનાં શઙ્કરસ્ય ચ ।
ન સ્થાતું સમ્મુખે યોગ્યઃ કિં પુનસ્તસ્ય સમ્મુખમ્ ॥ ૨૨॥

સ ત્વં દેહિ ચ દેવાનામધિકારાણિ સર્વશઃ ।
ત્વમરં ગચ્છ પાતાલં યદિ જીવિતુમિચ્છસિ ॥ ૨૩॥

સામાન્યમમરં તં નો વિદ્ધિ દાનવસત્તમ ।

શઙ્કરઃ પરમાત્મા હિ સર્વેષામીશ્વરેશ્વરઃ ॥ ૨૪॥

ઇન્દ્રાદ્યાઃ સકલા દેવા યસ્યાજ્ઞાવર્તિનઃ સદા ।
સપ્રજાપતયઃ સિદ્ધા મુનયશ્ચાપ્યહીશ્વરાઃ ॥ ૨૫॥

હરેર્વિધેશ્ચ સ સ્વામી નિર્ગુણઃ સગુણઃ સ હિ ।
યસ્ય ભ્રૂભઙ્ગમાત્રેણ સર્વેષાં પ્રલયો ભવેત્ ॥ ૨૬॥

શિવસ્ય પૂર્ણરૂપશ્ચ લોકસંહારકારકઃ ।
સતાં ગતિર્દુષ્ટહન્તા નિર્વિકારઃ પરાત્પરઃ ॥ ૨૭॥

બ્રહ્મણોઽધિપતિઃ સોઽપિ હરેરપિ મહેશ્વરઃ ।
અવમાન્યં ન વૈ તસ્ય શાસનં દાનવર્ષભ ॥ ૨૮॥

કિં બહૂક્તેન રાજેન્દ્ર મનસા સંવિચાર્ય ચ ।
રુદ્રં વિદ્ધિ મહેશાનં પરં બ્રહ્મ ચિદાત્મકમ્ ॥ ૨૯॥

દેહિ રાજ્યં હિ દેવાનામધિકારાંશ્ચ સર્વશઃ ।
એવં તે કુશલં તાત ભવિષ્યત્યન્યથા ભયમ્ ॥ ૩૦॥

સન્ત્કુમાર ઉવાચ ।
ઇતિ શ્રુત્વા દાનવેન્દ્રઃ શઙ્ખચૂડઃ પ્રતાપવાન્ ।
ઉવાચ શિવદૂતં તં ભવિતવ્યવિમોહિતઃ ॥ ૩૧॥

શઙ્ખચૂડ ઉવાચ ।
સ્વતો રાજ્યં ન દાસ્યામિ નાધિકારાન્ વિનિશ્ચયાત્ ।
વિના યુદ્ધં મહેશેન સત્યમેતદ્ બ્રવીમ્યહમ્ ॥ ૩૨॥

કાલાધીનં જગત્સર્વં વિજ્ઞેયં સચરાચરમ્ ।
કાલાદ્ભવતિ સર્વં હિ વિનશ્યતિ ચ કાલતઃ ॥ ૩૩॥

ત્વં ગચ્છ શઙ્કરં રુદ્રં મયોક્તં વદ તત્ત્વતઃ ।
સ ચ યુક્તં કરોત્વેવં બહુવાર્તાં કુરુષ્વ નો ॥ ૩૪॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા શિવદૂતોઽસૌ જગામ સ્વામિનં નિજમ્ ।
યથાર્થં કથયામાસ પુષ્પદન્તશ્ચ સન્મુને ॥ ૩૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડવધે દૂતગમનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૨.૫.૩૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૩૩. ત્રયસ્ત્રિંશોઽધ્યાયઃ । શઙ્ખચૂડવધે મહાદેવયુદ્ધયાત્રાવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
તસ્ય દૂતસ્ય તદ્વાક્યમાકર્ણ્ય સુરરાટ્ તતઃ ।
સક્રોધઃ પ્રાહ ગિરિશો વીરભદ્રાદિકાન્ગણાન્ ॥ ૧॥

રુદ્ર ઉવાચ ।
હે વીરભદ્ર હે નન્દિન્ ક્ષેત્રપાલષ્ટભૈરવાઃ ।
સર્વે ગણાશ્ચ સન્નદ્ધાઃ સાયુધા બલશાલિનઃ ॥ ૨॥

કુમારાભ્યાં સહૈવાદ્ય નિર્ગચ્છન્તુ મમાજ્ઞયા ।
સ્વસેનયા ભદ્રકાલી નિર્ગચ્છતુ રણાય ચ ॥

શઙ્ખચૂડવધાર્થાય નિર્ગચ્છામ્યદ્ય સત્વરમ્ ॥ ૩॥

સનત્કુમાર ઉવાચ ।
ઇત્યાજ્ઞાપ્ય મહેશાનો નિર્યયૌ સૈન્યસંયુતઃ ।
સર્વે વીરગણાસ્તસ્યાનુયયુઃ સમ્પ્રહર્ષિતાઃ ॥ ૪॥

એતસ્મિન્નન્તરે સ્કન્દગણેશૌ સર્વસૈન્યપૌ ।
યયતુર્મુદિતૌ નદ્ધૌ સાયુધૌ ચ શિવાન્તિકે ॥ ૫॥

વીરભદ્રશ્ચ નન્દી ચ મહાકાલઃ સુભદ્રકઃ ।
વિશાલાક્ષશ્ચ બાણશ્ચ પિઙ્ગલાક્ષો વિકમ્પનઃ ॥ ૬॥

વિરૂપો વિકૃતિશ્ચૈવ મણિભદ્રશ્ચ બાષ્કલઃ ।
કપિલાખ્યો દીર્ઘદંષ્ટ્રો વિકરસ્તામ્રલોચનઃ ॥ ૭॥

કાલઙ્કરો બલીભદ્રઃ કાલજિહ્વઃ કુટીચરઃ ।
બલોન્મત્તો રણશ્લાઘ્યો દુર્જયો દુર્ગમસ્તથા ॥ ૮॥

ઇત્યાદયો ગણેશાનાઃ સૈન્યાનાં પતયો વરાઃ ।
તેષાં ચ ગણનાં વચ્મિ સાવધાનતયા શ‍ૃણુ ॥ ૯॥

શઙ્ખકર્ણઃ કોટિગણૈર્યુતઃ પરવિમર્દકઃ ।
દશભિઃ કેકરાક્ષશ્ચ વિકૃતોઽષ્ટાભિરેવ ચ ॥ ૧૦॥

ચતુઃષષ્ટ્યા વિશાખશ્ચ નવભિઃ પારિયાત્રિકઃ ।
ષડ્ભિઃ સર્વાન્તકઃ શ્રીમાંસ્તથૈવ વિકૃતાનનઃ ॥ ૧૧॥

જાલકો હિ દ્વાદશભિઃ કોટિભિર્ગણપુઙ્ગવઃ ।
સપ્તભિઃ સમદઃ શ્રીમાન્દુન્દુભોઽષ્ટાભિરેવ ચ ॥ ૧૨॥

પઞ્ચભિશ્ચ કરાલાક્ષઃ ષડ્ભિઃ સન્દારકો વરઃ ।
કોટિકોટિભિરેવેહ કન્દુકઃ કુણ્ડકસ્તથા ॥ ૧૩॥

વિષ્ટમ્ભોઽષ્ટાભિરેવેહ ગણપઃ સર્વસત્તમઃ ।
પિપ્પલશ્ચ સહસ્રેણ સન્નાદશ્ચ તથાવિધઃ ॥ ૧૪॥

આવેશનસ્તથાષ્ટાભિસ્ત્વષ્ટભિશ્ચન્દ્રતાપનઃ ।
મહાકેશઃ સહસ્રેણ કોટીનાં ગણપો વૃતઃ ॥ ૧૫॥

કુણ્ડી દ્વાદશભિર્વીરૈસ્તથા પર્વતકઃ શુભઃ ।
કાલશ્ચ કાલકશ્ચૈવ મહાકાલશતેન વૈ ॥ ૧૬॥

અગ્નિકઃ શતકોટ્યા ચ કોટ્યાગ્નિમુખ એવ ચ ।
આદિત્યો હ્યર્દ્ધકોટ્યા ચ તથા ચૈવ ઘનાવહઃ ॥ ૧૭॥

સન્નાહશ્ચ શતેનૈવ કુમુદઃ કોટિભિસ્તથા ।
અમોઘઃ કોકિલશ્ચૈવ શતકોટ્યા સુમન્ત્રકઃ ॥ ૧૮॥

કાકપાદઃ કોટિષષ્ટ્યા ષષ્ટ્યા સન્તાનકસ્તથા ।
મહાબલશ્ચ નવભિઃ પઞ્ચભિર્મધુપિઙ્ગલઃ ॥ ૧૯॥

નીલો નવત્યા દેવેશઃ પૂર્ણભદ્રસ્તથૈવ ચ ।
કોટીનાં ચૈવ સપ્તાનાં ચતુર્વક્ત્રો મહાબલઃ ॥ ૨૦॥

કોટિકોટિસહસ્રાણાં શતૈર્વિંશતિભિસ્તથા ।
તત્રાજગ્મુસ્તથા વીરાસ્તે સર્વે સઙ્ગરોત્સવે ॥ ૨૧॥

ભૂતકોટિસહસ્રેણ પ્રમથૈર્કોટિભિસ્ત્રિભિઃ ।
વીરભદ્રશ્ચતુઃષષ્ટ્યા લોમજાનાં ત્રિકોટિભિઃ ॥ ૨૨॥

કાષ્ઠારૂઢશ્ચતુઃષષ્ટ્યા સુકેશો વૃષભસ્તથા ।
વિરૂપાક્ષશ્ચ ભગવાંશ્ચતુઃષષ્ટ્યા સનાતનઃ ॥ ૨૩॥

તાલકેતુઃ ષડાસ્યશ્ચ પઞ્ચાસ્યશ્ચ પ્રતાપવાન્ ।
સંવર્તકસ્તથા ચૈત્રો લઙ્કુલીશઃ સ્વયં પ્રભુઃ ॥ ૨૪॥

લોકાન્તકશ્ચ દીપ્તાત્મા તથા દૈત્યાન્તકઃ પ્રભુઃ ।
દેવો ભૃઙ્ગીરિટિઃ શ્રીમાન્દેવદેવપ્રિયસ્તથા ॥ ૨૫॥

અશનિર્ભાનુકશ્ચૈવ ચતુઃષષ્ટ્યા સહસ્રશઃ ।
કઙ્કાલઃ કાલકઃ કાલો નન્દી સર્વાન્તકસ્તથા ॥ ૨૬॥

એતે ચાન્યે ચ ગણપા અસઙ્ખ્યાતા મહાબલાઃ ।
યુદ્ધાર્થં નિર્યયુઃ પ્રીત્યા શઙ્ખચૂડેન નિર્ભયાઃ ॥ ૨૭॥

સર્વે સહસ્રહસ્તાશ્ચ જટામુકુટધારિણઃ ।
ચન્દ્રરેખાવતંસાશ્ચ નીલકણ્ઠાસ્ત્રિલોચનાઃ ॥ ૨૮॥

રુદ્રાક્ષાભરણાઃ સર્વે તથા સદ્ભસ્મધારિણઃ ।
હારકુણ્ડલકેયૂરમુકુટાદ્યૈરલઙ્કૃતાઃ ॥ ૨૯॥

બ્રહ્મેન્દ્રવિષ્ણુસઙ્કાશા અણિમાદિગુણૈર્વૃતાઃ ।
સૂર્યકોટિપ્રતીકાશાઃ પ્રવીણા યુદ્ધકર્મણિ ॥ ૩૦॥

પૃથિવીચારિણઃ કેચિત્કેચિત્પાતાલચારિણઃ ।
કેચિદ્ વ્યોમચરાઃ કેચિત્સપ્તસ્વર્ગચરા મુને ॥ ૩૧॥

કિં બહૂક્તેન દેવર્ષે સર્વલોકનિવાસિનઃ ।
યયુઃ શિવગણાઃ સર્વે યુદ્ધાર્થં દાનવૈઃ સહ ॥ ૩૨॥

અષ્ટૌ ચ ભૈરવા રૌદ્રા રુદ્રાશ્ચૈકાદશાશુ યે ।
વસવોઽષ્ટૌ વાસવશ્ચાદિત્યા દ્વાદશ તે દ્રુતમ્ ॥ ૩૩॥

હુતાશનશ્ચ ચન્દ્રશ્ચ વિશ્વકર્માશ્વિનૌ ચ તૌ ।
કુબેરશ્ચ યમશ્ચૈવ નિરૃતિર્નલકૂબરઃ ॥ ૩૪॥

વાયુશ્ચ વરુણશ્ચૈવ બુધશ્ચ મઙ્ગલશ્ચ વૈ ।
ગ્રહાશ્ચાન્યે મહેશેન કામદેવશ્ચ વીર્યવાન્ ॥ ૩૫॥

ઉગ્રદંષ્ટ્રશ્ચોગ્રદણ્ડઃ કોરટઃ કોટભસ્તથા ।
સ્વયં શતભુજા દેવી ભદ્રકાલી મહેશ્વરી ॥ ૩૬॥

રત્નેન્દ્રસારનિર્માણવિમાનોપરિ સંસ્થિતા ।

રક્તવસ્ત્રપરીધાના રક્તમાલ્યાનુલેપના ॥ ૩૭॥

નૃત્યન્તી ચ હસન્તી ચ ગાયન્તી સુસ્વરં મુદા ।
અભયં દદતી સ્વેભ્યો ભયં ચારિભ્ય એવ સા ॥ ૩૮॥

બિભ્રતી વિકટાં જિહ્વાં સુલીલાં યોજનાયતામ્ ।
શઙ્ખચક્રગદાપદ્મખડ્ગચર્મધનુઃ શરાન્ ॥ ૩૯॥

ખર્પરં વર્તુલાકારં ગમ્ભીરં યોજનાયતમ્ ।
ત્રિશૂલં ગગનસ્પર્શિ શક્તિં ચ યોજનાયતામ્ ॥ ૪૦॥

મુદ્ગરં મુસલં વજ્રં ખડ્ગં ફલકમુલ્બણમ્ ।
વૈષ્ણવાસ્ત્રં વારુણાસ્ત્રં વાયવ્યં નાગપાશકમ્ ॥ ૪૧॥

નારાયણાસ્ત્રં ગાન્ધર્વં બ્રહ્માસ્ત્રં ગારુડં તથા ।
પાર્જન્યં ચ પાશુપતં જૃમ્ભણાસ્ત્રં ચ પાર્વતમ્ ॥ ૪૨॥

મહાવીરં ચ સૌરં ચ કાલકાલં મહાનલમ્ ।
માહેશ્વરાસ્ત્રં યામ્યં ચ દણ્ડં સમ્મોહનં તથા ॥ ૪૩॥

સમર્થમસ્ત્રકં દિવ્યં દિવ્યાસ્ત્રં શતકં પરમ્ ।
બિભ્રતી ચ કરૈઃ સર્વૈરન્યાન્યપિ ચ સા તદા ॥ ૪૪॥

આગત્ય તસ્થૌ સા તત્ર યોગિનીનાં ત્રિકોટિભિઃ ।
સાર્ધં ચ ડાકિનીનાં વૈ વિકટાનાં ત્રિકોટિભિઃ ॥ ૪૫॥

ભૂતપ્રેતપિશાચાશ્ચ કૂષ્માણ્ડા બ્રહ્મરાક્ષસાઃ ।
વેતાલા રાક્ષસાશ્ચૈવ યક્ષાશ્ચૈવ સકિન્નરાઃ ॥ ૪૬॥

તશ્ચૈવાભિવૃતઃ સ્કન્દઃ પ્રણમ્ય ચન્દ્રશેખરમ્ ।
પિતુઃ પાર્શ્વે સહાયો યઃ સમુવાસ તદાજ્ઞયા ॥ ૪૭॥

અથ શમ્ભુઃ સમાનીય સ્વસૈન્યં સકલં તદા ।
યુદ્ધાર્થમગમદ્ રુદ્રઃ શંઙ્ખચૂડેન નિર્ભયઃ ॥ ૪૮॥

ચન્દ્રભાગાનદીતીરે વટમૂલે મનોહરે ।
તત્ર તસ્થૌ મહાદેવો દેવનિસ્તારહેતવે ॥ ૪૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડવધે મહાદેવયુદ્ધયાત્રાવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૫.૩૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૩૪. ચતુસ્ત્રિંશોઽધ્યાયઃ । શઙ્ખચૂડયાત્રાવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
વિધિતાત મહાબુદ્ધે મુને જીવ ચિરં સમાઃ ।
કથિતં સુમહચ્ચિત્રં ચરિતં ચન્દ્રમૌલિનઃ ॥ ૧॥

શિવદૂતે ગતે તત્ર શઙ્ખચૂડશ્ચ દાનવઃ ।
કિં ચકાર પ્રતાપી સ તત્ત્વં વદ સુવિસ્તરમ્ ॥ ૨॥

સનત્કુમાર ઉવાચ ।
અથ દૂતે ગતે તત્ર શઙ્ખચૂડઃ પ્રતાપવાન્ ।
ઉવાચ તુલસીં વાર્તાં ગત્વાભ્યન્તરમેવ તામ્ ॥ ૩॥

શઙ્ખચૂડ ઉવાચ ।
શમ્ભુદૂતમુખાદ્દેવિ યુદ્ધાયાહં સમુદ્યતઃ ।
તેન ગચ્છામ્યહં યોદ્ધું શાસનં કુરુ મે ધ્રુવમ્ ॥ ૪॥

ઇત્યેવમુક્ત્વા સ જ્ઞાની નાનાબોધનતઃ પ્રિયામ્ ।
ક્રીડાં ચકાર હર્ષેણ તમનાદૃત્ય શઙ્કરમ્ ॥ ૫॥

તૌ દમ્પતી ચિક્રીડાતે નિમગ્નૌ સુખસાગરે ।
નાનાકામકલાભિશ્ચ નિશિ ચાટુશતૈરપિ ॥ ૬॥

બ્રાહ્મે મુહૂર્તે ચોત્થાય પ્રાતઃકૃત્યં વિધાય ચ ।
નિત્યકાર્યં ચ કૃત્વાદૌ દદૌ દાનમનન્તકમ્ ॥ ૭॥

પુત્રં કૃત્વા ચ રાજેન્દ્રં સર્વેષુ દાનવેષુ ચ ।
પુત્રે સમર્પ્ય ભાર્યાં ચ સ રાજ્યં સર્વસમ્પદમ્ ॥ ૮॥

પ્રિયામાશ્વાસયામાસ સ રાજા રુદતીં પુનઃ ।
નિષેધન્તીં ચ ગમનં નાના વાર્તાં પ્રકથ્ય ચ ॥ ૯॥

નિજસેનાપતિં વીરં સમાહૂય સમાદૃતઃ ।

આદિદેશ સ સનદ્ધઃ સઙ્ગ્રામં કર્તુમુદ્યતઃ ॥ ૧૦॥

શઙ્ખચૂડ ઉવાચ ।
અદ્ય સેનાપતે વીરાઃ સર્વે સમરશાલિનઃ ।
સન્નદ્ધાખિલકર્માણો નિર્ગચ્છન્તુ રણાય ચ ॥ ૧૧॥

દૈત્યાશ્ચ દાનવાઃ શૂરા ષડશીતિરુદાયુધાઃ ।
કઙ્કાનાં બલિનાં શીઘ્રં સેના નિર્યાન્તુ નિર્ભયાઃ ॥ ૧૨॥

પઞ્ચાશદસુરાણાં હિ નિર્ગચ્છન્તુ કુલાનિ વૈ ।
કોટિવીર્યાણિ યુદ્ધાર્થં શમ્ભુના દેવપક્ષિણા ॥ ૧૩॥

સન્નદ્ધાનિ ચ ધૌમ્રાણાં કુલાનિ ચ શતં દ્રુતમ્ ।
નિર્ગચ્છન્તુ રણાર્થં હિ શમ્ભુના મમ શાસનાત્ ॥ ૧૪॥

કાલકેયાશ્ચ મૌર્યાશ્ચ દૌર્હૃદાઃ કાલકાસ્તથા ।
સજ્જા નિર્યાન્તુ યુદ્ધાય રુદ્રેણ મમ શાસનાત્ ॥ ૧૫॥

સનત્કુમાર ઉવાચ ।
ઇત્યાજ્ઞાપ્યાસુરપતિર્દાનવેન્દ્રો મહાબલઃ ।
નિર્જગામ મહાસૈન્યઃ સહસ્રૈર્બહુભિર્વૃતઃ ॥ ૧૬॥

તસ્ય સેનાપતિશ્ચૈવ યુદ્ધશાસ્ત્રવિશારદઃ ।
મહારથો મહાવીરો રથિનાં પ્રવરો રણે ॥ ૧૭॥

ત્રિલક્ષાક્ષૌહિણીયુક્તો માણ્ડલ્યં ચ ચકાર હ ।
બહિર્બભૂવ શિવિરાદ્રણે વીરભયઙ્કરઃ ॥ ૧૮॥

રત્નેન્દ્રસારનિર્માણં વિમાનમભિરુહ્ય સઃ ।
ગુરુવર્ગં પુરસ્કૃત્ય રણાર્થં પ્રયયૌ કિલ ॥ ૧૯॥

પુષ્પભદ્રાનદીતીરે યત્રાક્ષયવટઃ શુભઃ ।
સિદ્ધાશ્રમે ચ સિદ્ધાનાં સિદ્ધિક્ષેત્રં સુસિદ્ધિદમ્ ॥ ૨૦॥

કપિલસ્ય તતઃસ્થાનં પુણ્યક્ષેત્રે ચ ભારતે ।
પશ્ચિમોદધિપૂર્વે ચ મલયસ્ય હિ પશ્ચિમે ॥ ૨૧॥

શ્રીશૈલોત્તરભાગે ચ ગન્ધમાદનદક્ષિણે ।
પઞ્ચયોજનવિસ્તીર્ણે દૈર્ઘ્યે શતગુણસ્તથા ॥ ૨૨॥

શુદ્ધસ્ફટિકસઙ્કાશા ભારતે ચ સુપુણ્યદા ।

પુષ્પભદ્રા નદી રમ્યા જલપૂર્ણા સરસ્વતી ॥ ૨૩॥

લવણોદધિપ્રિયા ભાર્યા શશ્વત્સૌભાગ્યસંયુતા ।
સરસ્વતીસંશ્રિતા ચ નિર્ગતા સા હિમાલયાત્ ॥ ૨૪॥

ગોમન્તં વામતઃ કૃત્વા પ્રવિષ્ટા પશ્ચિમોદધૌ ।
તત્ર ગત્વા શઙ્ખચૂડઃ શિવસેનાં દદર્શ હ ॥ ૨૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડયાત્રાવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૫.૩૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૩૫. પઞ્ચત્રિંશોઽધ્યાયઃ । શઙ્ખચૂડયાત્રાવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
તત્ર સ્થિત્વા દાનવેન્દ્રો મહાન્તં દાનવેશ્વરમ્ ।
દૂતં કૃત્વા મહાવિજ્ઞં પ્રેષયામાસ શઙ્કરમ્ ॥ ૧॥

સ તત્ર ગત્વા દૂતશ્ચ ચન્દ્રભાલં દદર્શ હ ।
વટમૂલે સમાસીનં સૂર્યકોટિસમપ્રભમ્ ॥ ૨॥

કૃત્વા યોગાસનં દૃષ્ટ્યા મુદ્રાયુક્તં ચ સસ્મિતમ્ ।
શુદ્ધસ્ફટિકસઙ્કાશં જ્વલન્તં બ્રહ્મતેજસા ॥ ૩॥

ત્રિશૂલપટ્ટિશધરં વ્યાઘ્રચર્માંમ્બરાવૃતમ્ ।
ભક્તમૃત્યુહરં શાન્તં ગૌરીકાન્તં ત્રિલોચનમ્ ॥ ૪॥

તપસાં ફલદાતારં કર્ત્તારં સર્વસમ્પદામ્ ।
આશુતોષં પ્રસન્નાસ્યં ભક્તાનુગ્રહકારકમ્ ॥ ૫॥

વિશ્વનાથં વિશ્વબીજં વિશ્વરૂપં ચ વિશ્વજમ્ ।
વિશ્વેસ્વરં વિશ્વકરં વિશ્વસંહારકારણમ્ ॥ ૬॥

કારણં કારણાનાં ચ નરકાર્ણવતારકમ્ ।
જ્ઞાનપ્રદં જ્ઞાનબીજં જ્ઞાનાનન્દં સનાતનમ્ ॥ ૭॥

અવરુહ્ય રથાદ્ દૂતસ્તં દૃષ્ટ્વા દાનવેશ્વરઃ ।
શઙ્કરં સકુમારં ચ શિરસા પ્રણનામ સઃ ॥ ૮॥

વામતો ભદ્રકાલીં ચ સ્કન્દં તત્પુરતઃ સ્થિતમ્ ।
લોકાશિષં દદૌ તસ્મૈ કાલી સ્કન્દશ્ચ શઙ્કરઃ ॥ ૯॥

અથાસૌ શઙ્ખચૂડસ્ય દૂતઃ પરમશાસ્ત્રવિત્ ।
ઉવાચ શઙ્કરં નત્વા કરૌ બદ્ધ્વા શુભં વચઃ ॥ ૧૦॥

દૂત ઉવાચ ।
શઙ્ખચૂડસ્ય દૂતોઽહં ત્વત્સકાશમિહાગતઃ ।
વર્તતે તે કિમિચ્છાદ્ય તત્ત્વં બ્રૂહિ મહેશ્વર ॥ ૧૧॥

સનત્કુમાર ઉવાચ ।
ઇતિ શ્રુત્વા ચ વચનં શઙ્ખચૂડસ્ય શઙ્કરઃ ।
પ્રસન્નાત્મા મહાદેવો ભગવાંસ્તમુવાચ હ ॥ ૧૨॥

મહાદેવ ઉવાચ ।
શૃણુ દૂત મહાપ્રાજ્ઞ વચો મમ સુખાવહમ્ ।
કથનીયમિદં તસ્મૈ નિર્વિવાદં વિચાર્ય ચ ॥ ૧૩॥

વિધાતા જગતાં બ્રહ્મા પિતા ધર્મસ્ય ધર્મવિત્ ।
મરીચિસ્તસ્ય પુત્રશ્ચ કશ્યપસ્તત્સુતઃ સ્મૃતઃ ॥ ૧૪॥

દક્ષઃ પ્રીત્યા દદૌ તસ્મૈ નિજકન્યાસ્ત્રયોદશ ।
તાસ્વેકા ચ દનુઃ સાધ્વી તત્સૌભાગ્યવિવર્દ્ધિની ॥ ૧૫॥

ચત્વારસ્તે દનોઃ પુત્રા દાનવાસ્તેજસોલ્બણાઃ ।
તેષ્વેકો વિપ્રચિત્તિસ્તુ મહાબલપરાક્રમઃ ॥ ૧૬॥

તત્પુત્રો ધાર્મિકો દમ્ભો દાનવેન્દ્રો મહામતિઃ ।
તસ્ય ત્વં તનયઃ શ્રેષ્ઠો ધર્માત્મા દાનવેશ્વરઃ ॥ ૧૭॥

પુરા ત્વં પાર્ષદો ગોપો ગોપેષ્વેવ ચ ધાર્મિકઃ ।
અધુના રાધિકાશાપાજ્જાતસ્ત્વં દાનવેશ્વરઃ ॥ ૧૮॥

દાનવીં યોનિમાયાતસ્તત્ત્વતો ન હિ દાનવઃ ।
નિજવૃત્તં પુરા જ્ઞાત્વા દૈવવૈરં ત્યજાધુના ॥ ૧૯॥

દ્રોહં ન કુરુ તૈઃ સાર્દ્ધં સ્વપદં ભુઙ્ક્ષ્વ સાદરમ્ ।

નાધિકં સવિકારં ચ કુરુ રાજ્યં વિચાર્ય ચ ॥ ૨૦॥

દેહિ રાજ્યં ચ દેવાનાં મત્પ્રીતિં રક્ષ દાનવ ।
નિજરાજ્યે સુખં તિષ્ઠ તિષ્ઠન્તુ સ્વપદે સુરાઃ ॥ ૨૧॥

અલં ભૂતવિરોધેન દેવદ્રોહેણ કિં પુનઃ ।
કુલીનાઃ શુદ્ધકર્માણઃ સર્વે કશ્યપવંશજાઃ ॥ ૨૨॥

યાનિ કાનિ ચ પાપાનિ બ્રહ્મહત્યાદિકાનિ ચ ।
જ્ઞાતિદ્રોહજપાપસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૨૩॥

સનત્કુમાર ઉવાચ ।
ઇત્યાદિબહુવાર્ત્તાં ચ શ્રુતિસ્મૃતિપરાં શુભામ્ ।
પ્રોવાચ શઙ્કરઃ તસ્મૈ બોધયન્ જ્ઞાનમુત્તમમ્ ॥ ૨૪॥

શિક્ષિતઃ શઙ્ખચૂડેન સ દૂતસ્તર્કવિત્તમઃ ।
ઉવાચ વચનં નમ્રો ભવિતવ્યવિમોહિતઃ ॥ ૨૫॥

દૂત ઉવાચ ।
ત્વયા યત્કથિતં દેવ નાન્યથા તત્તથા વચઃ ।
તથ્યં કિઞ્ચિદ્યથાર્થં ચ શ્રૂયતાં મે નિવેદનમ્ ॥ ૨૬॥

જ્ઞાતિદ્રોહે મહત્પાપં ત્વયોક્તમધુના ચ યત્ ।
તત્કિમીશાસુરાણાં ચ ન સુરાણાં વદ પ્રભો ॥ ૨૭॥

સર્વેષામિતિ ચેત્તદ્વૈ તદા વચ્મિ વિચાર્ય ચ ।
નિર્ણયં બ્રૂહિ તત્રાદ્ય કુરુ સન્દેહભઞ્જનમ્ ॥ ૨૮॥

મધુકૈટભયોર્દૈત્યવરયોઃ પ્રલયાર્ણવે ।
શિરશ્છેદં ચકારાસૌ કસ્માચ્ચક્રી મહેશ્વર ॥ ૨૯॥

ત્રિપુરૈઃસહ સંયુદ્ધં ભસ્મત્વકરણં કુતઃ ।
ભવાઞ્ચકાર ગિરિશ સુરપક્ષીતિ વિશ્રુતમ્ ॥ ૩૦॥

ગૃહીત્વા તસ્ય સર્વસ્વં કુતઃ પ્રસ્થાપિતો બલિઃ ।
સુતલાદિ સમુદ્ધર્તું તદ્દ્વારે ચ ગદાધરઃ ॥ ૩૧॥

સભ્રાતૃકો હિરણ્યાક્ષઃ કથં દેવૈશ્ચ હિંસિતઃ ।
શુમ્ભાદયોઽસુરાશ્ચૈવ કથં દેવૈર્નિપાતિતાઃ ॥ ૩૨॥

પુરા સમુદ્રમથને પીયૂષં ભક્ષિતં સુરૈઃ ।

ક્લેશભાજો વયં તત્ર તે સર્વે ફલભોગિનઃ ॥ ૩૩॥

ક્રીડાભાણ્ડમિદં વિશ્વં કાલસ્ય પરમાત્મનઃ ।
સ દદાતિ યદા યસ્મૈ તસ્યૈશ્વર્યં ભવેત્તદા ॥ ૩૪॥

દેવદાનવયોર્વૈરં શશ્વન્નૈમિત્તિકં સદા ।
પરાજયો જયસ્તેષાં કાલાધીનઃ ક્રમેણ ચ ॥ ૩૫॥

તવાનયોર્વિરોધે ચ ગમનં નિષ્ફલં ભવેત્ ।
સમસમ્બન્ધિનાં તદ્વૈ રોચતે નેશ્વરસ્ય તે ॥ ૩૬॥

સુરાસુરાણાં સર્વેષામીશ્વરસ્ય મહાત્મનઃ ।
ઇયં તે રહિતા લજ્જા સ્પર્ધાસ્માભિઃ સહાધુના ॥ ૩૭॥

યતોઽધિકા ચૈવ કીર્તિર્હાનિશ્ચૈવ પરાજયે ।
તવૈતદ્વિપરીતં ચ મનસા સંવિચાર્યતામ્ ॥ ૩૮॥

સનત્કુમાર ઉવાચ ।
ઇત્યેતદ્વચનં શ્રુત્વા સમ્પ્રહસ્ય ત્રિલોચનઃ ।
યથોચિતં ચ મધુરમુવાચ દાનવેશ્વરમ્ ॥ ૩૯॥

મહેશ ઉવાચ ।
વયં ભક્તપરાધીના ન સ્વતન્ત્રાઃ કદાપિ હિ ।
તદિચ્છયા તત્કર્માણો ન કસ્યાપિ ચ પક્ષિણઃ ॥ ૪૦॥

પુરા વિધિપ્રાર્થનયા યુદ્ધમાદૌ હરેરપિ ।
મધુકૈટભયોર્દૈત્યવરયોઃ પ્રલયાર્ણવે ॥ ૪૧॥

દેવપ્રાર્થનયા તેન હિરણ્યકશિપોઃ પુરા ।
પ્રહ્લાદાર્થં વધોઽકારિ ભક્તાનાં હિતકારિણા ॥ ૪૨॥

ત્રિપુરૈઃ સહ સંયુદ્ધં ભસ્મત્વકરણં તતઃ ।
દેવપ્રાર્થનયાકારિ મયાપિ ચ પુરા શ્રુતમ્ ॥ ૪૩॥

સર્વેશ્વર્યાઃ સર્વમાતુર્દેવપ્રાર્થનયા પુરા ।
આસીચ્છુમ્ભાદિભિર્યુદ્ધં વધસ્તેષાં તયા કૃતઃ ॥ ૪૪॥

અદ્યાપિ ત્રિદશાઃ સર્વે બ્રહ્માણં શરણં યયુઃ ।
સ સદેવો હરિર્માં ચ દેવઃ શરણમાગતઃ ॥ ૪૫॥

હરિબ્રહ્માદિકાનાં ચ પ્રાર્થનાવશતોઽપ્યહમ્ ।

સુરાણામીશ્વરો દૂત યુદ્ધાર્થમગમં ખલુ ॥ ૪૬॥

પાર્ષદપ્રવરસ્ત્વં હિ કૃષ્ણસ્ય ચ મહાત્મનઃ ।
યે યે હતાશ્ચ દૈતેયા ન હિ કેઽપિ ત્વયા સમાઃ ॥ ૪૭॥

કા લજ્જા મહતી રાજન્ મમ યુદ્ધે ત્વયા સહ ।
દેવકાર્યાર્થમીશોઽહં વિનયેન ચ પ્રેષિતઃ ॥ ૪૮॥

ગચ્છ ત્વં શઙ્ખચૂડં વૈ કથનીયં ચ મે વચઃ ।
સ ચ યુક્તં કરોત્વત્ર સુરકાર્યં કરોમ્યહમ્ ॥ ૪૯॥

ઇત્યુક્ત્વા શઙ્કરસ્તત્ર વિરરામ મહેશ્વરઃ ।
ઉત્તસ્થૌ શઙ્ખચૂડસ્ય દૂતોઽગચ્છત્તદન્તિકમ્ ॥ ૫૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડવધે શિવદૂતસંવાદો નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૨.૫.૩૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૩૬. ષટ્સ્ત્રિંશોઽધ્યાયઃ । શઙ્ખચૂડવધે પરસ્પરયુદ્ધવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
સ દૂતસ્તત્ર ગત્વા ચ શિવવાક્યં જગાદ હ ।
સવિસ્તરં યથાર્થં ચ નિશ્ચયં તસ્ય તત્ત્વતઃ ॥ ૧॥

તચ્છ્રુત્વા શઙ્ખચૂડોઽસૌ દાનવેન્દ્રઃ પ્રતાપવાન્ ।
અઙ્ગીચકાર સુપ્રીત્યા રણમેવ સ દાનવઃ ॥ ૨॥

સમારુરોહ યાનં ચ સહામાત્યૈશ્ચ સત્વરઃ ।
આદિદેશ સ્વસૈન્યં ચ યુદ્ધાર્થં શઙ્કરેણ ચ ॥ ૩॥

શિવઃ સ્વસૈન્યં દેવાંશ્ચ પ્રેરયામાસ સત્વરઃ ।
સ્વયમપ્યખિલેશોઽપિ સન્નદ્ધોઽભૂચ્ચ લીલયા ॥ ૪॥

યુદ્ધારમ્ભો બભૂવાશુ નેદુર્વાદ્યાનિ ભૂરિશઃ ।
કોલાહલશ્ચ સઞ્જાતો વીરશબ્દસ્તથૈવ ચ ॥ ૫॥

દેવદાનવયોર્યુદ્ધં પરસ્પરમભૂન્મુને ।
ધર્મતો યુયુધે તત્ર દેવદાનવયોર્ગણઃ ॥ ૬॥

સ્વયં મહેન્દ્રો યુયુધે સાર્ધં ચ વૃષપર્વણા ।
ભાસ્કરો યુયુધે વિપ્રચિત્તિના સહ ધર્મતઃ ॥ ૭॥

દમ્ભેન સહ વિષ્ણુશ્ચ ચકાર પરમં રણમ્ ।
કાલાસુરેણ કાલશ્ચ ગોકર્ણેન હુતાશનઃ ॥ ૮॥

કુબેરઃ કાલકેયેન વિશ્વકર્મા મયેન ચ ।
ભયઙ્કરેણ મૃત્યુશ્ચ સંહારેણ યમસ્તથા ॥ ૯॥

કાલમ્બિકેન વરુણશ્ચઞ્ચલેન સમીરણઃ ।
બુધશ્ચ ઘટપૃષ્ઠેન રક્તાક્ષેણ શનૈશ્ચરઃ ॥ ૧૦॥

જયન્તો રત્નસારેણ વસવો વર્ચસાં ગણૈઃ ।
અશ્વિનૌ દીપ્તિમદ્ભ્યાં ચ ધૂમ્રેણ નલકૂબરઃ ॥ ૧૧॥

ધુરન્ધરેણ ધર્મશ્ચ ગણકાક્ષેણ મઙ્ગલઃ ।
શોભાકરેણ વૈશ્વાનઃ પિપિટેન ચ મન્મથઃ ॥ ૧૨॥

ગોકામુખેન ચૂર્ણેન ખડ્ગનામ્નાસુરેણ ચ ।
ધૂમ્રેણ સંહલેનાપિ વિશ્વેન ચ પ્રતાપિના ॥ ૧૩॥

દ્વાદશાર્કા પલાશેન યુયુધુર્ધર્મતઃ પરે ।
અસુરૈરમરાઃ સાર્દ્ધં શિવસાહાય્યશાલિનઃ ॥ ૧૪॥

એકાદશ મહારુદ્રાશ્ચૈકાદશભયઙ્કરૈઃ ।
અસુરૈર્યુયુધુર્વીરૈર્મહાબલપરાક્રમૈઃ ॥ ૧૫॥

મહામણિશ્ચ યુયુધે ચોગ્રચણ્ડાદિભિઃ સહ ।
રાહુણા સહ ચન્દ્રશ્ચ જીવઃ શુક્રેણ ધર્મતઃ ॥ ૧૬॥

નન્દીશ્વરાદયઃ સર્વે દાનવપ્રવરૈઃ સહ ।
યુયુધુશ્ચ મહાયુદ્ધે નોક્તા વિસ્તરતઃ પૃથક્ ॥ ૧૭॥

વટમૂલે તદા શમ્ભુસ્તસ્થૌ કાલ્યાઃ સુતેન ચ ।
સર્વે ચ યુયુધુઃ સૈન્યસમૂહાઃ સતતં મુને ॥ ૧૮॥

રત્નસિંહાસને રમ્યે કોટિદાનવસંયુતે ।
ઉવાસ શઙ્ખચૂડશ્ચ રત્નભૂષણભૂષિતઃ ॥ ૧૯॥

મહાયુદ્ધો બભૂવાથ દેવાસુરવિમર્દનઃ ।
નાનાયુધાનિ દિવ્યાનિ ચલન્તિ સ્મ મહામૃધે ॥ ૨૦॥

ગદર્ષ્ટિપટ્ટિશાશ્ચક્રભુશુણ્ડિપ્રાસમુદ્ગરાઃ ।
નિસ્ત્રિંશભલ્લપરિઘાઃ શક્ત્યુન્મુખપરશ્વધાઃ ॥ ૨૧॥

શરતોમરખડ્ગાશ્ચ શતઘ્ન્યશ્ચ સહસ્રશઃ ।
ભિન્દિપાલાદયશ્ચાન્યે વીરહસ્તેષુ શોભિતાઃ ॥ ૨૨॥

શિરાંસિ ચિચ્છિદુશ્ચૈભિર્વીરાસ્તત્ર મહોત્સવાઃ ।
વીરાણામુભયોશ્ચૈવ સૈન્યયોર્ગર્જતો રણે ॥ ૨૩॥

ગજાસ્તુરઙ્ગા બહવઃ સ્યન્દનાશ્ચ પદાતયઃ ।
સારોહવાહા વિવિધાસ્તત્રાસન્ સુવિખણ્ડિતાઃ ॥ ૨૪॥

નિકૃત્તબાહૂરુકરકટિકર્ણયુગાઙ્ઘ્રયઃ ।
સઞ્છિન્નધ્વજબાણાસિતનુત્રવરભૂષણાઃ ॥ ૨૫॥

સમુદ્ધતકિરીટૈશ્ચ શિરોભિઃ સહ કુણ્ડલૈઃ ।
સંરમ્ભનષ્ટૈરાસ્તીર્ણા બભૌ ભૂઃ કરભોરુભિઃ ॥ ૨૬॥

મહાભુજૈઃ સાભરણૈઃ સઞ્છિન્નૈઃ સાયુધૈસ્તથા ।
અઙ્ગૈરન્યૈશ્ચ સહસા પટલૈર્વા સસારઘૈઃ ॥ ૨૭॥

મૃધે ભટાઃ પ્રધાવન્તઃ કબન્ધાન્ સ્વશિરોક્ષિભિઃ ।
પશ્યન્તસ્તત્ર ચોત્પેતુરુદ્યતાયુધસદ્ભુજૈઃ ॥ ૨૮॥

વલ્ગન્તોઽતિતરાં વીરા યુયુધુશ્ચ પરસ્પરમ્ ।
શસ્ત્રાસ્ત્રૈર્વિવિધૈસ્તત્ર મહાબલપરાક્રમાઃ ॥ ૨૯॥

કેચિત્સ્વર્ણમુખૈર્બાણૈર્વિનિહત્ય ભટાન્મૃધે ।
વ્યનદન્ વીરસન્નાદં સતોયા ઇવ તોયદાઃ ॥ ૩૦॥

સર્વતઃ શરકૂટેન વીરઃ સરથસારથિમ્ ।
વીરં સઞ્છાદયામાસ પ્રાવૃટ્સૂર્યમિવામ્બુદઃ ॥ ૩૧॥

અન્યોઽન્યમભિસંસૃત્ય યુયુધુર્દ્વન્દ્વયોધિનઃ ।
આહ્વયન્તો વિશન્તોઽગ્રે ક્ષિપન્તો મર્મભિર્મિથઃ ॥ ૩૨॥

સર્વતો વીરસઙ્ઘાશ્ચ નાનાબાહુધ્વજાયુધાઃ ।

વ્યદૃશ્યન્ત મહાસઙ્ખ્યે કુર્વન્તઃ સિંહસંરવમ્ ॥ ૩૩॥

મહારવાન્ સ્વશઙ્ખાંશ્ચ વિદધ્મુર્વૈ પૃથક્ પૃથક્ ।
વલ્ગનં ચક્રિરે તત્ર મહાવીરાઃ પ્રહર્ષિતાઃ ॥ ૩૪॥

એવં ચિરતરં કાલં દેવદાનવયોર્મહત્ ।
બભૂવ યુદ્ધં વિકટં કરાલં વીરહર્ષદમ્ ॥ ૩૫॥

મહાપ્રભોશ્ચ લીલેયં શઙ્કરસ્ય પરાત્મનઃ ।
યયા સમોહિતં સર્વં સદેવાસુરમાનુષમ્ ॥ ૩૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડવધે પરસ્પરયુદ્ધવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૫.૩૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૩૭. સપ્તત્રિંશોઽધ્યાયઃ । શઙ્ખચૂડવધે સસૈન્યશઙ્ખચૂડયુદ્ધવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
તદા દેવગણાઃ સર્વે દાનવૈશ્ચ પરાજિતાઃ ।
દુદ્રુવુર્ભયભીતાશ્ચ શસ્ત્રાસ્ત્રક્ષતવિગ્રહાઃ ॥ ૧॥

તે પરાવૃત્ય વિશ્વેશં શઙ્કરં શરણં યયુઃ ।
ત્રાહિ ત્રાહીતિ સર્વેશેત્યૂચુર્વિહ્વલયા ગિરા ॥ ૨॥

દૃષ્ટ્વા પરાજયં તેષાં દેવાદીનાં સ શઙ્કરઃ ।
સભયં વચનં શ્રુત્વા કોપમુચ્ચૈશ્ચકાર હ ॥ ૩॥

નિરીક્ષ્ય સ કૃપાદૃષ્ટ્યા દેવેભ્યશ્ચાભયં દદૌ ।
બલં ચ સ્વગણાનાં વૈ વર્દ્ધયામાસ તેજસા ॥ ૪॥

શિવાજ્ઞપ્તસ્તદા સ્કન્દો દાનવાનાં ગણૈઃ સહ ।
યુયુધે નિર્ભયઃ સઙ્ખ્યે મહાવીરો હરાત્મજઃ ॥ ૫॥

કૃત્વા ક્રોધં વીરશબ્દં દેવો યસ્તારકાન્તકઃ ।
અક્ષૌહિણીનાં શતકં સમરે સ જઘાન હ ॥ ૬॥

રુધિરં પાતયામાસ કાલી કમલલોચના ।
તેષાં શિરાંસિ સઞ્છિદ્ય બભક્ષ સહસા ચ સા ॥ ૭॥

પપૌ રક્તાનિ તેષાં ચ દાનવાનાં સમન્તતઃ ।
યુદ્ધં ચકાર વિવિધં સુરદાનવભીષણમ્ ॥ ૮॥

શતલક્ષં ગજેન્દ્રાણાં દાનવાનાં તથા રણે ।
સમાદાયૈકહસ્તેન મુખે ચિક્ષેપ લીલયા ॥ ૯॥

કબન્ધાનાં સહસ્રં ચ સન્નનર્ત રણે બહુ ।
મહાન્ કોલાહલો જાતઃ ક્લીબાનાં ચ ભયઙ્કરઃ ॥ ૧૦॥

પુનઃ સ્કન્દઃ પ્રકુપ્યોચ્ચૈઃ શરવર્ષાં ચકાર હ ।
પાતયામાસ ક્ષણતઃ કોટિશોઽસુરનાયકાન્ ॥ ૧૧॥

દાનવાઃ શરજાલેન સ્કન્દસ્ય ક્ષતવિગ્રહાઃ ।
ભીતાઃ પ્રદુદ્રુવુઃ સર્વે શેષા મરણતસ્તદા ॥ ૧૨॥

વૃષપર્વા વિપ્રચિત્તિર્દણ્ડશ્ચાપિ વિકમ્પનઃ ।
સ્કન્દેન યુયુધુઃ સાર્દ્ધં તેન સર્વે ક્રમેણ ચ ॥ ૧૩॥

મહામારી ચ યુયુધે ન બભૂવ પરાઙ્મુખી ।
બભૂવુસ્તે ક્ષતાઙ્ગાશ્ચ સ્કન્દશક્તિપ્રપીડિતાઃ ॥ ૧૪॥

મહામારીસ્કન્દયોશ્ચ વિજયોઽભૂત્તદા મુને ।
નેદુર્દુન્દુભયઃ સ્વર્ગે પુષ્પવૃષ્ટિઃ પપાત હ ॥ ૧૫॥

સ્કન્દસ્ય સમરં દૃષ્ટ્વા મહારૌદ્રં તમદ્ભુતમ્ ।
દાનવાનાં ક્ષયકરં યથા પ્રકૃતિકલ્પકમ્ ॥ ૧૬॥

મહામારીકૃતં તચ્ચોપદ્રવં ક્ષયહેતુકમ્ ।
ચુકોપાતીવ સહસા સનદ્ધોઽભૂત્સ્વયં તદા ॥ ૧૭॥

વરં વિમાનમારુહ્ય નાનાશસ્ત્રાસ્ત્રસંયુતમ્ ।
અભયં સર્વવીરાણાં નાનારત્નપરિચ્છદમ્ ॥ ૧૮॥

મહાવીરૈઃ શઙ્ખચૂડો જગામ રથમધ્યતઃ ।
ધનુર્વિકૃષ્ય કર્ણાન્તં ચકાર શરવર્ષણમ્ ॥ ૧૯॥

તસ્ય સા શરવૃષ્ટિશ્ચ દુર્નિવાર્યા ભયઙ્કરી ।
મહાઘોરાન્ધકારશ્ચ વધસ્થાને બભૂવ હ ॥ ૨૦॥

દેવાઃ પ્રદુદ્રુવુઃ સર્વે યેઽન્યે નન્દીશ્વરાદયઃ ।
એક એવ કાર્ત્તિકેયસ્તસ્થૌ સમરમૂર્દ્ધનિ ॥ ૨૧॥

પર્વતાનાં ચ સર્પાણાં નાગાનાં શાખિનાં તથા ।
રાજા ચકાર વૃષ્ટિં ચ દુર્નિવાર્યાં ભયઙ્કરીમ્ ॥ ૨૨॥

તદ્દૃષ્ટ્યા પ્રહતઃ સ્કન્દો બભૂવ શિવનન્દનઃ ।
નીહારેણ ચ સાન્દ્રેણ સંવૃતો ભાસ્કરો યથા ॥ ૨૩॥

નાનાવિધાં સ્વમાયાં ચ ચકાર મયદર્શિતામ્ ।
તાં નાવિદન્ સુરાઃ કેઽપિ ગણાશ્ચ મુનિસત્તમ ॥ ૨૪॥

તદૈવ શઙ્ખચૂડશ્ચ મહામાયી મહાબલઃ ।
શરેણૈકેન દિવ્યેન ધનુશ્ચિચ્છેદ તસ્ય વૈ ॥ ૨૫॥

બભઞ્જ તદ્રથં દિવ્યં ચિચ્છેદ રથરક્ષકાન્ ।
મયૂરં જર્જરીભૂતં દિવ્યાસ્ત્રેણ ચકાર સઃ ॥ ૨૬॥

શક્તિં ચિક્ષેપ સૂર્યાભાં તસ્ય વક્ષસિ ઘાતિનીમ્ ।
મૂર્ચ્છામવાપ સહસા તત્પ્રહારેણ સ ક્ષણમ્ ॥ ૨૭॥

પુનશ્ચ ચેતનાં પ્રાપ્ય કાર્તિકઃ પરવીરહા ।
રત્નેન્દ્રસારનિર્માણમારુરોહ સ્વવાહનમ્ ॥ ૨૮॥

સ્મૃત્વા પાદૌ મહેશસ્ય સામ્બિકસ્ય ચ ષણ્મુખઃ ।
શસ્ત્રાસ્ત્રાણિ ગૃહીત્વૈવ ચકાર રણમુલ્બણમ્ ॥ ૨૯॥

સર્પાંશ્ચ પર્વતાંશ્ચૈવ વૃક્ષાંશ્ચ પ્રસ્તરાંસ્તથા ।
સર્વાંશ્ચિચ્છેદ કોપેન દિવ્યાસ્ત્રેણ શિવાત્મજઃ ॥ ૩૦॥

વહ્નિં નિવારયામાસ પાર્જન્યેન શરેણ હ ।
રથં ધનુશ્ચ ચિચ્છેદ શઙ્ખચૂડસ્ય લીલયા ॥ ૩૧॥

સન્નાહં સર્વવાહાંશ્ચ કિરીટં મુકુટોજ્જ્વલમ્ ।
વીરશબ્દં ચકારાસૌ જગર્જ ચ પુનઃ પુનઃ ॥ ૩૨॥

ચિક્ષેપ શક્તિં સૂર્યાભાં દાનવેન્દ્રસ્ય વક્ષસિ ।
તત્પ્રહારેણ સમ્પ્રાપ મૂર્ચ્છાં દીર્ઘતમેન ચ ॥ ૩૩॥

મુહૂર્તમાત્રં તત્ક્લેશં વિનીય સ મહાબલઃ ।

ચેતનાં પ્રાપ્ય ચોત્તસ્થૌ જગર્જ હરિવર્ચસઃ ॥ ૩૪॥

શક્ત્યા જઘાન તં ચાપિ કાર્તિકેયં મહાબલમ્ ।
સ પપાત મહીપૃષ્ઠેઽમોઘાં કુર્વન્ વિધિપ્રદામ્ ॥ ૩૫॥

કાલી ગૃહીત્વા તં ક્રોડે નિનાય શિવસન્નિધૌ ।
જ્ઞાનેન તં શિવશ્ચાપિ જીવયામાસ લીલયા ॥ ૩૬॥

દદૌ બલમનન્તં ચ સમુત્તસ્થૌ પ્રતાપવાન્ ।
ગમનાય મતિં ચક્રે પુનસ્તત્ર શિવાત્મજઃ ॥ ૩૭॥

એતસ્મિન્નન્તરે વીરો વીરભદ્રો મહાબલઃ ।
શઙ્ખચૂડેન યુયુધે સમરે બલશાલિના ॥ ૩૮॥

વવર્ષ સમરેઽસ્ત્રાણિ યાનિ યાનિ ચ દાનવઃ ।
ચિચ્છેદ લીલયા વીરસ્તાનિ તાનિ નિજૈઃ શરૈઃ ॥ ૩૯॥

દિવ્યાન્યસ્ત્રાણિ શતશો મુમુચે દાનવેશ્વરઃ ।
તાનિ ચિચ્છેદ તં બાણૈર્વીરભદ્રઃ પ્રતાપવાન્ ॥ ૪૦॥

અથાતીવ ચુકોપોચ્ચૈઃ શઙ્ખચૂડઃ પ્રતાપવાન્ ।
શક્ત્યા જઘાનોરસિ તં સ ચકમ્પે પપાત કૌ ॥ ૪૧॥

ક્ષણેન ચેતનાં પ્રાપ્ય સમુત્તસ્થૌ ગણેશ્વરઃ ।
જગ્રાહ ચ ધનુર્ભૂયો વીરભદ્રો ગણાગ્રણીઃ ॥ ૪૨॥

એતસ્મિન્નન્તરે કાલી જગામ સમરં પુનઃ ।
ભક્ષિતું દાનવાન્ સ્વાંશ્ચ રક્ષિતું કાર્તિકેચ્છયા ॥ ૪૩॥

વીરાસ્તામનુજગ્મુશ્ચ તે ચ નન્દીશ્વરાદયઃ ।
સર્વે દેવાશ્ચ ગન્ધર્વા યક્ષા રક્ષાંસિ પન્નગાઃ ॥ ૪૪॥

મદ્યભાણ્ડાશ્ચ બહુશઃ શતશો વાદ્યવાહકાઃ ।
પુનઃ સમુદ્યતાશ્ચાસન્ વીરા ઉભયતોઽખિલાઃ ॥ ૪૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડવધે સસૈન્યશઙ્ખચૂડયુદ્ધવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૨.૫.૩૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૩૮. અષ્ટત્રિંશોઽધ્યાયઃ । શઙ્ખચૂડવધે કાલીયુદ્ધવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
સા ચ ગત્વા હિ સઙ્ગ્રામં સિંહનાદં ચકાર હ ।
દેવ્યાશ્ચ તેન નાદેન મૂર્ચ્છામાપુશ્ચ દાનવાઃ ॥ ૧॥

અટ્ટાટ્ટહાસમશિવં ચકાર ચ પુનઃ પુનઃ ।
તદા પપૌ ચ માધ્વીકં નનર્ત રણમૂર્દ્ધનિ ॥ ૨॥

ઉગ્રદંષ્ટ્રા ચોગ્રદણ્ડા કોટવી ચ પપૌ મધુ ।
અન્યાશ્ચ દેવ્યસ્તત્રાજૌ નનૃતુર્મધુ સમ્પપુઃ ॥ ૩॥

મહાન્ કોલાહલો જાતો ગણદેવદલે તદા ।
જહૃષુર્બહુગર્જન્તઃ સર્વે સુરગણાદયઃ ॥ ૪॥

દૃષ્ટ્વા કાલીં શઙ્ખચૂડઃ શીઘ્રમાજૌ સમાયયૌ ।
દાનવાશ્ચ ભયં પ્રાપ્તા રાજા તેભ્યોઽભયં દદૌ ॥ ૫॥

કાલી ચિક્ષેપ વહ્નિં ચ પ્રલયાગ્નિશિખોપમમ્ ।
રાજા જઘાન તં શીઘ્રં વૈષ્ણવાસ્ત્રેણ લીલયા ॥ ૬॥

નારાયણાસ્ત્રં સા દેવી ચિક્ષેપ તદુપર્યરમ્ ।
વૃદ્ધિં જગામ તચ્છસ્ત્રં દૃષ્ટ્વા વામં ચ દાનવમ્ ॥ ૭॥

તં દૃષ્ટ્વા શઙ્ખચૂડશ્ચ પ્રલયાગ્નિશિખોપમમ્ ।
પપાત દણ્ડવદ્ભૂમૌ પ્રણનામ પુનઃપુનઃ ॥ ૮॥

નિવૃત્તિં પ્રાપ તચ્છસ્ત્રં દૃષ્ટ્વા નમ્રં ચ દાનવમ્ ।
બ્રહ્માસ્ત્રમથ સા દેવી ચિક્ષેપ મન્ત્રપૂર્વકમ્ ॥ ૯॥

તં દૃષ્ટ્વા પ્રજ્જ્વલન્તં ચ પ્રણમ્ય ભુવિ સંસ્થિતઃ ।
બ્રહ્માસ્ત્રેણ દાનવેન્દ્રો વિનિર્વારં ચકાર હ ॥ ૧૦॥

અથ ક્રુદ્ધો દાનવેન્દ્રો ધનુરાકૃષ્ય રંહસા ।
ચિક્ષેપ દિવ્યાન્યસ્ત્રાણિ દેવ્યૈ વૈ મન્ત્રપૂર્વકમ્ ॥ ૧૧॥

આહારં સમરે ચક્રે પ્રસાર્ય મુખમાયતમ્ ।
જગર્જ સાટ્ટહાસં ચ દાનવા ભયમાયયુઃ ॥ ૧૨॥

કાલ્યૈ ચિક્ષેપ શક્તિં સ શતયોજનમાયતામ્ ।
દેવી દિવ્યાસ્ત્રજાલેન શતખણ્ડં ચકાર સા ॥ ૧૩॥

સ ચ વૈષ્ણવમસ્ત્રં ચ ચિક્ષેપ ચણ્ડિકોપરિ ।
માહેશ્વરેણ કાલી ચ વિનિર્વારં ચકાર સા ॥ ૧૪॥

એવં ચિરતરં યુદ્ધમન્યોઽન્યં સમ્બભૂવ હ ।
પ્રેક્ષકા અભવન્ સર્વે દેવાશ્ચ દાનવા અપિ ॥ ૧૫॥

અથ ક્રુદ્ધા મહાદેવી કાલી કાલસમા રણે ।
જગ્રાહ મન્ત્રપૂતં ચ શરં પાશુપતં રુષા ॥ ૧૬॥

ક્ષેપાત્પૂર્વં તન્નિષેદ્ધું વાગ્બભૂવાશરીરિણી ।
ન ક્ષિપાસ્ત્રમિદં દેવિ શઙ્ખચૂડાય વૈ રુષા ॥ ૧૭॥

મૃત્યુઃ પાશુપતાન્નાસ્ત્યમોઘાદપિ ચ ચણ્ડિકે ।
શઙ્ખચૂડસ્ય વીરસ્યોપાયમન્યં વિચારય ॥ ૧૮॥

ઇત્યાકર્ણ્ય ભદ્રકાલી ન ચિક્ષેપ તદસ્ત્રકમ્ ।
શતલક્ષં દાનવાનાં જઘાસ લીલયા ક્ષુધા ॥ ૧૯॥

અત્તું જગામ વેગેન શઙ્ખચૂડં ભયઙ્કરી ।
દિવ્યાસ્ત્રેણ ચ રૌદ્રેણ વારયામાસ દાનવઃ ॥ ૨૦॥

અથ ક્રુદ્ધો દાનવેન્દ્રઃ ખડ્ગં ચિક્ષેપ સત્વરમ્ ।
ગ્રીષ્મસૂર્યોપમં તીક્ષ્ણધારમત્યન્તભીકરમ્ ॥ ૨૧॥

સા કાલી તં સમાલોક્યાયાન્તં પ્રજ્વલિતં રુષા ।
પ્રસાર્ય મુખમાહારં ચક્રે તસ્ય ચ પશ્યતઃ ॥ ૨૨॥

દિવ્યાન્યસ્ત્રાણિ ચાન્યાનિ ચિચ્છેદ દાનવેશ્વરઃ ।
પ્રાપ્તાનિ પૂર્વતશ્ચક્રે શતખણ્ડાનિ તાનિ ચ ॥ ૨૩॥

પુનરત્તું મહાદેવી વેગતસ્તં જગામ હ ।
સર્વસિદ્ધેશ્વરઃ શ્રીમાનન્તર્ધાનં ચકાર સઃ ॥ ૨૪॥

વેગેન મુષ્ટિના કાલી તમદૃષ્ટ્વા ચ દાનવમ્ ।
બભઞ્જ ચ રથં તસ્ય જઘાન કિલ સારથિમ્ ॥ ૨૫॥

અથાગત્ય દ્રુતં માયી ચક્રં ચિક્ષેપ વેગતઃ ।
ભદ્રકાલ્યૈ શઙ્ખચૂડઃ પ્રલયાગ્નિશિખોપમમ્ ॥ ૨૬॥

સા દેવી તં તદા ચક્રં વામહસ્તેન લીલયા ।
જગ્રાહ સ્વમુખેનૈવાહારં ચક્રે રુષા દ્રુતમ્ ॥ ૨૭॥

મુષ્ટ્યા જઘાન તં દેવી મહાકોપેન વેગતઃ ।
બભ્રામ દાનવેન્દ્રોઽપિ ક્ષણં મૂર્ચ્છામવાપ સઃ ॥ ૨૮॥

ક્ષણેન ચેતનાં પ્રાપ્ય સ ચોત્તસ્થૌ પ્રતાપવાન્ ।
ન ચક્રે બાહુ યુદ્ધં ચ માતૃબુદ્ધ્યા તયા સહ ॥ ૨૯॥

ગૃહીત્વા દાનવં દેવી ભ્રામયિત્વા પુનઃ પુનઃ ।
ઊર્ધ્વં ચ પ્રાપયામાસ મહાકોપેન વેગતઃ ॥ ૩૦॥

ઉત્પપાત ચ વેગેન શઙ્ખચૂડઃ પ્રતાપવાન્ ।
નિપત્ય ચ સમુત્તસ્થો પ્રણમ્ય ભદ્રકાલિકામ્ ॥ ૩૧॥

રત્નેન્દ્રસારનિર્માણવિમાનં સુમનોહરમ્ ।
આરુરોહ સ હૃષ્ટાત્મા ન ભ્રાન્તોઽપિ મહારણે ॥ ૩૨॥

દાનવાનાં હિ ક્ષતજં સા પપૌ કાલિકા ક્ષુધા ।
એતસ્મિન્નન્તરે તત્ર વાગ્બભૂવાશરીરિણી ॥ ૩૩॥

લક્ષં ચ દાનવેન્દ્રાણામવશિષ્ટં રણેઽધુના ।
ઉદ્ધતં ગુઞ્જતાં સાર્દ્ધં તતસ્ત્વં ભુઙ્ક્ષ્વ ચેશ્વરિ ॥ ૩૪॥

સઙ્ગ્રામે દાનવેન્દ્રં ચ હન્તું ન કુરુ માનસમ્ ।
અવધ્યોઽયં શઙ્ખચૂડસ્તવ દેવીતિ નિશ્ચયમ્ ॥ ૩૫॥

તચ્છ્રુત્વા વચનં દેવી નિઃસૃતં વ્યોમમણ્ડલાત્ ।
દાનવાનાં બહૂનાં ચ માંસં ચ રુધિરં તથા ॥ ૩૬॥

ભુક્ત્વા પીત્વા ભદ્રકાલી શઙ્કરાન્તિકમાયયૌ ।
ઉવાચ રણવૃત્તાન્તં પૌર્વાપર્યેણ સક્રમમ્ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડવધે કાલીયુદ્ધવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૨.૫.૩૮॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૩૯. એકોનચત્વારિંશોઽધ્યાયઃ । શઙ્ખચૂડસૈન્યવધવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
શ્રુત્વા કાલ્યુક્તમીશાનો કિં ચકાર કિમુક્તવાન્ ।
તત્ત્વં વદ મહાપ્રાજ્ઞ પરં કૌતૂહલં મમ ॥ ૧॥

સનત્કુમાર ઉવાચ ।
કાલ્યુક્તં વચનં શ્રુત્વા શઙ્કરઃ પરમેશ્વરઃ ।
મહાલીલાકરઃ શમ્ભુર્જહાસાશ્વાસયચ્ચ તામ્ ॥ ૨॥

વ્યોમવાણીં સમાકર્ણ્ય તત્ત્વજ્ઞાનવિશારદઃ ।
યયૌ સ્વયં ચ સમરે સ્વગણૈઃ સહ શઙ્કરઃ ॥ ૩॥

મહાવૃષભમારૂઢો વીરભદ્રાદિસંયુતઃ ।
ભૈરવૈઃ ક્ષેત્રપાલૈશ્ચ સ્વસમાનૈઃ સમન્વિતઃ ॥ ૪॥

રણં પ્રાપ્તો મહેશશ્ચ વીરરૂપં વિધાય ચ ।
વિરરાજાધિકં તત્ર રુદ્રો મૂર્ત ઇવાન્તકઃ ॥ ૫॥

શઙ્ખચૂડઃ શિવં દૃષ્ટ્વા વિમાનાદવરુહ્ય સઃ ।
નનામ પરયા ભક્ત્યા શિરસા દણ્ડવદ્ભુવિ ॥ ૬॥

તં પ્રણમ્ય તુ યોગેન વિમાનમારુરોહ સઃ ।
તૂર્ણં ચકાર સન્નાહં ધનુર્જગ્રાહ સેષુકમ્ ॥ ૭॥

શિવદાનવયોર્યુદ્ધં શતમબ્દં બભૂવ હ ।
બાણવર્ષમિવોગ્રં તદ્વર્ષતોર્મોઘયોસ્તદા ॥ ૮॥

શઙ્ખચૂડો મહાવીરઃ શરાંશ્ચિક્ષેપ દારુણાન્ ।
ચિચ્છેદ શઙ્કરસ્તાન્વૈ લીલયા સ્વશરોત્કરૈઃ ॥ ૯॥

તદઙ્ગેષુ ચ શસ્ત્રૌઘૈસ્તાડયામાસ કોપતઃ ।
મહારુદ્રો વિરૂપાક્ષો દુષ્ટદણ્ડઃ સતાં ગતિઃ ॥ ૧૦॥

દાનવો નિશિતં ખડ્ગં ચર્મ ચાદાય વેગવાન્ ।
વૃષં જઘાન શિરસિ શિવસ્ય વરવાહનમ્ ॥ ૧૧॥

તાડિતે વાહને રુદ્રસ્તં ક્ષુરપ્રેણ લીલયા ।

ખડ્ગં ચિચ્છેદ તસ્યાશુ ચર્મ ચાપિ મહોજ્જ્વલમ્ ॥ ૧૨॥

છિન્નેઽસૌ ચર્મણિ તદા શક્તિં ચિક્ષેપ સોઽસુરઃ ।
દ્વિધા ચક્રે સ્વબાણેન હરસ્તાં સમ્મુખાગતામ્ ॥ ૧૩॥

કોપાધ્માતઃ શઙ્ખચૂડઃ ચક્રં ચિક્ષેપ દાનવઃ ।
મુષ્ટિપાતેન તચ્ચાપ્યચૂર્ણયત્સહસા હરઃ ॥ ૧૪॥

ગદામાવિધ્ય તરસા સઞ્ચિક્ષેપ હરં પ્રતિ ।
શમ્ભુના સાપિ સહસા ભિન્ના ભસ્મત્વમાગતા ॥ ૧૫॥

તતઃ પરશુમાદાય હસ્તેન દાનવેશ્વરઃ ।
ધાવતિ સ્મ હરં વેગાચ્છઙ્ખચૂડઃ ક્રુધાકુલઃ ॥ ૧૬॥

સમાહૃત્ય સ્વબાણૌઘૈરપાતયત શઙ્કરઃ ।
દ્રુતં પરશુહસ્તં તં ભૂતલે લીલયાસુરમ્ ॥ ૧૭॥

તતઃ ક્ષણેન સમ્પ્રાપ્ય સંજ્ઞામારુહ્ય સદ્રથમ્ ।
ધૃતદિવ્યાયુધશરો બભૌ વ્યાપ્યાખિલં નભઃ ॥ ૧૮॥

આયાન્તં તં નિરીક્ષ્યૈવ ડમરુધ્વનિમાદરાત્ ।
ચકાર જ્યારવં ચાપિ ધનુષો દુઃસહં હરઃ ॥ ૧૯॥

પૂરયામાસ કકુભઃ શૃઙ્ગનાદેન ચ પ્રભુઃ ।
સ્વયં જગર્જ ગિરિશસ્ત્રાસયન્નસુરાંસ્તદા ॥ ૨૦॥

ત્યાજિતેભમહાગર્વૈર્મહાનાદૈર્વૃષેશ્વરઃ ।
પૂરયામાસ સહસા ખં ગાં વસુદિશસ્તથા ॥ ૨૧॥

મહાકાલઃ સમુત્પત્ય તાડયદ્ ગાં તથા નભઃ ।
કરાભ્યાં તન્નિનાદેન ક્ષિપ્તા આસન્પુરા રવાઃ ॥ ૨૨॥

અટ્ટાટ્ટહાસમશિવં ક્ષેત્રપાલશ્ચકાર હ ।
ભૈરવોઽપિ મહાનાદં સ ચકાર મહાહવે ॥ ૨૩॥

મહાકોલાહલો જાતો રણમધ્યે ભયઙ્કરઃ ।
વીરશબ્દો બભૂવાથ ગણમધ્યે સમન્તતઃ ॥ ૨૪॥

સન્ત્રેસુર્દાનવાઃસર્વે તૈઃ શબ્દૈર્ભયદૈઃ ખરૈઃ ।
ચુકોપાતીવ તચ્છ્રુત્વા દાનવેન્દ્રો મહાબલઃ ॥ ૨૫॥

તિષ્ઠ તિષ્ઠેતિ દુષ્ટાત્મન્ વ્યાજહાર યદા હરઃ ।
દેવૈર્ગણૈશ્ચ તૈઃ શીઘ્રમુક્તં જય જયેતિ ચ ॥ ૨૬॥

અથાગત્ય સ દમ્ભસ્ય તનયઃ સુપ્રતાપવાન્ ।
શક્તિં ચિક્ષેપ રુદ્રાય જ્વાલામાલાતિભીષણામ્ ॥ ૨૭॥

વહ્નિકૂટપ્રભાયાન્તી ક્ષેત્રપાલેન સત્વરમ્ ।
નિરસ્તાગત્ય સાજૌ વૈ મુખોત્પન્નમહોલ્કયા ॥ ૨૮॥

પુનઃ પ્રવવૃતે યુદ્ધં શિવદાનવયોર્મહત્ ।
ચકમ્પે ધરણી દ્યૌશ્ચ સનગાબ્ધિજલાશયા ॥ ૨૯॥

દામ્ભિમુક્તાન્ શરાન્ શમ્ભુઃ શરાંસ્તત્પ્રહિતાન્સ ચ ।
સહસ્રશઃ શરૈરુગ્રૈશ્ચિચ્છેદ શતશસ્તદા ॥ ૩૦॥

તતઃ શમ્ભુસ્ત્રિશૂલેન સઙ્ક્રુદ્ધસ્તં જઘાન હ ।
તત્પ્રહારમસહ્યાશુ કૌ પપાત સ મૂર્ચ્છિતઃ ॥ ૩૧॥

તતઃ ક્ષણેન સમ્પ્રાપ સંજ્ઞાં સ ચ તદાસુરઃ ।
આજઘાન શરૈ રુદ્રં તાન્સર્વાનાત્તકાર્મુકઃ ॥ ૩૨॥

બાહૂનામયુતં કૃત્વા છાદયામાસ શઙ્કરમ્ ।
ચક્રાયુતેન સહસા શઙ્ખચૂડઃ પ્રતાપવાન્ ॥ ૩૩॥

તતો દુર્ગાપતિઃ ક્રુદ્ધો રુદ્રો દુર્ગાર્તિનાશનઃ ।
તાનિ ચક્રાણિ ચિચ્છેદ સ્વશરૈરુત્તમૈર્દ્રુતમ્ ॥ ૩૪॥

તતો વેગેન સહસા ગદામાદાય દાનવઃ ।
અભ્યધાવત વૈ હન્તું બહુસેનાવૃતો હરમ્ ॥ ૩૫॥

ગદાં ચિચ્છેદ તસ્યાશ્વાપતતઃ સોઽસિના હરઃ ।
શિતધારેણ સઙ્ક્રુદ્ધો દુષ્ટગર્વાપહારકઃ ॥ ૩૬॥

છિન્નાયાં સ્વગદાયાં ચ ચુકોપાતીવ દાનવઃ ।
શૂલં જગ્રાહ તેજસ્વી પરેષાં દુઃસહં જ્વલત્ ॥ ૩૭॥

સુદર્શનં શૂલહસ્તમાયાન્તં દાનવેશ્વરમ્ ।
સ્વત્રિશૂલેન વિવ્યાધ હૃદિ તં વેગતો હરઃ ॥ ૩૮॥

ત્રિશૂલભિન્નહૃદયાન્નિષ્ક્રાન્તઃ પુરુષઃ પરઃ ।
તિષ્ઠ તિષ્ઠેતિ ચોવાચ શઙ્ખચૂડસ્ય વીર્યવાન્ ॥ ૩૯॥

નિષ્ક્રામતો હિ તસ્યાશુ પ્રહસ્ય સ્વનવત્તતઃ ।
ચિચ્છેદ ચ શિરો ભીમમસિના સોઽપતદ્ભુવિ ॥ ૪૦॥

તતઃ કાલીં ચખાદોગ્રં દંષ્ટ્રાક્ષુણ્ણશિરોધરાન્ ।
અસુરાંસ્તાન્ બહૂન્ ક્રોધાત્ પ્રસાર્ય સ્વમુખં તદા ॥ ૪૧॥

ક્ષેત્રપાલશ્ચખાદાન્યાન્બહૂન્દૈત્યાન્ક્ષુધાકુલઃ ।
કેચિન્નેશુર્ભૈરવાસ્ત્રચ્છિન્ના ભિન્નાસ્તથાપરે ॥ ૪૨॥

વીરભદ્રોઽપરાન્ વીરાન્ બહૂન્ ક્રોધાદનાશયત્ ।
નન્દીશ્વરો જઘાનાન્યાન્ બહૂનમરમર્દકાન્ ॥ ૪૩॥

એવં બહુગણા વીરાસ્તદા સન્નહ્ય કોપતઃ ।
વ્યનાશયન્બહૂન્દૈત્યાનસુરાન્ દેવમર્દકાન્ ॥ ૪૪॥

ઇત્થં બહુતરં તત્ર તસ્ય સૈન્યં નનાશ તત્ ।
વિદ્રુતાશ્ચાપરે વીરા બહવો ભયકાતરાઃ ॥ ૪૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડસૈન્યવધવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૨.૫.૩૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૪૦. ચત્વારિંશોઽધ્યાયઃ । શઙ્ખચૂડવધોપાખ્યાનમ્ ।

સનત્કુમાર ઉવાચ ।
સ્વબલં નિહતં દૃષ્ટ્વા મુખ્યં બહુતરં તતઃ ।
તથા વીરાન્ પ્રાણસમાન્ ચુકોપાતીવ દાનવઃ ॥ ૧॥

ઉવાચ વચનં શમ્ભું તિષ્ઠામ્યાજૌ સ્થિરો ભવ ।
કિમેતૈર્નિહતૈર્મેઽદ્ય સમ્મુખે સમરં કુરુ ॥ ૨॥

ઇત્યુક્ત્વા દાનવેન્દ્રોઽસૌ સન્નદ્ધઃ સમરે મુને ।
અગચ્છન્નિશ્ચયં કૃત્વાઽભિમુખં શઙ્કરસ્ય ચ ॥ ૩॥

દિવ્યાન્યસ્ત્રાણિ ચિક્ષેપ મહારુદ્રાય દાનવઃ ।
ચકાર શરવૃષ્ટિં ચ તોયવૃષ્ટિં યથા ઘનઃ ॥ ૪॥

માયાશ્ચકાર વિવિધા અદૃશ્યા ભયદર્શિતાઃ ।
અપ્રતર્ક્યાઃ સુરગણૈર્નિખિલૈરપિઃ સત્તમૈઃ ॥ ૫॥

તાં દૃષ્ટ્વા શઙ્કરસ્તત્ર ચિક્ષેપાસ્ત્રં ચ લીલયા ।
માહેશ્વરં મહાદિવ્યં સર્વમાયાવિનાશનમ્ ॥ ૬॥

તેજસા તસ્ય તન્માયા નષ્ટાશ્ચાસન્ દ્રુતં તદા ।
દિવ્યાન્યસ્ત્રાણિ તાન્યેવ નિસ્તેજાંસ્યભવન્નપિ ॥ ૭॥

અથ યુદ્ધે મહેશાનસ્તદ્વધાય મહાબલઃ ।
શૂલં જગ્રાહ સહસા દુર્નિવાર્યં સુતેજસામ્ ॥ ૮॥

તદૈવ તન્નિષેદ્ધું ચ વાગ્બભૂવાશરીરિણી ।
ક્ષિપ શૂલં ન ચેદાનીં પ્રાર્થનાં શ‍ૃણુ શઙ્કર ॥ ૯॥

સર્વથા ત્વં સમર્થો હિ ક્ષણાદ્ બ્રહ્માણ્ડનાશને ।
કિમેકદાનવસ્યેશ શઙ્ખચૂડસ્ય સામ્પ્રતમ્ ॥ ૧૦॥

તથાપિ વેદમર્યાદા ન નાશ્યા સ્વામિના ત્વયા ।
તાં શ‍ૃણુષ્વ મહાદેવ સફલં કુરુ સત્યતઃ ॥ ૧૧॥

યાવદસ્ય કરેઽત્યુગ્રં કવચં પરમં હરેઃ ।
યાવત્સતીત્વમસ્ત્યેવ સત્યા અસ્યસ્ય યોષિતઃ ॥ ૧૨॥

તાવદસ્ય જરામૃત્યુઃ શઙ્ખચૂડસ્ય શઙ્કર ।
નાસ્તીત્યવિતથં નાથ વિધેહિ બ્રહ્મણો વચઃ ॥ ૧૩॥

ઇત્યાકર્ણ્ય નભોવાણીં તથેત્યુક્ત્તે હરે તદા ।
હરેચ્છયાગતો વિષ્ણુસ્તં દિદેશ સતાં ગતિઃ ॥ ૧૪॥

વૃદ્ધબ્રાહ્મણવેષેણ વિષ્ણુર્માયાવિનાં વરઃ ।
શઙ્ખચૂડોપકણ્ઠં ચ ગત્વોવાચ સ તં તદા ॥ ૧૫॥

વૃદ્ધબ્રાહ્મણ ઉવાચ ।
દેહિ ભિક્ષાં દાનવેન્દ્ર મહ્યં પ્રાપ્તાય સામ્પ્રતમ્ ॥ ૧૬॥

નેદાનીં કથયિષ્યામિ પ્રકટં દીનવત્સલમ્ ।
પશ્ચાત્ત્વાં કથયિષ્યામિ પુનઃ સત્યં કરિષ્યસિ ॥ ૧૭॥

ઓમિત્યુવાચ રાજેન્દ્રઃ પ્રસન્નવદનેક્ષણઃ ।
કવચાર્થી જનશ્ચાહમિત્યુવાચેતિ સચ્છલાત્ ॥ ૧૮॥

તચ્છ્રુત્વા દાનવેન્દ્રોઽસૌ બ્રહ્મણ્યઃ સત્યવાગ્વિભુઃ ।
તદ્ દદૌ કવચં દિવ્યં વિપ્રાય પ્રાણસમ્મતમ્ ॥ ૧૯॥

માયયેત્થં તુ કવચં તસ્માજ્જગ્રાહ વૈ હરિઃ ।
શઙ્ખચૂડસ્ય રૂપેણ જગામ તુલસીં પ્રતિ ॥ ૨૦॥

ગત્વા તત્ર હરિસ્તસ્યા યોનૌ માયાવિશારદઃ ।
વીર્યાધાનં ચકારાશુ દેવકાર્યાર્થમીશ્વરઃ ॥ ૨૧॥

એતસ્મિન્નન્તરે શમ્ભુમીરયન્ સ્વવચઃ પ્રભુઃ ।
શઙ્ખચૂડવધાર્થાય શૂલં જગ્રાહ પ્રજ્વલત્ ॥ ૨૨॥

તચ્છૂલં વિજયં નામ શઙ્કરસ્ય પરાત્મનઃ ।
સઞ્ચકાશે દિશઃ સર્વા રોદસીં સમ્પ્રકાશયન્ ॥ ૨૩॥

કોટિમધ્યાહ્નમાર્તણ્ડપ્રલયાગ્નિશિખોપમમ્ ।
દુર્નિવાર્યં ચ દુર્દ્ધર્ષમવ્યર્થં વૈરિઘાતકમ્ ॥ ૨૪॥

તેજસાં ચક્રમત્યુગ્રં સર્વશસ્ત્રાસ્ત્રનાયકમ્ ।
સુરાસુરાણાં સર્વેષાં દુઃસહં ચ ભયઙ્કરમ્ ॥ ૨૫॥

સંહર્તું સર્વબ્રહ્માડમવલમ્બ્ય ચ લીલયા ।
સંસ્થિતં પરમં તત્ર એકત્રીભૂય વિજ્વલત્ ॥ ૨૬॥

ધનુઃ સહસ્રં દીર્ઘેણ પ્રસ્થેન શતહસ્તકમ્ ।
જીવબ્રહ્મસ્વરૂપં ચ નિત્યરૂપમનિર્મિતમ્ ॥ ૨૭॥

વિભ્રમદ્ વ્યોમ્નિ તચ્છૂલં શઙ્ખચૂડોપરિ ક્ષણાત્ ।
ચકાર ભસ્મ તચ્છીઘ્રં નિપત્ય શિવશાસનાત્ ॥ ૨૮॥

અથ શૂલં મહેશસ્ય દ્રુતમાવૃત્ય શઙ્કરમ્ ।
યયૌ વિહાયસા વિપ્ર મનોયાયિ સ્વકાર્યકૃત્ ॥ ૨૯॥

નેદુર્દુન્દુભયઃ સ્વર્ગે જગુર્ગન્ધર્વકિન્નરાઃ ।
તુષ્ટુવુર્મુનયો દેવા નનૃતુશ્ચાપ્સરોગણાઃ ॥ ૩૦॥

બભૂવ પુષ્પવૃષ્ટિશ્ચ શિવસ્યોપરિ સન્તતમ્ ।

પ્રશશંસ હરિર્બ્રહ્મા શક્રાદ્યા મુનયસ્તથા ॥ ૩૧॥

શઙ્ખચૂડો દાનવેન્દ્રઃ શિવસ્ય કૃપયા તદા ।
શાપમુક્તો બભૂવાથ પૂર્વરૂપમવાપ હ ॥ ૩૨॥

અસ્થિભિઃ શઙ્ખચૂડસ્ય શઙ્ખજાતિર્બભૂવ હ ।
પ્રશસ્તં શઙ્ખતોયં ચ સર્વેષાં શઙ્કરં વિના ॥ ૩૩॥

વિશેષેણ હરેર્લક્ષ્મ્યાઃ શઙ્ખતોયં મહાપ્રિયમ્ ।
સમ્બન્ધિનાં ચ તસ્યાપિ ન હરસ્ય મહામુને ॥ ૩૪॥

તમિત્થં શઙ્કરો હત્વા શિવલોકં જગામ સઃ ।
સુપ્રહૃષ્ટો વૃષારૂઢઃ સોમસ્કન્દગણૈર્વૃતઃ ॥ ૩૫॥

હરિર્જગામ વૈકુણ્ઠં કૃષ્ણઃ સ્વસ્થો બભૂવ હ ।
સુરાઃ સ્વવિષયં પ્રાપુઃ પરમાનન્દસંયુતાઃ ॥ ૩૬॥

જગત્સ્વાસ્થ્યમતીવાપ સર્વં નિર્વિઘ્નમાપ કમ્ ।
નિર્મલં ચાભવદ્વ્યોમ ક્ષિતિઃ સર્વા સુમઙ્ગલા ॥ ૩૭॥

ઇતિ પ્રોક્તં મહેશસ્ય ચરિતં પ્રમુદાવહમ્ ।
સર્વદુઃખહરં શ્રીદં સર્વકામપ્રપૂરકમ્ ॥ ૩૮॥

ધન્યં યશસ્યમાયુષ્યં સર્વવિઘ્નનિવારણમ્ ।
ભુક્તિદં મુક્તિદં ચૈવ સર્વકામફલપ્રદમ્ ॥ ૩૯॥

ય ઇદં શૃણુયાન્નિત્યં ચરિતં શશિમૌલિનઃ ।
શ્રાવયેદ્વા પઠેદ્વાપિ પાઠયેદ્વા સુધીર્નરઃ ॥ ૪૦॥

ધનં ધાન્યં સુતં સૌખ્યં લભેતાત્ર ન સંશયઃ ।
સર્વાન્કામાનવાપ્નોતિ શિવભક્તિં વિશેષતઃ ॥ ૪૧॥

ઇદમાખ્યાનમતુલં સર્વોપદ્રવનાશનમ્ ।
પરમજ્ઞાનજનનં શિવભક્તિવિવર્દ્ધનમ્ ॥ ૪૨॥

બ્રાહ્મણો બ્રહ્મવર્ચસ્વી ક્ષત્રિયો વિજયી ભવેત્ ।
ધનાઢ્યો વૈશ્યજઃ શૂદ્રઃ શૃણ્વન્ સત્તમતામિયાત્ ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખડે શઙ્ખચૂડવધોપાખ્યાનં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૨.૫.૪૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૪૧. એકચત્વારિંશોઽધ્યાયઃ । શઙ્ખચૂડવધોપાખ્યાનમ્ ।

વ્યાસ ઉવાચ ।
નારાયણશ્ચ ભગવાન્ વીર્યાધાનં ચકાર હ ।
તુલસ્યાઃ કેન યત્નેન યોનૌ તદ્વક્તુમર્હસિ ॥ ૧॥

સનત્કુમાર ઉવાચ ।
નારાયણો હિ દેવાનાં કાર્યકર્તા સતાં ગતિઃ ।
શઙ્ખચૂડસ્ય રૂપેણ રેમે તદ્રામયા સહ ॥ ૨॥

તદેવ શ‍ૃણુ વિષ્ણોશ્ચ ચરિતં પ્રમુદાવહમ્ ।
શિવશાસનકર્તુશ્ચ માતુશ્ચ જગતાં હરેઃ ॥ ૩॥

રણમધ્યે વ્યોમવચઃ શ્રુત્વા દેવેન શમ્ભુના ।
પ્રેરિતઃ શઙ્ખચૂડસ્ય ગૃહીત્વા કવચં પરમ્ ॥ ૪॥

વિપ્રરૂપેણ ત્વરિતં માયયા નિજયા હરિઃ ।
જગામ શઙ્ખચૂડસ્ય રૂપેણ તુલસીગૃહમ્ ॥ ૫॥

દુન્દુભિં વાદયામાસ તુલસીદ્વારસન્નિધૌ ।
જયશબ્દં ચ તત્રૈવ બોધયામાસ સુન્દરીમ્ ॥ ૬॥

તચ્છ્રુત્વા ચૈવ સા સાધ્વી પરમાનન્દસંયુતા ।
રાજમાર્ગં ગવાક્ષેણ દદર્શ પરમાદરાત્ ॥ ૭॥

બ્રાહ્મણેભ્યો ધનં દત્ત્વા કારયામાસ મઙ્ગલમ્ ।
દ્રુતં ચકાર શ‍ૃઙ્ગારં જ્ઞાત્વાઽઽયાતં નિજં પતિમ્ ॥ ૮॥

અવરુહ્ય રથાદ્વિષ્ણુસ્તદ્દેવ્યા ભવનં યયૌ ।
શઙ્ખચૂડસ્વરૂપઃ સ માયાવી દેવકાર્યકૃત્ ॥ ૯॥

દૃષ્ટ્વા તં ચ પુરઃ પ્રાપ્તં સ્વકાન્તં સા મુદાન્વિતા ।
તત્પાદૌ ક્ષાલયામાસ નનામ ચ રુરોદ ચ ॥ ૧૦॥

રત્નસિંહાસને રમ્યે વાસયામાસ મઙ્ગલમ્ ।
તામ્બૂલં ચ દદૌ તસ્મૈ કર્પૂરાદિસુવાસિતમ્ ॥ ૧૧॥

અદ્ય મે સફલં જન્મ જીવનં સમ્બભૂવ હ ।
રણે ગતં ચ પ્રાણેશં પશ્યન્ત્યાશ્ચ પુનર્ગૃહે ॥ ૧૨॥

ઇત્યુક્ત્વા સકટાક્ષં સા નિરીક્ષ્ય સસ્મિતં મુદા ।
પપ્રચ્છ રણવૃત્તાન્તં કાન્તં મધુરયા ગિરા ॥ ૧૩॥

તુલસ્યુવાચ ।
અસઙ્ખ્યવિશ્વસંહર્તા સ દેવપ્રવરઃ પ્રભુઃ ।
યસ્યાજ્ઞાવર્ત્તિનો દેવા વિષ્ણુબ્રહ્માદયઃ સદા ॥ ૧૪॥

ત્રિદેવજનકઃ સોઽત્ર ત્રિગુણાત્મા ચ નિર્ગુણઃ ।
ભક્તેચ્છયા ચ સગુણો હરિબ્રહ્માપ્રવર્તકઃ ॥ ૧૫॥

કુબેરસ્ય પ્રાર્થનયા ગુણરૂપધરો હરઃ ।
કૈલાસવાસી ગણપઃ પરબ્રહ્મ સતાં ગતિઃ ॥ ૧૬॥

યસ્યૈકપલમાત્રેણ કોટિબ્રહ્માણ્ડસઙ્ક્ષયઃ ।
વિષ્ણુબ્રહ્માદયોઽતીતા બહવઃ ક્ષણમાત્રતઃ ॥ ૧૭॥

કર્તું સાર્દ્ધં ચ તેનૈવ સમરં ત્વં ગતઃ પ્રભો ।
કથં બભૂવ સઙ્ગ્રામસ્તેન દેવસહાયિના ॥ ૧૮॥

કુશલી ત્વમિહાયાતસ્તં જિત્વા પરમેશ્વરમ્ ।
કથં બભૂવ વિજયસ્તવ બ્રૂહિ તદેવ મે ॥ ૧૯॥

શ્રુત્વેત્થં તુલસીવાક્યં સ વિહસ્ય રમાપતિઃ ।
શઙ્ખચૂડરૂપધરસ્તામુવાચામૃતં વચઃ ॥ ૨૦॥

શ્રીભગવાનુવાચ ।
યદાહં રણભૂમૌ ચ જગામ સમરપ્રિયઃ ।
કોલાહલો મહાન્ જાતઃ પ્રવૃત્તોઽભૂન્મહારણઃ ॥ ૨૧॥

દેવદાનવયોર્યુદ્ધં સમ્બભૂવ જયૈષિણોઃ ।
દૈત્યાઃ પરાજિતાસ્તત્ર નિર્જરૈર્બલગર્વિતૈઃ ॥ ૨૨॥

તદાહં સમરં તત્રાકાર્ષં દેવૈર્બલોત્કટૈઃ ।
પરાજિતાશ્ચ તે દેવાઃ શઙ્કરં શરણં યયુઃ ॥ ૨૩॥

રુદ્રોઽપિ તત્સહાયાર્થમાજગામ રણં પ્રતિ ।
તેનાહં વૈ ચિરં કાલમયૌત્સં બલદર્પિતઃ ॥ ૨૪॥

આવયોઃ સમરઃ કાન્તે પૂર્ણમબ્દં બભૂવ હ ।
નાશો બભૂવ સર્વેષામસુરાણાં ચ કામિનિ ॥ ૨૫॥

પ્રીતિં ચ કારયામાસ બ્રહ્મા ચ સ્વયમાવયોઃ ।
દેવાનામધિકારાશ્ચ પ્રદત્તા બ્રહ્મશાસનાત્ ॥ ૨૬॥

મયાગતં સ્વભવનં શિવલોકં શિવો ગતઃ ।
સર્વસ્વાસ્થ્યમતીવાપ દૂરીભૂતો હ્યુપદ્રવઃ ॥ ૨૭॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા જગતાં નાથઃ શયનં ચ ચકાર હ ।
રેમે રમાપતિસ્તત્ર રમયા સ તયા મુદા ॥ ૨૮॥

સા સાધ્વી સુખસમ્ભાવાકર્ષણસ્ય વ્યતિક્રમાત્ ।
સર્વં વિતર્કયામાસ કસ્ત્વમેવેત્યુવાચ સા ॥ ૨૯॥

તુલસ્યુવાચ ।
કો વા ત્વં વદ મામાશુ ભુક્તાહં માયયા ત્વયા ।
દૂરીકૃતં મત્સતીત્વમથ ત્વાં વૈ શપામ્યહમ્ ॥ ૩૦॥

સનત્કુમાર ઉવાચ ।
તુલસીવચનં શ્રુત્વા હરિઃ શાપભયેન ચ ।
દધાર લીલયા બ્રહ્મન્સ્વમૂર્તિં સુમનોહરામ્ ॥ ૩૧॥

તદ્ દૃષ્ટ્વા તુલસી રૂપં જ્ઞાત્વા વિષ્ણું તુ ચિહ્નતઃ ।
પાતિવ્રત્યપરિત્યાગાત્ ક્રુદ્ધા સા તમુવાચ હ ॥ ૩૨॥

તુલસ્યુવાચ ।
હે વિષ્ણો તે દયા નાસ્તિ પાષાણસદૃશં મનઃ ।
પતિધર્મસ્ય ભઙ્ગેન મમ સ્વામી હતઃ ખલુ ॥ ૩૩॥

પાષાણસદૃશસ્ત્વં ચ દયાહીનો યતઃ ખલઃ ।
તસ્માત્પાષાણરૂપસ્ત્વં મચ્છાપેન ભવાધુના ॥ ૩૪॥

યે વદન્તિ દયાસિન્ધું ત્વાં ભ્રાન્તાસ્તે ન સંશયઃ ।
ભક્તો વિનાપરાધેન પરાર્થે ચ કથં હતઃ ॥ ૩૫॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા તુલસી સા વૈ શઙ્ખચૂડપ્રિયા સતી ।
ભૃશં રુરોદ શોકાર્તા વિલલાપ ભૃશં મુહુઃ ॥ ૩૬॥

તતસ્તાં રુદતીં દૃષ્ટ્વા સ વિષ્ણુઃ પરમેશ્વરઃ ।
સસ્માર શઙ્કરં દેવં યેન સમ્મોહિતં જગત્ ॥ ૩૭॥

તતઃ પ્રાદુર્બભૂવાથ શઙ્કરો ભક્તવત્સલઃ ।
હરિણા પ્રણતશ્ચાસીત્સન્નુતો વિનયેન સઃ ॥ ૩૮॥

શોકાકુલં હરિં દૃષ્ટ્વા વિલપન્તીં ચ તત્પ્રિયામ્ ।
નયેન બોધયામાસ તં તાં કૃપણવત્સલામ્ ॥ ૩૯॥

શઙ્કર ઉવાચ ।
મા રોદીસ્તુલસિ ત્વં હિ ભુઙ્ક્તે કર્મફલં જનઃ ।
સુખદુઃખદો ન કોઽપ્યસ્તિ સંસારે કર્મસાગરે ॥ ૪૦॥

પ્રસ્તુતં શૃણુ નિર્દુઃખં શૃણોતિ સુમના હરિઃ ।
દ્વયોઃ સુખકરં યત્તદ્ બ્રવીમિ સુખહેતવે ॥ ૪૧॥

તપસ્ત્વયા કૃતં ભદ્રે તસ્યૈવ તપસઃ ફલમ્ ।
તદન્યથા કથં સ્યાદ્ધૈ જાતં ત્વયિ તથા ચ તત્ ॥ ૪૨॥

ઇદં શરીરં ત્યક્ત્વા ચ દિવ્યદેહં વિધાય ચ ।
રમસ્વ હરિણા નિત્યં રમયા સદૃશી ભવ ॥ ૪૩॥

તવેયં તનુરુત્સૃષ્ટા નદીરૂપા ભવેદિહ ।
ભારતે પુણ્યરૂપા સા ગણ્ડકીતિ ચ વિશ્રુતા ॥ ૪૪॥

કિયત્કાલં મહાદેવિ દેવપૂજનસાધને ।
પ્રધાનરૂપા તુલસી ભવિષ્યતિ વરેણ મે ॥ ૪૫॥

સ્વર્ગે મર્ત્યે ચ પાતાલે તિષ્ઠ ત્વં હરિસન્નિધૌ ।
ભવ ત્વં તુલસીવૃક્ષો વરા પુષ્પેષુ સુન્દરિ ॥ ૪૬॥

વૃક્ષાધિષ્ઠાતૃદેવી ત્વં વૈકુણ્ઠે દિવ્યરૂપિણી ।
સાર્ધં રહસિ હરિણા નિત્યં ક્રીડાં કરિષ્યસિ ॥ ૪૭॥

નદ્યધિષ્ઠાતૃદેવી યા ભારતે બહુપુણ્યદા ।
લવણોદસ્ય પત્ની સા હર્યંશસ્ય ભવિષ્યસિ ॥ ૪૮॥

હરિર્વૈ શૈલરૂપી ચ ગણ્ડકી તીરસન્નિધૌ ।
સઙ્કરિષ્યત્યધિષ્ઠાનં ભારતે તવ શાપતઃ ॥ ૪૯॥

તત્ર કોટ્યશ્ચ કીટાશ્ચ તીક્ષ્ણદંષ્ટ્રા ભયઙ્કરાઃ ।
તચ્છિત્ત્વા કુહરે ચક્રં કરિષ્યન્તિ તદીયકમ્ ॥ ૫૦॥

શાલગ્રામશિલા સા હિ તદ્ભેદાદતિપુણ્યદા ।
લક્ષ્મીનારાયણાખ્યાદિશ્ચક્રભેદાદ્ભવિષ્યતિ ॥ ૫૧॥

શાલગ્રામશિલા વિષ્ણોસ્તુલસ્યાસ્તવ સઙ્ગમઃ ।
સદા સાદૃશ્યરૂપા યા બહુપુણ્યવિવર્દ્ધિની ॥ ૫૨॥

તુલસીપત્રવિચ્છેદં શાલગ્રામે કરોતિ યઃ ।
તસ્ય જન્માન્તરે ભદ્રે સ્ત્રીવિચ્છેદો ભવિષ્યતિ ॥ ૫૩॥

તુલસીપત્રવિચ્છેદં શઙ્ખં હિત્વા કરોતિ યઃ ।
ભાર્યાહીનો ભવેત્સોઽપિ રોગી સ્યાત્સપ્તજન્મસુ ॥ ૫૪॥

શાલગ્રામશ્ચ તુલસી શઙ્ખં ચૈકત્ર એવ હિ ।
યો રક્ષતિ મહાજ્ઞાની સ ભવેચ્છ્રીહરિપ્રિયઃ ॥ ૫૫॥

ત્વં પ્રિયાઃ શઙ્ખચૂડસ્ય ચૈકમન્વન્તરાવધિ ।
શઙ્ખેન સાર્ધં ત્વદ્ભેદઃ કેવલં દુઃખદસ્તવ ॥ ૫૬॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા શઙ્કરસ્તત્ર માહાત્મ્યમૂચિવાંસ્તદા ।
શાલગ્રામશિલાયાશ્ચ તુલસ્યા બહુપુણ્યદમ્ ॥ ૫૭॥

તતશ્ચાન્તર્હિતો ભૂત્વા મોદયિત્વા હરિં ચ તામ્ ।
જગામ સ્વાલયં શમ્ભુઃ શર્મદો હિ સદા સતામ્ ॥ ૫૮॥

ઇતિ શ્રુત્વા વચઃ શમ્ભોઃ પ્રસન્ના તુ તુલસ્યભૂત્ ।
તદ્દેહં ચ પરિત્યજ્ય દિવ્યરૂપા બભૂવ હ ॥ ૫૯॥

પ્રજગામ તયા સાર્દ્ધં વૈકુણ્ઠં કમલાપતિઃ ।
સદ્યસ્તદ્દેહજાતા ચ બભૂવ ગણ્ડકી નદી ॥ ૬૦॥

શૈલોઽભૂદચ્યુતઃ સોઽપિ તત્તીરે પુણ્યદો નૃણામ્ ।
કુર્વન્તિ તત્ર કીટાશ્ચ છિદ્રં બહુવિધં મુને ॥ ૬૧॥

જલે પતન્તિ યાસ્તત્ર શિલાસ્તાસ્ત્વતિપુણ્યદાઃ ।

સ્થલસ્થા પિઙ્ગલા જ્ઞેયાશ્ચોપતાપાય ચૈવ હિ ॥ ૬૨॥

ઇત્યેવં કથિતં સર્વં તવ પ્રશ્નાનુસારતઃ ।
ચરિતં પુણ્યદં શમ્ભોઃ સર્વકામપ્રદં નૃણામ્ ॥ ૬૩॥

આખ્યાનમિદમાખ્યાતં વિષ્ણુમાહાત્મ્યમિશ્રિતમ્ ।
ભુક્તિમુક્તિપ્રદં પુણ્યં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૬૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શઙ્ખચૂડવધોપાખ્યાને તુલસીશાપવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૨.૫.૪૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૪૨. દ્વિચત્વારિંશોઽધ્યાયઃ । હિરણ્યાક્ષવધઃ ।

નારદ ઉવાચ ।
શઙ્ખચૂડવધં શ્રુત્વા ચરિતં શશિમૌલિનઃ ।
અયં તૃપ્તોઽસ્મિ નો ત્વત્તોઽમૃતં પીત્વા યથા જનઃ ॥ ૧॥

બ્રહ્મન્યચ્ચરિતં તસ્ય મહેશસ્ય મહાત્મનઃ ।
માયામાશ્રિત્ય સલ્લીલાં કુર્વતો ભક્તમોદદામ્ ॥ ૨॥

બ્રહ્મોવાચ ।
શઙ્ખચૂડવધં શ્રુત્વા વ્યાસઃ સત્યવતીસુતઃ ।
અપ્રાક્ષીદિમમેવાર્થં બ્રહ્મપુત્રં મુનીશ્વરમ્ ॥ ૩॥

સનત્કુમારઃ પ્રોવાચ વ્યાસં સત્યવતીસુતમ્ ।
સુપ્રશંસ્ય મહેશસ્ય ચરિતં મઙ્ગલાયનમ્ ॥ ૪॥

સનત્કુમાર ઉવાચ ।
શ ૃણુ વ્યાસ મહેશસ્ય ચરિતં મઙ્ગલાયનમ્ ।
યથાન્ધકો ગાણપત્યં પ્રાપ શમ્ભોઃ પરાત્મનઃ ॥ ૫॥

કૃત્વા પરમસઙ્ગ્રામં તેન પૂર્વં મુનીશ્વર ।
પ્રસાદ્ય તં મહેશાનં સત્ત્વભાવાત્પુનઃ પુનઃ ॥ ૬॥

માહાત્મ્યમદ્ભુતં શમ્ભોઃ શરણાગતરક્ષિણઃ ।
સુભક્તવત્સલસ્યૈવ નાનાલીલાવિહારિણઃ ॥ ૭॥

માહાત્મ્યમેતદ્ વૃષભધ્વજસ્ય
શ્રુત્વા મુનિર્ગન્ધવતીસુતો હિ ।
વચો મહાર્થં પ્રણિપત્ય ભક્ત્યા
હ્યુવાચ તં બ્રહ્મસુતં મુનીન્દ્રમ્ ॥ ૮॥

વ્યાસ ઉવાચ ।
કો હ્યન્ધકો વૈ ભગવન્મુનીશ
કસ્યાન્વયે વીર્યવતઃ પૃથિવ્યામ્ ।
જાતો મહાત્મા બલવાન્ પ્રધાનઃ
કિમાત્મકઃ કસ્ય સુતોઽન્ધકશ્ચ ॥ ૯॥

એતત્સમસ્તં સરહસ્યમદ્ય
પ્રબ્રૂહિ મે બ્રહ્મસુત પ્રસાદાત્ ।
સ્કન્દાન્મયા વૈ વિદિતં હિ સમ્યક્
મહેશપુત્રાદમિતાવબોધાત્ ॥ ૧૦॥

ગાણપત્યં કથં પ્રાપ શમ્ભોઃ પરમતેજસઃ ।
સોઽન્ધકો ધન્ય એવાતિ યો બભૂવ ગણેશ્વરઃ ॥ ૧૧॥

બ્રહ્મોવાચ ।
વ્યાસસ્ય ચૈતદ્વચનં નિશમ્ય
પ્રોવાચ સ બ્રહ્મસુતસ્તદાનીમ્ ।
મહેશ્વરોતીઃ પરમાપ્તલક્ષ્મીઃ
સંશ્રોતુકામં જનકં શુકસ્ય ॥ ૧૨॥

સનત્કુમાર ઉવાચ ।
પુરાગતો ભક્તકૃપાકરોઽસૌ
કૈલાસતઃ શૈલસુતાગણાઢ્યઃ ।
વિહર્તુકામઃ કિલ કાશિકાં વૈ
સ્વશૈલતો નિર્જરચક્રવર્તી ॥ ૧૩॥

સ રાજધાનીં ચ વિધાય તસ્યાં
ચક્રે પરોતીઃ સુખદા જનાનામ્ ।
તદ્રક્ષકં ભૈરવનામવીરં

કૃત્વા સમં શૈલજયા હિ બહ્વીઃ ॥ ૧૪॥

સ એકદા મન્દરનામધેયં
ગતો નગં તદ્વરસુપ્રભાવાત્ ।
તત્રાપિ નાનાગણવીરમુખ્યૈઃ
શિવાસમેતો વિજહાર ભૂરિ ॥ ૧૫॥

પૂર્વે દિશો મન્દરશૈલસંસ્થા
કપર્દિનશ્ચણ્ડપરાક્રમસ્ય ।
ચક્રે તતો નેત્રનિમીલનં તુ
સા પાર્વતી નર્મયુતં સલીલમ્ ॥ ૧૬॥

પ્રવાલહેમાબ્જધૃતપ્રભાભ્યાં
કરામ્બુજાભ્યાં નિમિમીલ નેત્રે ।
હરસ્ય નેત્રેષુ નિમીલિતેષુ
ક્ષણેન જાતઃ સુમહાન્ધકારઃ ॥ ૧૭॥

તત્સ્પર્શયોગાચ્ચ મહેશ્વરસ્ય
કરૌ ચ તસ્યાઃ સ્ખલિતં મદામ્ભઃ ।
શમ્ભોર્લલાટે ક્ષણવહ્નિતપ્તો
વિનિર્ગતો ભૂરિ જલસ્ય બિન્દુઃ ॥ ૧૮॥

ગર્ભો બભૂવાથ કરાલવક્ત્રો
ભયઙ્કરઃ ક્રોધપરઃ કૃતઘ્નઃ ।
અન્ધો વિરૂપી જટિલશ્ચ કૃષ્ણો
નરેતરો વૈકૃતિકઃસુરોમા ॥ ૧૯॥

ગાયન્હસન્પ્રરુદન્નૃત્યમાનો
વિલેલિહાનો ઘનઘોરઘોષઃ ।
જાતેન તેનાદ્ભુતદર્શનેન
ગૌરીં ભવોઽસૌ સ્મિતપૂર્વમાહ ॥ ૨૦॥

શ્રીમહેશ ઉવાચ ।
નિમીલ્ય નેત્રાણિ કૃતં ચ કર્મ
વિભેષિ સાઽસ્માદ્ધ્યિતે કથં ત્વમ્ ।
ગૌરી હરાત્તદ્વચનં નિશમ્ય
વિહસ્યમાના પ્રમુમોચ નેત્રે ॥ ૨૧॥

જાતે પ્રકાશે સતિ ઘોરરૂપો
જાતોઽન્ધકારાદપિ નેત્રહીનઃ ।
તાદૃગ્વિધં તં ચ નિરીક્ષ્ય ભૂતં
પપ્રચ્છ ગૌરી પુરુષં મહેશમ્ ॥ ૨૨॥

ગૌર્ય્યુવાચ ।
કોઽયં વિરૂપો ભગવન્હિ જાતો
નાવગ્રતો ઘોરભયઙ્કરશ્ચ ।
વદસ્વ સત્યં મમ કિં નિમિત્તં
સૃષ્ટોઽથ વા કેન ચ કસ્ય પુત્રઃ ॥ ૨૩॥

સનત્કુમાર ઉવાચ ।
શ્રુત્વા હરસ્તદ્વચનં પ્રિયાયા
લીલાકરઃ સૃષ્ટિકૃતોઽન્ધરૂપમ્ ।
લીલાકરાયાસ્ત્રિજગજ્જનન્યા
વિહસ્ય કિઞ્ચિદ્ભગવાનુવાચ ॥ ૨૪॥

મહેશ ઉવાચ ।
શ ૃણ્વમ્બિકે હ્યદ્ભુતવૃત્તકારે
ઉત્પન્ન એષોઽદ્ભુતચણ્ડવીર્યઃ ।
નિમીલિતે ચક્ષુષિ મે ભવત્યા
સ સ્વેદજો મેઽન્ધકનામધેયઃ ॥ ૨૫॥

ત્વં ચાસ્ય કર્તાસ્ય યથાનુરૂપં
ત્વયા સ સખ્યા દયયા ગણેભ્યઃ ।
સ રક્ષિતવ્યસ્ત્વયિ તં હિ વૈકં
વિચાર્ય બુદ્ધ્યા કરણીયમાર્યે ॥ ૨૬॥

સનત્કુમાર ઉવાચ ।
ગૌરી તતો ભર્તૃવચો નિશમ્ય
કારુણ્યભાવાત્સહિતા સખીભિઃ ।
નાનાપ્રકારૈર્બહુભિર્હ્યુપાયૈ-
શ્ચકાર રક્ષાં સ્વસુતસ્ય યદ્વત્ ॥ ૨૭॥

કાલેઽથ તસ્મિન્ શિશિરે પ્રયાતો

હિરણ્યનેત્રસ્ત્વથ પુત્રકામઃ ।
સ્વજ્યેષ્ઠબન્ધોસ્તનયપ્રતાનં
સંવીક્ષ્ય ચાસીત્પ્રિયયા નિયુક્તઃ ॥ ૨૮॥

અરણ્યમાશ્રિત્ય તપશ્ચકારા-
સુરસ્તદા કશ્યપજઃ સુતાર્થમ્ ।
કાષ્ઠોપમોઽસૌ જિતરોષદોષઃ
સન્દર્શનાર્થં તુ મહેશ્વરસ્ય ॥ ૨૯॥

તુષ્ટઃ પિનાકી તપસાસ્ય સમ્યગ્
વરપ્રદાનાય યયૌ દ્વિજેન્દ્ર ।
તત્સ્થાનમાસાદ્ય વૃષધ્વજોઽસૌ
જગાદ દૈત્યપ્રવરં મહેશઃ ॥ ૩૦॥

મહેશ ઉવાચ ।
હે દૈત્યનાથ કુરુ નેન્દ્રિયસઙ્ઘપાતં
કિમર્થમેતદ્વ્રતમાશ્રિતં તે ।
પ્રબ્રૂહિ કામં વરદો ભવોઽહં
યદિચ્છસિ ત્વં સકલં દદામિ ॥ ૩૧॥

સનત્કુમાર ઉવાચ ।
સરસ્યમાકર્ણ્ય મહેશવાક્યં
હ્યતિપ્રસન્નઃ કનકાક્ષદૈત્યઃ ।
કૃતાઞ્જલિર્નમ્રશિરા ઉવાચ ।
સ્તુત્યા ચ નત્વા વિવિધં ગિરીશમ્ ॥ ૩૨॥

હિરણ્યાક્ષ ઉવાચ ।
પુત્રસ્તુ મે ચન્દ્રલલાટ નાસ્તિ
સુવીર્યવાન્દૈત્યકુલાનુરૂપી ॥

તદર્થમેતદ્ વ્રતમાસ્થિતોઽહં
તં દેહિ દેવેશ સુવીર્યવન્તમ્ ॥ ૩૩॥

યસ્માચ્ચ મદ્ ભ્રાતુરનન્તવીર્યાઃ
પ્રહ્લાદપૂર્વા અપિ પઞ્ચપુત્રાઃ ।
મમેહ નાસ્તીતિ ગતાન્વયોઽહં
કો મામકં રાજ્યમિદં બુભૂષેત્ ॥ ૩૪॥

રાજ્યં પરસ્ય સ્વબલેન હૃત્વા
ભુઙ્ક્તેઽથવા સ્વં પિતુરેવ દૃષ્ટમ્ ।
સ પ્રોચ્યતે પુત્ર ઇહ ત્વમુત્ર
પુત્રી સ તેનાપિ ભવેત્પિતાસૌ ॥ ૩૫॥

ઊર્ધ્વં ગતિઃ પુત્રવતાં નિરુક્તા
મનીષિભિર્ધર્મભૃતાં વરિષ્ઠૈઃ ।
સર્વાણિ ભૂતાનિ તદર્થમેવ-
મતઃ પ્રવર્તેત પશૂન્ સ્વતેજસઃ ॥ ૩૬॥

નિરન્વયસ્યાથ ન સન્તિ લોકાઃ
તદર્થમિચ્છન્તિ જનાઃ સુરેભ્યઃ ।
સદા સમારાધ્ય સુરાઙ્ઘ્રિપઙ્કજં
યાચન્ત ઇત્થં સુતમેકમેવ ॥ ૩૭॥

સનત્કુમાર ઉવાચ ।
એતદ્ભવસ્તદ્વચનં નિશમ્ય
કૃપાકરો દૈત્યનૃપસ્ય તુષ્ટઃ ।
તમાહ દૈત્યાધિપ નાસ્તિ પુત્રઃ
ત્વદ્વીર્યજઃ કિન્તુ દદામિ પુત્રમ્ ॥ ૩૮॥

મમાત્મજં ત્વન્ધકનામધેયં
ત્વત્તુલ્યવીર્યં ત્વપરાજિતં ચ ।
વૃણીષ્વ પુત્રં સકલં વિહાય
દુઃખં પ્રતીચ્છસ્વ સુતં ત્વમેવ ॥ ૩૯॥

ઇત્યેવમુક્ત્વા પ્રદદૌ સ તસ્મૈ
હિરણ્યનેત્રાય સુતં પ્રસન્નઃ ।
હરસ્તુ ગૌર્યા સહિતો મહાત્મા
ભૂતાદિનાથસ્ત્રિપુરારિરુગ્રઃ ॥ ૪૦॥

તતો હરાત્પ્રાપ્ય સુતં સ દૈત્યઃ
પ્રદક્ષિણીકૃત્ય યથાક્રમેણ ।
સ્તોત્રૈરનેકૈરભિપૂજ્ય રુદ્રં
તુષ્ટઃ સ્વરાજ્યં ગતવાન્મહાત્મા ॥ ૪૧॥

તતસ્તુ પુત્રં ગિરિશાદવાપ્ય
રસાતલં ચણ્ડપરાક્રમસ્તુ ।
ઇમાં ધરિત્રીમનયત્સ્વદેશં
દૈત્યો વિજિત્વા ત્રિદશાનશેષાન્ ॥ ૪૨॥

તતસ્તુ દેવૈર્મુનિભિશ્ચ સિદ્ધૈઃ
સર્વાત્મકં યજ્ઞમયં કરાલમ્ ।
વારાહમાશ્રિત્ય વપુઃ પ્રધાન-
મારાધિતો વિષ્ણુરનન્તવીર્યઃ ॥ ૪૩॥

ઘોણાપ્રહારૈર્વિવિધૈર્ધરિત્રીં
વિદાર્ય પાતાલતલં પ્રવિશ્ય ।
તુણ્ડેન દૈત્યાન્ શતશો વિચૂર્ણ્ય
દંષ્ટ્રાભિરગ્ર્યાભિરખણ્ડિતાભિઃ ॥ ૪૪॥

પાદપ્રહારૈરશનિપ્રકાશૈ-
રુન્મથ્ય સૈન્યાનિ નિશાચરાણામ્ ।
માર્તણ્ડકોટિપ્રતિમેન પશ્ચાત્
સુદર્શનેનાદ્ભુતચણ્ડતેજાઃ ॥ ૪૫॥

હિરણ્યનેત્રસ્ય શિરો જ્વલન્તં
ચિચ્છેદ દૈત્યાંશ્ચ દદાહ દુષ્ટાન્ ।
તતઃ પ્રહૃષ્ટો દિતિજેન્દ્રરાજ
સ્તમન્ધકં તત્ર સ ચાભ્યષિઞ્ચત્ ॥ ૪૬॥

સ્વસ્થાનમાગત્ય તતો ધરિત્રીં
દૃષ્ટ્રાઙ્કુરેણોદ્ધરતઃ પ્રહૃષ્ટઃ ।
ભૂમિં ચ પાતાલતલાન્મહાત્મા
પુપોષ ભાગં ત્વથ પૂર્વકં તુ ॥ ૪૭॥

દેવૈઃસમસ્તૈર્મુનિભિઃ પ્રહૃષ્ટૈ-
રભિષ્ટુતઃ પદ્મભુવા ચ તેન ।
યયૌ સ્વલોકં હરિરુગ્રકાયો
વરાહરૂપસ્તુ સુકાર્યકર્તા ॥ ૪૮॥

હિરણ્યનેત્રેઽથ હતેઽસુરેશે
વરાહરૂપેણ સુરેણ સદ્યઃ ।

દેવાઃસમસ્તા મુનયશ્ચ સર્વે
પરે ચ જીવાઃ સુખિનો બભૂવુઃ ॥ ૪૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે હિરણ્યાક્ષવધો નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૨.૫.૪૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૪૩. ત્રિચત્વારિંશોઽધ્યાયઃ । ગણાધિપત્યપ્રાપ્ત્યન્ધકજન્મ હિરણ્યનેત્રહિરણ્યકશિપુવધવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ હતે તસ્મિન્સુરદ્રુહિ ।
કિમકાર્ષીત્તતસ્તસ્ય જ્યેષ્ઠભ્રાતા મહાસુરઃ ॥ ૧॥

કુતૂહલમિતિ શ્રોતું મમાસ્તીહ મુનીશ્વર ।
તચ્છ્રાવય કૃપાં કૃત્વા બ્રહ્મપુત્ર નમોઽસ્તુ તે ॥ ૨॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય વ્યાસસ્ય સ મુનીશ્વરઃ ।
સનત્કુમારઃ પ્રોવાચ સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૩॥

સનત્કુમાર ઉવાચ ।
ભ્રાતર્યેવં વિનિહતે હરિણા ક્રોડમૂર્તિના ।
હિરણ્યકશિપુર્વ્યાસ પર્યતપ્યદ્રુષા શુચા ॥ ૪॥

તતઃ પ્રજાનાં કદનં વિધાતું કદનપ્રિયાન્ ।
નિર્દિદેશાઽસુરાન્વીરાન્હરિવૈરપ્રિયો હિ સઃ ॥ ૫॥

અથ તે ભર્તૃસન્દેશમાદાય શિરસાઽસુરાઃ ।
દેવપ્રજાનાં કદનં વિદધુઃ કદનપ્રિયાઃ ॥ ૬॥

તતો વિપ્રકૃતે લોકેઽસુરૈસ્તૈર્દુષ્ટમાનસૈઃ ।
દિવં દેવાઃ પરિત્યજ્ય ભુવિ ચેરુરલક્ષિતાઃ ॥ ૭॥

હિરણ્યકશિપુર્ભ્રાતુઃ સમ્પરેતસ્ય દુઃખિતઃ ।
કૃત્વા કરોદકાદીનિ તત્કલત્રાદ્યસાન્ત્વયત્ ॥ ૮॥

તતઃસ દૈત્યરાજેન્દ્રો હ્યજેયમજરામરમ્ ।
આત્માનમપ્રતિદ્વન્દ્વમેકરાજ્યં વ્યધિત્સત ॥ ૯॥

સ તેપે મન્દરદ્રોણ્યાં તપઃ પરમદારુણમ્ ।
ઊર્ધ્વબાહુર્નભોદૃષ્ટિઃ ષાદાઙ્ગુષ્ઠાશ્રિતાવનિઃ ॥ ૧૦॥

તસ્મિંસ્તપસ્તપ્યમાને દેવાઃસર્વે બલાન્વિતાઃ ।
દૈત્યાન્સર્વાન્વિનિર્જિત્ય સ્વાનિ સ્થાનાનિ ભેજિરે ॥ ૧૧॥

તસ્ય મૂર્ધ્નઃ સમુદ્ભૂતઃ સધૂમોઽગ્નિસ્તપોમયઃ ।
તિર્યગૂર્ધ્વમધોલોકાનતપદ્વિષ્વગીરિતઃ ॥ ૧૨॥

તેન તપ્તા દિવં ત્યક્ત્વા બ્રહ્મલોકં યયુઃ સુરાઃ ।
ધાત્રે વિજ્ઞાપયામાસુસ્તત્તપોવિકૃતાનનાઃ ॥ ૧૩॥

અથ વિજ્ઞાપિતો દેવૈર્વ્યાસ તૈરાત્મભૂર્વિધિઃ ।
પરીતો ભૃગુદક્ષાદ્યૈર્યયૌ દૈત્યેશ્વરાશ્રમમ્ ॥ ૧૪॥

પ્રતાપ્ય લોકાનખિલાંસ્તતોઽસૌ
સમાગતં પદ્મભવં દદર્શ ।
વરં હિ દાતું તમુવાચ ધાતા
વરં વૃણીષ્વેતિ પિતામહોઽપિ ॥

નિશમ્ય વાચં મધુરાં વિધાતુ-
ર્વચોઽબ્રવીદેવમમૂઢબુદ્ધિઃ ॥ ૧૫॥

હિરણ્યકશિપુરુવાચ ।
મૃત્યોર્ભયં મે ભગવન્પ્રજેશ
પિતામહાભૂન્ન કદાપિ દેવ ।
શસ્ત્રાસ્ત્રપાશાશનિશુષ્કવૃક્ષ-
ગિરીન્દ્રતોયાગ્નિરિપુપ્રહારૈઃ ॥ ૧૬॥

દેવૈશ્ચ દૈત્યૈર્મુનિભિશ્ચ સિદ્ધૈઃ
ત્વત્સૃષ્ટજીવૈર્બહુવાક્યતઃ કિમ્ ।
સ્વર્ગે ધરણ્યાં દિવસે નિશાયાં
નૈવોર્ધ્વતો નાપ્યધતઃ પ્રજેશ ॥ ૧૭॥

સનત્કુમાર ઉવાચ ।
તસ્યૈતદીદૃગ્વચનં નિશમ્ય
દૈત્યેન્દ્ર તુષ્ટોઽસ્મિ લભસ્વ સર્વમ્ ।
પ્રણમ્ય વિષ્ણું મનસા તમાહ
દયાન્વિતોઽસાવિતિ પદ્મયોનિઃ ॥ ૧૮॥

અલં તપસ્તે પરિપૂર્ણકામઃ
સમાઃ સહસ્રાણિ ચ ષણ્ણવત્યઃ ।
ઉત્તિષ્ઠ રાજ્યં કુરુ દાનવાનાં
શ્રુત્વા ગિરં તત્સુમુખો બભૂવ ॥ ૧૯॥

રાજ્યાભિષિક્તઃ પ્રપિતામહેન
ત્રૈલોક્યનાશાય મતિં ચકાર ।
ઉત્સાદ્ય ધર્માન્ સકલાન્પ્રમત્તો
જિત્વાહવે સોઽપિ સુરાન્સમસ્તાન્ ॥ ૨૦॥

તતો ભયાદ્ ઇન્દ્રમુખાશ્ચ દેવાઃ
પિતામહાજ્ઞાં સમવાપ્ય સર્વે ।
ઉપદ્રુતા દૈત્યવરેણ જાતાઃ
ક્ષીરોદધિં યત્ર હરિસ્તુ શેતે ॥ ૨૧॥

આરાધયામાસુરતીવ વિષ્ણું
સ્તુત્વા વચોભિઃ સુખદં હિ મત્વા ।
નિવેદયામાસુરથો પ્રસન્નં
દુઃખં સ્વકીયં સકલં હિ તે તે ॥ ૨૨॥

શ્રુત્વા તદીયં સકલં હિ દુઃખં
તુષ્ટો રમેશઃ પ્રદદૌ વરાંસ્તુ ।
ઉત્થાય તસ્માચ્છયનાદુપેન્દ્રો
નિજાનુરૂપૈર્વિવિધૈર્વચોભિઃ ॥ ૨૩॥

આશ્વાસ્ય દેવાનખિલાન્મુનીન્વા
ઉવાચ વૈશ્વાનરતુલ્યતેજાઃ ।
દૈત્યં હનિષ્યે પ્રસભં સુરેશાઃ
પ્રયાત ધામાનિ નિજાનિ તુષ્ટાઃ ॥ ૨૪॥

શ્રુત્વા રમેશસ્ય વચઃ સુરેશાઃ
શક્રાદિકાસ્તે નિખિલાઃ સુતુષ્ટાઃ ।
યયુઃ સ્વધામાનિ હિરણ્યનેત્રા-
નુજં ચ મત્વા નિહતં મુનીશ ॥ ૨૫॥

આશ્રિત્ય રૂપં જટિલં કરાલં
દંષ્ટ્રાયુધં તીક્ષ્ણનખં સુનાસમ્ ।
સૈંહં ચ નારં સુવિદારિતાસ્યં
માર્તણ્ડકોટિપ્રતિમં સુઘોરમ્ ॥ ૨૬॥

યુગાન્તકાલાગ્નિસમપ્રભાવં
જગન્મયં કિં બહુભિર્વચોભિઃ ।
અસ્તે રવૌ સોઽપિ હિ ગચ્છતીશો
ગતોઽસુરાણાં નગરીં મહાત્મા ॥ ૨૭॥

કૃત્વા ચ યુદ્ધં પ્રબલૈઃસ દૈત્યૈ-
ર્હત્વાથ તાન્દૈત્યગણાન્ગૃહીત્વા ।
બભ્રામ તત્રાદ્ભુતવિક્રમશ્ચ
બભઞ્જ તાંસ્તાનસુરાન્નૃસિંહઃ ॥ ૨૮॥

દૃષ્ટઃ સ દૈત્યૈરતુલપ્રભાવ-
સ્તે રેભિરે તે હિ તથૈવ સર્વે ।
સિંહં ચ તં સર્વમયં નિરીક્ષ્ય
પ્રહ્લાદનામા દિતિજેન્દ્રપુત્રઃ ।
ઉવાચ રાજાનમયં મૃગેન્દ્રો
જગન્મયઃ કિં સમુપાગતશ્ચ ॥ ૨૯॥

પ્રહ્લાદ ઉવાચ ।
એષ પ્રવિષ્ટો ભગવાનનન્તો
નૃસિંહમાત્રો નગરં ત્વદન્તઃ ।
નિવૃત્ય યુદ્ધાચ્છરણં પ્રયાહિ
પશ્યામિ સિંહસ્ય કરાલમૂર્ત્તિમ્ ॥ ૩૦॥

યસ્માન્ન યોદ્ધા ભુવનત્રયેઽપિ
કુરુષ્વ રાજ્યં વિનમન્મૃગેન્દ્રમ્ ।
શ્રુત્વા સ્વપુત્રસ્ય વચો દુરાત્મા

તમાહ ભીતોઽસિ કિમત્ર પુત્ર ॥ ૩૧॥

ઉક્ત્વેતિ પુત્રં દિતિજાધિનાથો
દૈત્યર્ષભાન્વીરવરાન્સ રાજા ।
ગૃહ્ણન્તુ વૈ સિંહમમું ભવન્તો
વીરા વિરૂપભ્રુકુટીક્ષણં તુ ॥ ૩૨॥

તસ્યાજ્ઞયા દૈત્યવરાસ્તતસ્તે
ગ્રહીતુકામા વિવિશુર્મૃગેન્દ્રમ્ ।
ક્ષણેન દગ્ધાઃ શલભા ઇવાગ્નિં
રૂપાભિલાષાત્પ્રવિવિક્ષવો વૈ ॥ ૩૩॥

દૈત્યેષુ દગ્ધેષ્વપિ દૈત્યરાજ-
શ્ચકાર યુદ્ધં સ મૃગાધિપેન ।
શસ્ત્રૈઃ સમગ્રૈરખિલૈસ્તથાસ્ત્રૈઃ
શક્ત્યર્ષ્ટિપાશાઙ્કુશપાવકાદ્યૈઃ ॥ ૩૪॥

સંયુધ્યતોરેવ તયોર્જગામ
બ્રાહ્મં દિનં વ્યાસ હિ શસ્ત્રપાણ્યોઃ ।
પ્રવીરયોર્વીરરવેણ ગર્જતોઃ
પરસ્પરં ક્રોધસુયુક્તચેતસોઃ ॥ ૩૫॥

તતઃ સ દૈત્યઃ સહસા બહૂંશ્ચ
કૃત્વા ભુજાન્ શસ્ત્રયુતાન્નિરીક્ષ્ય ।
નૃસિંહરૂપં પ્રયયૌ મૃગેન્દ્ર
સંયુધ્યમાનં સહસા સમન્તાત્ ॥ ૩૬॥

તતઃ સુયુદ્ધં ત્વતિદુઃસહં તુ
શસ્ત્રૈઃસમસ્તૈશ્ચ તથાખિલાસ્ત્રૈઃ ।
કૃત્વા મહાદૈત્યવરો નૃસિંહં
ક્ષયં ગતૈઃ શૂલધરોઽભ્યુપાયાત્ ॥ ૩૭॥

તતો ગૃહીતઃ સ મૃગાધિપેન
ભુજૈરનેકૈર્ગિરિસારવદ્ભિઃ ।
નિધાય જાનૌ સ ભુજાન્તરેષુ
નખાઙ્કુરૈર્દાનવમર્મભિદ્ભિઃ ॥ ૩૮॥

નખાસ્ત્રહૃત્પદ્મમસૃગ્વિમિશ્ર-
મુત્પાદ્ય જીવાદ્વિગતઃ ક્ષણેન ।
ત્યક્તસ્તદાનીં સ તુ કાષ્ઠભૂતઃ
પુનઃ પુનશ્ચૂર્ણિતસર્વગાત્રઃ ॥ ૩૯॥

તસ્મિન્હતે દેવરિપૌ પ્રસન્નઃ
પ્રહ્લાદમામન્ત્ર્ય કૃતપ્રણામમ્ ।
રાજ્યેઽભિષિચ્યાદ્ભુતવીર્યવિષ્ણુ-
સ્તતઃ પ્રયાતો ગતિમપ્રતર્ક્યામ્ ॥ ૪૦॥

તતોઽતિહૃષ્ટાઃસકલાઃ સુરેશાઃ
પ્રણમ્ય વિષ્ણું દિશિ વિપ્ર તસ્યામ્ ।
યયુઃ સ્વધામાનિ પિતામહાદ્યાઃ
કૃતસ્વકાર્યં ભગવન્તમીડ્યમ્ ॥ ૪૧॥

પ્રવર્ણિતં ત્વન્ધકજન્મ રુદ્રાદ્
હિરણ્યનેત્રસ્ય મૃતિર્વરાહાત્ ।
નૃસિંહતસ્તત્સહજસ્ય નાશઃ
પ્રહ્લાદરાજ્યાપ્તિરિતિ પ્રસઙ્ગાત્ ॥ ૪૨॥

શૃણુ ત્વિદાનીં દ્વિજવર્ય મત્તોઽ-
ન્ધકપ્રભાવં ભવકૃત્ પ્રલબ્ધમ્ ।
હરેણ યુદ્ધં ખલુ તસ્ય પશ્ચાદ્
ગણાધિપત્યં ગિરિશસ્ય તસ્ય ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે ગણાધિપત્યપ્રાપ્ત્યન્ધકજન્મ હિરણ્યનેત્રહિરણ્યકશિપુવધવર્ણનં નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥ ૨.૫.૪૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૪૪. ચતુશ્ચત્વારિંશોઽધ્યાયઃ । અન્ધકગાણપત્યપદલાભોપાખ્યાને દૂતસંવાદઃ ।

સનત્કુમાર ઉવાચ ।

તતો હિરણ્યાક્ષસુતઃ કદાચિ-
ત્સંશ્રાવિતો નર્મયુતૈર્મદાન્ધૈઃ ।
તૈર્ભ્રાતૃભિઃસમ્પ્રયુતો વિહારે
કિમન્ધ રાજ્યેન તવાદ્ય કાર્યમ્ ॥ ૧॥

હિરણ્યનેત્રસ્તુ બભૂવ મૂઢઃ
કલિપ્રિયં નેત્રવિહીનમેવ ।
યો લબ્ધવાંસ્ત્વાં વિકૃતં વિરૂપં
ઘોરૈસ્તપોભિર્ગિરિશં પ્રસાદ્ય ॥ ૨॥

સ ત્વં ન ભાગી ખલુ રાજ્યકસ્ય
કિમન્યજાતોઽપિ લભેત રાજ્યમ્ ।
વિચાર્યતાં તદ્ભવતૈવ નૂનં
વયં તુ તદ્ભાગિન એવ સત્યમ્ ॥ ૩॥

સનત્કુમાર ઉવાચ ।
તેષાં તુ વાક્યાનિ નિશમ્ય તાનિ
વિચાર્ય બુદ્ધ્યા સ્વયમેવ દીનઃ ।
તાન્ શાન્તયિત્વા વિવિધૈર્વચોભિઃ
ગતસ્ત્વરણ્યં નિશિ નિર્જનં તુ ॥ ૪॥

વર્ષાયુતં તત્ર તપશ્ચચાર
જજાપ જાપ્યં વિધૃતૈકપાદઃ ।
આહારહીનો નિયમોર્ધ્વબાહુઃ
કર્ત્તું ન શક્યં હિ સુરાસુરૈર્યત્ ॥ ૫॥

પ્રજ્વાલ્ય વહ્નિં સ્મ જુહોતિ ગાત્ર-
માંસં સરક્તં ખલુ વર્ષમાત્રમ્ ।
તીક્ષ્ણેન શસ્ત્રેણ નિકૃત્ય દેહાત્
સમન્ત્રકં પ્રત્યહમેવ હુત્વા ॥ ૬॥

સ્નાય્વસ્થિશેષં કુણપં તદાસૌ
ક્ષયં ગતં શોણિતમેવ સર્વમ્ ।
યદાસ્ય માંસાનિ ન સન્તિ દેહં
પ્રક્ષેપ્તુકામસ્તુ હુતાશનાય ॥ ૭॥

તતઃ સ દૃષ્ટસ્ત્રિદશાલયૈર્જનૈઃ

સુવિસ્મિતૈર્ભીતિયુતૈઃ સમસ્તૈઃ ।
અથામરૈઃ શીઘ્રતરં પ્રસાદિતો
બભૂવ ધાતા નુતિભિર્નુતો હિ ॥ ૮॥

નિવારયિત્વાથ પિતામહસ્તં
હ્યુવાચ તં ચાદ્ય વરં વૃણીષ્વ ।
યસ્યાભિકામસ્તવ સર્વલોકે
સુદુર્લભં દાનવ તં ગૃહાણ ॥ ૯॥

સ પદ્મયોનેસ્તુ વચો નિશમ્ય
પ્રોવાચ દીનઃ પ્રણતસ્તુ દૈત્યઃ ।
યૈર્નિષ્ઠુરૈર્મે પ્રહૃતં તુ રાજ્યં
પ્રહ્રાદમુખ્યા મમ સન્તુ ભૃત્યાઃ ॥ ૧૦॥

અન્ધસ્ય દિવ્યં હિ તથાસ્તુ ચક્ષુ-
રિન્દ્રાદયો મે કરદા ભવન્તુ ।
મૃત્યુસ્તુ માભૂન્મમ દેવદૈત્ય-
ગન્ધર્વયક્ષોરગમાનુષેભ્યઃ ॥ ૧૧॥

નારાયણાદ્વા દિતિજેન્દ્રશત્રોઃ
સર્વાજ્જનાત્સર્વમયાચ્ચ શર્વાત્ ।
શ્રુત્વા વચસ્તસ્ય સુદારુણં તત્
સુશઙ્કિતઃ પદ્મભવસ્તમાહ ॥ ૧૨॥

બ્રહ્મોવાચ ।
દૈત્યેન્દ્ર સર્વં ભવિતા તદેતદ્
વિનાશહેતું ચ ગૃહાણ કિઞ્ચિત્ ।
યસ્માન્ન જાતો ન જનિષ્યતે વા
યો ન પ્રવિષ્ટો મુખમન્તકસ્ય ॥ ૧૩॥

અત્યન્તદીર્ઘં ખલુ જીવિતં તુ
ભવાદૃશાઃ સત્પુરુષાઃ ત્યજન્તુ ।
એતદ્વચઃ સાનુનયં નિશમ્ય
પિતામહાત્પ્રાહ પુનઃ સ દૈત્યઃ ॥ ૧૪॥

અન્ધક ઉવાચ ।
કાલત્રયે યાશ્ચ ભવન્તિ નાર્યઃ

શ્રેષ્ઠાશ્ચ મધ્યાશ્ચ તથા કનિષ્ઠાઃ ।
તાસાં ચ મધ્યે ખલુ રત્નભૂતા
મમાપિ નિત્યં જનનીવ કાચિત્ ॥ ૧૫॥

કાયેન વાચા મનસાપ્યગમ્યા
નારી નૃલોકસ્ય ચ દુર્લભા યા ।
તાં કામયાનસ્ય મમાસ્તુ નાશો
દૈત્યેન્દ્રભાવાદ્ભગવાન્સ્વયમ્ભૂઃ ॥ ૧૬॥

વાક્યં તદાકર્ણ્ય સ પદ્મયોનિઃ
સુવિસ્મિતઃ શઙ્કરપાદપદ્મમ્ ।
સસ્માર સમ્પ્રાપ્ય નિદેશમાશુ
શમ્ભોસ્તુ તં પ્રાહ તતોઽન્ધકં વૈ ॥ ૧૭॥

બ્રહ્મોવાચ ।
યત્કાઙ્ક્ષસે દૈત્ય વરાંસ્તુ તે વૈ
સર્વં ભવત્યેવ વચઃ સકામમ્ ।
ઉત્તિષ્ઠઃ દૈત્યેન્દ્ર લભસ્વ કામં
સદૈવ વીરૈસ્તુ કુરુષ્વ યુદ્ધમ્ ॥ ૧૮॥

શ્રુત્વા તદેતદ્વચનં મુનીશ
વિધાતુરાશુ પ્રણિપત્ય ભક્ત્યા ।
લોકેશ્વરં હાટકનેત્રપુત્રઃ
સ્નાય્વસ્થિશેષસ્તુ તમાહ દેવમ્ ॥ ૧૯॥

અન્ધક ઉવાચ ।
કથં વિભો વૈરિબલં પ્રવિશ્ય
હ્યનેન દેહેન કરોમિ યુદ્ધમ્ ।
સ્નાય્વસ્થિશેષં કુરુ માંસપુષ્ટં
કરેણ પુણ્યેન ચ માં સ્પૃશાદ્ય ॥ ૨૦॥

સનત્કુમાર ઉવાચ ।
શ્રુત્વા વચસ્તસ્ય સ પદ્મયોનિઃ
કરેણ સંસ્પૃશ્ય ચ તચ્છરીરમ્ ।
ગતઃ સુરેન્દ્રૈઃ સહિતઃ સ્વધામ
સમ્પૂજ્યમાનો મુનિસિદ્ધસઙ્ઘૈઃ ॥ ૨૧॥

સંસ્પૃષ્ટમાત્રઃ સ ચ દૈત્યરાજઃ
સમ્પૂર્ણદેહો બલવાન્ બભૂવ ।
સઞ્જાતનેત્રઃ સુભગો બભૂવ
હૃષ્ટઃ સ્વમેવં નગરં વિવેશ ॥ ૨૨॥

ઉત્સૃજ્ય રાજ્યં સકલં ચ તસ્મૈ
પ્રહ્લાદમુખ્યાસ્ત્વથ દાનવેન્દ્રાઃ ।
તમાગતં લબ્ધવરં ચ મત્વા
ભૃત્યા બભૂવુર્વશગાસ્તુ તસ્ય ॥ ૨૩॥

તતોઽન્ધકઃ સ્વર્ગમગાદ્વિજેતું
સેનાભિયુક્તઃ સહભૃત્યવર્ગઃ ।
વિજિત્ય દેવાન્ પ્રધને સમસ્તાન્
કરપ્રદં વજ્રધરં ચકાર ॥ ૨૪॥

નાગાન્સુપર્ણાન્વરરાક્ષસાંશ્ચ
ગન્ધર્વયક્ષાનપિ માનુષાંસ્તુ ।
ગિરીન્દ્રવૃક્ષાન્સમરેષુ સર્વાં-
શ્ચતુષ્પદઃ સિંહમુખાન્વિજિગ્યે ॥ ૨૫॥

ત્રૈલોક્યમેતદ્ધિ ચરાચરં વૈ
વશં ચકારાત્મનિ સન્નિયોજ્ય ।
તતોઽનુકૂલાનિ સુદર્શનાનિ
નારીસહસ્રાણિ બહૂનિ ગત્વા ॥ ૨૬॥

રસાતલે ચૈવ તથા ધરાયાં
ત્રિવિષ્ટપે યાઃ પ્રમદાઃ સુરૂપાઃ ।
તાભિર્યુતોઽન્યેષુ સ પર્વતેષુ
રરામ રમ્યેષુ નદીતટેષુ ॥ ૨૭॥

ક્રીડાયમાનઃ સ તુ મધ્યવર્તી
તાસાં પ્રહર્ષાદથ દાનવેન્દ્રઃ ।
તત્પીતશિષ્ટાનિ પિબન્પ્રવૃત્ત્યૈ
દિવ્યાનિ પેયાનિ સુમાનુષાણિ ॥ ૨૮॥

અન્યાનિ દિવ્યાનિ તુ યદ્રસાનિ
ફલાનિ પુષ્પાણિ સુગન્ધવન્તિ ।

સમ્પ્રાપ્ય યાનાનિ સુવાહનાનિ
મયેન સૃષ્ટાનિ ગૃહોત્તમાનિ ॥ ૨૯॥

પુષ્પાર્ઘધૂપાન્નવિલેપનૈશ્ચ
સુશોભિતાન્યદ્ભુતદર્શનૈશ્ચ ।
સઙ્ક્રીડમાનસ્ય ગતાનિ તસ્ય
વર્ષાયુતાનીહ તથાન્ધકસ્ય ॥ ૩૦॥

જાનાતિ કિઞ્ચિન્ન શુભં પરત્ર
યદાત્મનઃ સૌખ્યકરં ભવેદ્ધિ ।
સદાન્ધકો દૈત્યવરઃ સ મૂઢો
મદાન્ધબુદ્ધિઃ કૃતદુષ્ટસઙ્ગઃ ॥ ૩૧॥

તતઃ પ્રમત્તસ્તુ સુતાન્પ્રધાનાન્
કુતર્કવાદૈરભિભૂય સર્વાન્ ।
ચચાર દૈત્યૈઃસહિતો મહાત્મા
વિનાશયન્વૈદિકસર્વધર્માન્ ॥ ૩૨॥

વેદાન્દ્વિજાન્ વિત્તમદાભિભૂતો
ન મન્યતે સ્માપ્યમરાન્ગુરૂંશ્ચ ।
રેમે તથા દૈવગતો હતાયુઃ
સ્વૈરૈરહોભિર્ગમયન્વયશ્ચ ॥ ૩૩॥

તતઃ કદાચિદ્ગતવાન્સસૈન્યો
બહુપ્રયાતા પૃથિવીતલેઽસ્મિન્ ।
અનેકસઙ્ખ્યા અપિ વર્ષકોટ્યઃ
પ્રહર્ષિતો મન્દરપર્વતં તુ ॥ ૩૪॥

સ્વર્ણોપમાં તત્ર નિરીક્ષ્ય શોભાં
બભ્રામ સૈન્યૈઃ સહ માનમત્તઃ ।
ક્રીડાર્થમાસાદ્ય ચ તં ગિરીન્દ્રં
મતિં સ વાસાય ચકાર મોહાત્ ॥ ૩૫॥

શુભં દૃઢં તત્ર પુરં સ કૃત્વા
મુદા સ્થિતો દૈત્યપતિઃ પ્રભાવાત્ ।
નિવેશયામાસ પુનઃ ક્રમેણ
અત્યદ્ભુતં મન્દરશૈલસાનૌ ॥ ૩૬॥

દુર્યોધનો વૈધસહસ્તિસંજ્ઞૌ
તન્મન્ત્રિણૌ દાનવસત્તમસ્ય ।
તે વૈ કદાચિદ્ગિરિસુસ્થલે હિ
નારીં સુરૂપાં દદૃશુસ્ત્રયોઽપિ ॥ ૩૭॥

તે શીઘ્રગા દૈત્યવરાસ્તુ હર્ષાદ્
દ્રુતં મહાદૈત્યપતિં સમેત્ય ।
ઊચુર્યથાદૃષ્ટમતીવ પ્રીત્યા
તથાન્ધકં વીરવરં હિ સર્વે ॥ ૩૮॥

મન્ત્રિણ ઊચુઃ ।
ગુહાન્તરે ધ્યાનનિમીલિતાક્ષો
દૈત્યેન્દ્ર કશ્ચિન્મુનિરત્ર દૃષ્ટઃ ।
રૂપાન્વિતશ્ચન્દ્રકલાર્દ્ધચૂડઃ
કટિસ્થલે બદ્ધગજેન્દ્રકૃત્તિઃ ॥ ૩૯॥

નાગેન્દ્રભોગાવૃતસર્વગાત્રઃ
કપાલમાલાભરણો જટાલઃ ।
સ શૂલહસ્તઃ શરતૂણધારી
મહાધનુષ્માન્વિવૃતાક્ષસૂત્રઃ ॥ ૪૦॥

ખડ્ગી ત્રિશૂલી લકુટી કપર્દી
ચતુર્ભુજો ગૌરતરાકૃતિર્હિ ।
ભસ્માનુલિપ્તો વિલસત્સુતેજાઃ
તપસ્વિવર્યોઽદ્ભુતસર્વવેષઃ ॥ ૪૧॥

તસ્યાવિદૂરે પુરુષશ્ચ દૃષ્ટઃ
સ વાનરો ઘોરમુખઃકરાલઃ ।
સર્વાયુધો રૂક્ષકરશ્ચ રક્ષન્
સ્થિતો જરદ્વોવૃષભશ્ચ શુક્લઃ ॥ ૪૨॥

તસ્યોપવિષ્ટસ્ય તપસ્વિનોઽપિ
સુચારુરૂપા તરુણી મનોજ્ઞા ।
નારી શુભા પાર્શ્વગતા હિ તસ્ય
દૃષ્ટા ચ કાચિદ્ભુવિ રત્નભૂતા ॥ ૪૩॥

પ્રવાલમુક્તામણિહેમરત્ન-
વસ્ત્રાવૃતા માલ્યશુભોપગૂઢા ।
સા યેન દૃષ્ટા સ ચ દૃષ્ટિમાન્સ્યાદ્
દૃષ્ટેન ચાન્યેન કિમત્ર કાર્યમ્ ॥ ૪૪॥

માન્યા મહેશસ્ય ચ દિવ્યનારી
ભાર્યા મુનેઃ પુણ્યવતઃ પ્રિયા સા ।
યોગ્યા હિ દ્રષ્ટું ભવતશ્ચ સમ્ય-
ગાનાય્ય દૈત્યેન્દ્ર સુરત્નભોક્તુઃ ॥ ૪૫॥

સનત્કુમાર ઉવાચ ।
શ્રુત્વેતિ તેષાં વચનાનિ તાનિ
કામાતુરો ઘૂર્ણિતસર્વગાત્રઃ ।
વિસર્જયામાસ મુનેઃ સકાશં
દુર્યોધનાદીન્સહસા સ દૈત્યઃ ॥ ૪૬॥

આસાદ્ય તે તં મુનિમપ્રમેયં
બૃહદ્વ્રતં મન્ત્રિવરા હિ તસ્ય ।
સુરાજનીતિપ્રવણા મુનીશ
પ્રણમ્ય તં દૈત્યનિદેશમાહુઃ ॥ ૪૭॥

મન્ત્રિણ ઊચુઃ ।
હિરણ્યનેત્રસ્ય સુતો મહાત્મા
દૈત્યાધિરાજોઽન્ધકનામધેયઃ ।
ત્રૈલોક્યનાથો ભવકૃન્નિદેશા-
દિહોપવિષ્ટોઽદ્ય વિહારશાલી ॥ ૪૮॥

તન્મન્ત્રિણો વૈ વયમઙ્ગવીરા-
સ્તવોપકણ્ઠં ચ સમાગતાઃ સ્મ ।
તત્પ્રેષિતાસ્ત્વાં યદુવાચ તદ્વૈ
શ઼ૃણુષ્વ સન્દત્તમનાસ્તપસ્વિન્ ॥ ૪૯॥

ત્વં કસ્ય પુત્રોઽસિ કિમર્થમત્ર
સુખોપવિષ્ટો મુનિવર્ય ધીમન્ ।
કસ્યેયમીદૃક્તરુણી સુરૂપા
દેયા શુભા દૈત્યપતેર્મુનીન્દ્ર ॥ ૫૦॥

ક્વેદં શરીરં તવ ભસ્મદિગ્ધં
કપાલમાલાભરણં વિરૂપમ્ ।
તૂણીરસત્કાર્મુકબાણખડ્ગ-
ભુશુણ્ડિશૂલાશનિતોમરાણિ ॥ ૫૧॥

ક્વ જાહ્નવી પુણ્યતમા જટાગ્રે
ક્વાયં શશી વા કુણપાસ્થિખણ્ડમ્ ।
વિષાનલો દીર્ઘમુખઃ ક્વ સર્પઃ
ક્વ સઙ્ગમઃ પીનપયોધરાયાઃ ॥ ૫૨॥

જરદ્ગવારોહણમપ્રશસ્તં
ક્ષમાવતસ્તસ્ય ન દર્શનં ચ ।
સન્ધ્યાપ્રણામઃ ક્વચિદેષ ધર્મઃ
ક્વ ભોજનં લોકવિરુદ્ધમેતત્ ॥ ૫૩॥

પ્રયચ્છ નારીં મમ સાન્ત્વપૂર્વં
સ્ત્રિયા તપઃ કિં કુરુષે વિમૂઢ ।
અયુક્તમેતત્ત્વયિ નાનુરૂપં
યસ્માદહં રત્નપતિસ્ત્રિલોકે ॥ ૫૪॥

વિમુઞ્ચ શસ્ત્રાણિ મયાદ્ય ચોક્તઃ
કુરુષ્વ પશ્ચાત્તપ એવ શુદ્ધમ્ ।
ઉલ્લઙ્ઘ્ય મચ્છાસનમપ્રધૃષ્યં
વિમોક્ષ્યસે સર્વમિદં શરીરમ્ ॥ ૫૫॥

મત્વાન્ધકં દુષ્ટમતિપ્રધાનો
મહેશ્વરો લૌકિકભાવશીલઃ ।
પ્રોવાચ દૈત્યં સ્મિતપૂર્વમેવ-
માકર્ણ્ય સર્વં ત્વથ દૂતવાક્યમ્ ॥ ૫૬॥

શિવ ઉવાચ ।
યદ્યસ્મિ રુદ્રસ્તવ કિં મયા સ્યાત્
કિમર્થમેવં વદસીતિ મિથ્યા ।
શ‍ૃણુ પ્રભાવં મમ દૈત્યનાથ
ન્યાય્યં ન વક્તું વચનં ત્વયૈવમ્ ॥ ૫૭॥

નાહં ક્વચિત્સ્વં પિતરં સ્મરામિ

ગુહાન્તરે ઘોરમનન્યચીર્ણમ્ ।
એતદ્ વ્રતં પાશુપતં ચરામિ
ન માતરં ત્વજ્ઞાતમો વિરૂપઃ ॥ ૫૮॥

અમૂલમેતન્મયિ તુ પ્રસિદ્ધં
સુદુસ્ત્યજં સર્વમિદં મમાસ્તિ ।
ભાર્યા મમેયં તરુણી સુરૂપા
સર્વંસહા સર્વગતસ્ય સિદ્ધિઃ ॥ ૫૯॥

એતર્હિ યદ્યદ્રુચિતં તવાસ્તિ
ગૃહાણ તદ્વૈ ખલુ રાક્ષસ ત્વમ્ ।
એતાવદુક્ત્વા વિરરામ શમ્ભુઃ
તપસ્વિવેષઃ પુરતસ્તુ તેષામ્ ॥ ૬૦॥

સનત્કુમાર ઉવાચ ।
ગમ્ભીરમેતદ્વચનં નિશમ્ય
તે દાનવાસ્તં પ્રણિપત્ય મૂર્ધ્ના ।
જગ્મુસ્તતો દૈત્યવરસ્ય સૂનું
ત્રૈલોક્યનાશાય કૃતપ્રતિજ્ઞમ્ ॥ ૬૧॥

બભાષિરે દૈત્યપતિં પ્રમત્તં
પ્રણમ્ય રાજાનમદીનસત્ત્વાઃ ।
તે તત્ર સર્વે જયશબ્દપૂર્વં
રુદ્રેણ યત્તત્સ્મિતપૂર્વમુક્તમ્ ॥ ૬૨॥

મન્ત્રિણ ઉચુઃ
નિશાચરશ્ચઞ્ચલશૌર્યધૈર્યઃ
ક્વ દાનવઃ કૃપણઃ સત્ત્વહીનઃ ।
ક્રૂરઃ કૃતઘ્નશ્ચ સદૈવ પાપી
ક્વ દાનવઃ સૂર્યસુતાદ્બિભેતિ ॥ ૬૩॥

રાજસ્ત્વમુક્તોઽખિલદૈત્યનાથ-
સ્તપસ્વિના તન્મુનિના વિહસ્ય ।
મત્વા સ્વબુદ્ધ્યા તૃણવત્ત્રિલોકં
મહૌજસા વીરવરેણ નૂનમ્ ॥ ૬૪॥

ક્વાહં ચ શસ્ત્રાણિ ચ દારુણાનિ

મૃત્યોશ્ચ સન્ત્રાસકરં ક્વ યુદ્ધમ્ ।
ક્વ વીરકો વાનરવક્ત્રતુલ્યો
નિશાચરો જરસા જર્જરાઙ્ગઃ ॥ ૬૫॥

ક્વાયં સ્વરૂપઃ ક્વ ચ મન્દભાગ્યો
બલં ત્વદીયં ક્વ ચ વીરુધો વા ।
શક્તોઽપિ ચેત્ત્વં પ્રયતસ્વ યુદ્ધં
કર્તું તદા હ્યેહિ કુરુષ્વ કિઞ્ચિત્ ॥ ૬૬॥

વજ્રાશનેસ્તુલ્યમિહાસ્તિ શસ્ત્રં
ભવાદૃશાં નાશકરં ચ ઘોરમ્ ।
ક્વ તે શરીરં મૃદુપદ્મતુલ્યં
વિચાર્ય ચૈવં કુરુ રોચતે યત્ ॥ ૬૭॥

ઇત્યેવમાદીનિ વચાંસિ ભદ્રં
તપસ્વિનોક્તાનિ ચ દાનવેશ ।
યુક્તં ન તે તેન સહાત્ર યુદ્ધં
ત્વામાહ રાજન્સ્મયમાન એવ ॥ ૬૮॥

વિવસ્તુશૂન્યૈર્બહુભિઃ પ્રલાપૈ-
રસ્માભિરુક્તૈર્યદિ બુધ્યસે ત્વમ્ ।
તપોભિયુક્તેન તપસ્વિના વૈ
સ્મર્તાસિ પશ્ચાન્મુનિવાક્યમેતત્ ॥ ૬૯॥

સનત્કુમાર ઉવાચ ।
તતઃ સ તેષાં વચનં નિશમ્ય
જજ્વાલ રોષેણ સ મન્દબુદ્ધિઃ ।
આજ્યાવસિક્તસ્ત્વિવ કૃષ્ણવર્ત્મા
સત્યં હિતં તત્કુટિલં સુતીક્ષ્ણમ્ ॥ ૭૦॥

ગૃહીતખડ્ગો વરદાનમત્તઃ
પ્રચણ્ડવાતાનુકૃતિં ચ કુર્વન્ ।
ગન્તું ચ તત્ર સ્મરબાણવિદ્ધઃ
સમુદ્યતોઽભૂદ્વિપરીતદૈવઃ ॥ ૭૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે અન્ધકગાણપત્યપદલાભોપાખ્યાને દૂતસંવાદો નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ ॥ ૨.૫.૪૪॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૪૫. પઞ્ચત્વારિંશોઽધ્યાયઃ । યુદ્ધપ્રારમ્ભદૂતસંવાદવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
ગતસ્તતો મત્તગજેન્દ્રગામી
પીત્વા સુરાં ઘૂર્ણિતલોચનશ્ચ ।
મહાનુભાવો બહુસૈન્યયુક્તઃ
પ્રચણ્ડવીરો વરવીરયાયી ॥ ૧॥

દદર્શ દૈત્યઃ સ્મરબાણવિદ્ધો
ગુહાં તતો વીરકરુદ્ધમાર્ગામ્ ।
સ્નિગ્ધં યથા વીક્ષ્ય પતઙ્ગસંઙ્ઘઃ
દશાપ્રદીપં ચ કૃમિર્હ્યુપેત્ય ॥ ૨॥

તથા પ્રદર્શ્યાશુ પુનઃ પુનશ્ચ
સમ્પીડ્યમાનોઽપિ સ વીરકેણ ।
બભૂવ કામાગ્નિસુદગ્ધદેહોઽ
ન્ધકો મહાદૈત્યપતિઃ સ મૂઢઃ ॥ ૩॥

પાષાણવૃક્ષાશનિતોયવહ્નિ-
ભુજઙ્ગશસ્ત્રાસ્ત્રબિભીષિકાભિઃ ।
સમ્પીડિતોઽસૌ ન પુનઃ પ્રપીડ્યઃ
પૃષ્ટશ્ચ કસ્ત્વં સમુપાગતોઽસિ ॥ ૪॥

નિશમ્ય તદ્ ગાં સ્વમતં સ તસ્મૈ
ચકાર યુદ્ધં સ તુ વીરકેણ ।
મુહૂર્તમાશ્ચર્યવદપ્રમેયં
સઙ્ખ્યે જિતો વીરતરેણ દૈત્યઃ ॥ ૫॥

તતસ્તુ સઙ્ગ્રામશિરો વિહાય
ક્ષુત્ક્ષામકણ્ઠસ્તૃષિતો ગતોઽભૂત્ ।

ચૂર્ણીકૃતે ખડ્ગવરે ચ ખિન્ને
પલાયમાનો ગતવિસ્મયઃ સઃ ॥ ૬॥

ચક્રુસ્તદાજિં સહ વીરકેણ
પ્રહ્લાદમુખ્યા દિતિજપ્રધાનાઃ ।
લજ્જાઙ્કુશાકૃષ્ટધિયો બભૂવુઃ
સુદારુણાઃ શસ્ત્રશતૈરનેકૈઃ ॥ ૭॥

વિરોચનસ્તત્ર ચકાર યુદ્ધં
બલિશ્ચ બાણશ્ચ સહસ્રબાહુઃ ।
ભજિઃ કુજમ્ભસ્ત્વથ શમ્બરશ્ચ
વૃત્રાદયશ્ચાપ્યથ વીર્યવન્તઃ ॥ ૮॥

તે યુદ્ધ્યમાના વિજિતાઃ સમન્તાદ્
દ્વિધાકૃતા વૈ ગણવીરકેણ ।
શેષે હતાનાં બહુદાનવાના-
મુક્તં જયત્યેવ હિ સિદ્ધસઙ્ઘૈઃ ॥ ૯॥

ભેરુણ્ડજાનાભિનયપ્રવૃત્તે
મેદોવસામાંસસુપૂયમધ્યે ।
ક્રવ્યાદસઙ્ઘાતસમાકુલે તુ
ભયઙ્કરે શોણિતકર્દમે તુ ॥ ૧૦॥

ભગ્નૈસ્તુ દૈત્યૈર્ભગવાન્ પિનાકી
વ્રતં મહાપાશુપતં સુઘોરમ્ ।
પ્રિયે મયા યત્કૃતપૂર્વમાસી-
દ્દાક્ષાયણીં પ્રાહ સુસાન્ત્વયિત્વા ॥ ૧૧॥

શિવ ઉવાચ ।
તસ્માદ્બલં યન્મમ તત્પ્રણષ્ટં
મર્ત્યૈરમર્ત્યસ્ય યતઃ પ્રપાતઃ ।
પુણ્યક્ષયાહી ગ્રહ એવ જાતો
દિવાનિશં દેવિ તવ પ્રસઙ્ગાત્ ॥ ૧૨॥

ઉત્પાદ્ય દિવ્યં પરમાદ્ભુતં તુ
પુનર્વરં ઘોરતરં ચ ગત્વા ।
તસ્માદ્ વ્રતં ઘોરતરં ચરામિ

સુનિર્ભયા સુન્દરિ વૈ વિશોકા ॥ ૧૩॥

સનત્કુમાર ઉવાચ ।
એતાવદુક્ત્વા વચનં મહાત્મા
ઉત્પાદ્ય ઘોષં શનકૈશ્ચકાર ।
સ તત્ર ગત્વા વ્રતમુગ્રદીપ્તો
ગતો વનં પુણ્યતમં સુઘોરમ્ ॥ ૧૪॥

ચર્તું હિ શક્યં તુ સુરાસુરૈર્ય-
ન્ન તાદૃશં વર્ષસહસ્રમાત્રમ્ ।
સા પાર્વતી મન્દરપર્વતસ્થા
પ્રતીક્ષ્યમાણાઽઽગમનં ભવસ્ય ॥ ૧૫॥

પતિવ્રતા શીલગુણોપપન્ના
એકાકિની નિત્યમથો વિભીતા ।
ગુહાન્તરે દુઃખપરા બભૂવ
સંરક્ષિતા સા સુતવીરકેણ ॥ ૧૬॥

તતઃ સ દૈત્યો વરદાનમત્તઃ
તૈર્યોધમુખ્યૈઃ સહિતો ગુહાં તામ્ ।
વિભિન્નધૈર્યઃ પુનરાજગામ
શિલીમુખૈર્માારસમુદ્ભવૈશ્ચ ॥ ૧૭॥

અત્યદ્ભુતં તત્ર ચકાર યુદ્ધં
હિત્વા તદા ભોજનપાનનિદ્રાઃ ।
રાત્રિં દિવં પઞ્ચશતાનિ પઞ્ચ
ક્રુદ્ધઃ સસૈન્યૈઃ સહ વીરકેણ ॥ ૧૮॥

ખડ્ગૈઃ સકુન્તૈઃ સહ ભિન્દિપાલૈઃ
ગદાભુશુણ્ડીભિરથો પ્રકાણ્ડૈઃ ।
શિલીમુખૈરર્દ્ધશશીભિરુગ્રૈ-
ર્વિતસ્તિભિઃ કૂર્મમુખૈર્જ્વલદ્ભિઃ ॥ ૧૯॥

નારાચમુખ્યૈર્નિશિતૈશ્ચ શૂલૈઃ
પરશ્વધૈસ્તોમરમુદ્ગરૈશ્ચ ।
ખડ્ગૈર્ગુડૈઃ પર્વતપાદપૈશ્ચ
દિવ્યૈ રથાસ્ત્રૈરપિ દૈત્યસઙ્ઘૈઃ ॥ ૨૦॥

નદીધિતિર્ભિન્નતનુઃ પપાત
દ્વારં ગુહાયાઃ પિહિતં સમસ્તમ્ ।
તૈરાયુધૈર્દૈત્યભુજપ્રયુક્તૈ-
ર્ગુહામુખે મૂર્છિત એવ પશ્ચાત્ ॥ ૨૧॥

આચ્છાદિતં વીરકમસ્ત્રજાલૈ-
ર્દૈત્યૈશ્ચ સર્વૈસ્તુ મુહૂર્તમાત્રમ્ ।
અપાવૃતં કર્તુમશક્યમાસી-
ન્નિરીક્ષ્ય દેવી દિતિજાન્ સુઘોરાન્ ॥ ૨૨॥

ભયેન સસ્માર પિતામહં તુ
દેવી સખીભિઃ સહિતા ચ વિષ્ણુમ્ ।
સૈન્યં ચ મદ્વીરવરસ્ય સર્વં
સસ્મારયામાસ ગુહાન્તરસ્થા ॥ ૨૩॥

બ્રહ્મા તયા સંસ્મૃતમાત્ર એવ
સ્ત્રીરૂપધારી ભગવાંશ્ચ વિષ્ણુઃ ।
ઇન્દ્રૈશ્ચ સર્વૈઃ સહ સૈન્યકૈશ્ચ
સ્ત્રીરૂપમાસ્થાય સમાગતાસ્તે ॥ ૨૪॥

ભૂત્વા સ્ત્રિયસ્તે વિવિશુસ્તદાનીં
મુનીન્દ્રસઙ્ઘાશ્ચ મહાનુભાવાઃ ।
સિદ્ધાશ્ચ નાગાસ્ત્વથ ગુહ્યકાશ્ચ
ગુહાન્તરં પર્વતરાજપુત્ર્યાઃ ॥ ૨૫॥

યસ્માત્સુરાજ્યાસનસંસ્થિતાના-
મન્તઃપુરે સઙ્ગમનં વિરુદ્ધમ્ ।
તતઃ સહસ્રાણિ નિતમ્બિનીના-
મનન્તસઙ્ખ્યાન્યપિ દર્શયન્ત્યઃ ॥ ૨૬॥

રૂપાણિ દિવ્યાનિ મહાદ્ભુતાનિ
ગૌર્યૈ ગુહાયાં તુ સવીરકાર્યૈઃ ।
સ્ત્રિયઃ પ્રહૃષ્ટા ગિરિરાજકન્યા
ગુહાન્તરં પર્વતરાજપુત્ર્યાઃ ॥ ૨૭॥

સ્ત્રીભિઃસહસ્રૈશ્ચ શતૈરનેકૈ-

નેંદુશ્ચ કલ્પાન્તરમેઘઘોષાઃ ।
ભેર્યશ્ચ સઙ્ગ્રામજયપ્રદાસ્તુ
ધ્માતાઃસુશઙ્ખાઃ સુનિતમ્બિનીભિઃ ॥ ૨૮॥

મૂર્છાં વિહાયાદ્ભુત ચણ્ડવીર્યઃ
સ વીરકો વૈ પુરતઃ સ્થિતસ્તુ ।
પ્રગૃહ્ય શસ્ત્રાણિ મહારથાનાં
તૈરેવ શસ્ત્રૈર્દિતિજાન્ જઘાન ॥ ૨૯॥

બ્રાહ્મી તતો દણ્ડકરા વિરુદ્ધા
ગૌરી તદા ક્રોધપરીતચેતાઃ ।
નારાયણી શઙ્ખગદાસુચક્ર-
ધનુર્દ્ધરા પૂરિતબાહુદણ્ડા ॥ ૩૦॥

વિનિર્યયૌ લાઙ્ગલદણ્ડહસ્તા
વ્યોમાલકા કાઞ્ચનતુલ્યવર્ણા ।
ધારાસહસ્રાકુલમુગ્રવેગં
બૈડૌજસી વજ્રકરા તદાનીમ્ ॥ ૩૧॥

સહસ્રનેત્રા યુધિ સુસ્થિરા ચ
સુદુર્જયા દૈત્યશતૈરધૃષ્યા ।
વૈશ્વાનરી શક્તિરસૌમ્યવક્ત્રા
યામ્યા ચ દણ્ડોદ્યતપાણિરુગ્રા ॥ ૩૨॥

સુતીક્ષ્ણખડ્ગોદ્યતપાણિરૂપા
સમાયયૌ નૈરૃતિઘોરચાપા ।
તોયાલિકા વારણપાશહસ્તા
વિનિર્ગતા યુદ્ધમભીપ્સમાના ॥ ૩૩॥

પ્રચણ્ડવાતપ્રભવા ચ દેવી
ક્ષુધાવપુસ્ત્વઙ્કુશપાણિરેવ ।
કલ્પાન્તવહ્નિપ્રતિમાં ગદાં ચ
પાણૌ ગૃહીત્વા ધનદોદ્ભવા ચ ॥ ૩૪॥

યક્ષેશ્વરી તીક્ષ્ણમુખા વિરૂપા
નખાયુધા નાગભયઙ્કરી ચ ।
એતાસ્તથાન્યાઃ શતશો હિ દેવ્યઃ

સુનિર્ગતાઃ સङ્કુલયુદ્ધભૂમિમ્ ॥ ૩૫॥

દૃષ્ટ્વા ચ તત્સૈન્યમનન્તપારં
વિવર્ણવર્ણાશ્ચ સુવિસ્મિતાશ્ચ ।
સમાકુલાઃ સઞ્ચકિતા ભયાદ્વૈ
દેવ્યો બભૂવુર્હૃદિ દીનસત્ત્વાઃ ॥ ૩૬॥

ચક્રુઃ સમાધાય મનઃ સમસ્તાઃ
તા દેવવધ્વો વિધિશક્તિમુખ્યાઃ ।
સુસમ્મતત્વેન ગિરીશપુત્ર્યાઃ
સેનાપતિર્વીરસુઘોરવીર્યઃ ॥ ૩૭॥

ચક્રુર્મહાયુદ્ધમભૂતપૂર્વં
નિધાય બુદ્ધૌ દિતિજાઃ પ્રધાનાઃ ।
નિવર્તનં મૃત્યુમથાત્મનશ્ચ
નારીભિરન્યે વરદાનસત્ત્વાઃ ॥ ૩૮॥

અત્યદ્ભુતં તત્ર ચકાર યુદ્ધં
ગૌરી તદાનીં સહિતા સખીભિઃ ।
કૃત્વા રણે ચાદ્ભુતબુદ્ધિશૌણ્ડં
સેનાપતિં વીરકઘોરવીર્યમ્ ॥ ૩૯॥

હિરણ્યનેત્રાત્મજ એવ ભૂપ-
શ્ચક્રે મહાવ્યૂહમરં સુકર્મા ।
સમ્ભાવ્ય વિષ્ણું ચ નિરીક્ષ્ય યામ્યાં
સુદારુણં તદ્વિલનામધેયમ્ ॥ ૪૦॥

મુખં કરાલં વિધિસેવયાઽસ્ય
તસ્મિન્ કૃતે ભગવાનાજગામ ।
કલ્પાન્તઘોરાર્કસહસ્રકાન્તિ-
કીર્ણઞ્ચ વૈ કુપિતઃ કૃત્તિવાસાઃ ॥ ૪૧॥

ગતે તતો વર્ષસહસ્રમાત્રે
તમાગતં પ્રેક્ષ્ય મહેશ્વરં ચ ।
ચક્રુર્મહાયુદ્ધમતીવમાત્રં
નાર્યઃ પ્રહૃષ્ટાઃ સહ વીરકેણ ॥ ૪૨॥

પ્રણમ્ય ગૌરી ગિરિશં ચ મૂર્ધ્ના
સન્દર્શયન્ ભર્તુરતીવ શૌર્યમમ્ ।
ગૌરી પ્રયુદ્ધં ચ ચકાર હૃષ્ટા
હરસ્તતઃ પર્વતરાજપુત્રીમ્ ॥ ૪૩॥

કણ્ઠે ગૃહીત્વા તુ ગુહાં પ્રવિષ્ટો
રમાસહસ્રાણિ વિસર્જિતાનિ ।
ગૌરી ચ સમ્માનશતૈઃ પ્રપૂજ્ય
ગુહામુખે વીરકમેવ સ્થાપયન્ ॥ ૪૪॥

તતો ન ગૌરીં ગિરિશં ચ દૃષ્ટ્વા-
સુરેશ્વરો નીતિવિચક્ષણો હિ ।
દ્રુતં સ્વદૂતં વિઘસાખ્યમેવ
સ પ્રેષયામાસ શિવોપકણ્ઠમ્ ॥ ૪૫॥

તૈસ્તૈઃ પ્રહારૈરપિ જર્જરાઙ્ગ-
સ્તસ્મિન્ રણે દેવગણેરિતૈર્યઃ ।
જગાદ વાક્યં તુ સગર્વમુગ્રં
પ્રવિશ્ય શમ્ભું પ્રણિપત્ય મૂર્ધ્ના ॥ ૪૬॥

દૂત ઉવાચ ।
સમ્પ્રેષિતોઽહં વિવિશે ગુહાં તુ
હ્યેષોઽન્ધકસ્ત્વાં સમુવાચ વાક્યમ્ ।
નાર્યા ન કાર્યં તવ કિઞ્ચિદસ્તિ-
વિમુઞ્ચ નારીં તરુણીં સુરૂપામ્ ॥ ૪૭॥

પ્રાયો ભવાંસ્તાપસસ્તજ્જુષસ્વ
ક્ષાન્તં મયા યત્કમનીયમન્તઃ ।
મુનિર્વિરોધવ્ય ઇતિ પ્રચિન્ત્ય
ન ત્વં મુનિસ્તાપસ કિં તુ શત્રુઃ ॥ ૪૮॥

અતીવ દૈત્યેષુ મહાવિરોધી
યુધ્યસ્વ વેગેન મયા પ્રમથ્ય ।
નયામિ પાતાલતલાનુરૂપં
યમક્ષયં તાપસ ધૂર્ત્ત હિ ત્વામ્ ॥ ૪૯॥

સનત્કુમાર ઉવાચ ।

એતદ્વચો દૂતમુખાન્નિશમ્ય
કપાલમાલી તમુવાચ કોપાત્ ।
જ્વલન્વિષાદેન મહાંસ્ત્રિનેત્રઃ
સતાં ગતિર્દુષ્ટમદપ્રહર્તા ॥ ૫૦॥

શિવ ઉવાચ ।
વ્યક્તં વચસ્તે તદતીવ ચોગ્રં
પ્રોક્તં હિ તત્ત્વં ત્વરિતં પ્રયાહિ ।
કુરુષ્વ યુદ્ધં હિ મયા પ્રસહ્ય
યદિ પ્રશક્તોઽસિ બલેન હિ ત્વમ્ ॥ ૫૧॥

યઃ સ્યાદશક્તો ભુવિ તસ્ય કોઽર્થો
દારૈર્ધનૈર્વા સુમનોહરૈશ્ચ ।
આયાન્તુ દૈત્યાશ્ચ બલેન મત્તા
વિચાર્યમેવં તુ કૃતં મયૈતત્ ॥ ૫૨॥

શરીરયાત્રાપિ કુતસ્ત્વશક્તેઃ
કુર્વન્તુ યદ્યદ્વિહિતં તુ તેષામ્ ।
મમાપિ યદ્યત્કરણીયમસ્તિ
તત્તત્કરિષ્યામિ ન સંશયોઽત્ર ॥ ૫૩॥

સનત્કુમાર ઉવાચ ।
એતદ્વચસ્તદ્વિધસોઽપિ તસ્મા-
ચ્છ્રુત્વા હરાન્નિર્ગત એવ હૃષ્ટઃ ।
પ્રાગાત્તતો ગર્જિતહુઙ્કૃતાનિ
કુર્વંસ્તતો દૈત્યપતેઃ સકાશમ્ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે યુદ્ધપ્રારમ્ભદૂતસંવાદવર્ણનં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ ॥ ૨.૫.૪૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૪૬. ષટ્ચત્વારિંશોઽધ્યાયઃ । અન્ધકવધોપાખ્યાને અન્ધકયુદ્ધવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
તસ્યેઙ્ગિતજ્ઞાશ્ચ સ દૈત્યરાજો
ગદાં ગૃહીત્વા ત્વરિતઃ સસૈન્યઃ ।
કૃત્વાથ સાઽગ્રે ગિલનામધેયં
સુદારુણં દેવવરૈરભેદ્યમ્ ॥ ૧॥

ગુહામુખં પ્રાપ્ય મહેશ્વરસ્ય
બિભેદ શસ્ત્રૈરશનિપ્રકાશૈઃ ।
અન્યે તતો વીરકમેવ શસ્ત્રૈ-
રવાકિરન્ શૈલસુતાં તથાન્યે ॥ ૨॥

દ્વારં હિ કેચિદ્રુચિરં બભઞ્જુઃ
પુષ્પાણિ પત્રાણિ વિનાશયેયુઃ ।
ફલાનિ મૂલાનિ જલં ચ હૃદ્ય-
મુદ્યાનમાર્ગાનપિ ખણ્ડયેયુઃ ॥ ૩॥

વિલોડયેયુર્મુદિતાશ્ચ કેચિ-
ચ્છૃઙ્ગાણિ શૈલસ્ય ચ ભાનુમન્તિ ।
તતો હરઃ સસ્મૃતવાન્ સ્વસૈન્યં
સમાહ્વયન્ કુપિતઃ શૂલપાણિઃ ॥ ૪॥

ભૂતાનિ ચાન્યાનિ સુદારુણાનિ
દેવાન્સસૈન્યાન્સહ વિષ્ણુમુખ્યાન્ ।
આહૂતમાત્રાનુગણાઃસસૈન્યા
રથૈર્ગજૈર્વાજિવૃષૈશ્ચ ગોભિઃ ॥ ૫॥

ઉષ્ટ્રૈઃ ખરૈઃ પક્ષિવરૈશ્ચ સિંહૈઃ
તે સર્વદેવાઃ સહભૂતસઙ્ઘૈઃ ।
વ્યાઘ્રૈર્મૃગૈઃ સૂકરસારસૈશ્ચ
સમીનમત્સ્યૈઃ શિશુમારમુખ્યૈઃ ॥ ૬॥

અન્યૈશ્ચ નાના વિધજીવસઙ્ઘૈ-
ર્વિશીર્ણદંશૈઃ સ્ફુટિતૈઃ શ્મશાનૈઃ ।
ભુજઙ્ગમૈઃ પ્રેતશતૈઃ પિશાચૈ-
ર્દિવ્યૈર્વિમાનૈઃ કમલાકરૈશ્ચ ॥ ૭॥

નદીનદૈઃ પર્વતવાહનૈશ્ચ
સમાગતાઃ પ્રાઞ્જલયઃ પ્રણમ્ય ।
કપર્દિનં તસ્થુરદીનસત્ત્વાઃ
સેનાપતિં વીરકમેવ કૃત્વા ॥ ૮॥

વિસર્જયામાસ રણાય દેવાન્
વિશ્રાન્તવાહાનથ તત્પિનાકી ।
યુદ્ધે સ્થિરં લબ્ધજયં પ્રધાનં
સમ્પ્રેષિતાસ્તે તુ મહેશ્વરેણ ॥ ૯॥

ચક્રુર્યુગાન્તપ્રતિમં ચ યુદ્ધં
મર્યાદહીનં સગિલેન સર્વે ।
દૈત્યેન્દ્રસૈન્યેન સદૈવ ઘોરં
ક્રોધાન્નિગીર્ણાસ્ત્રિદશાસ્તુ સઙ્ખ્યે ॥ ૧૦॥

તસ્મિન્ક્ષણે યુધ્યમાનાશ્ચ સર્વે
બ્રહ્મેન્દ્રવિષ્ણ્વર્કશશાઙ્કમુખ્યાઃ ।
આસન્નિગીર્ણા વિઘસેન તેન
સૈન્યે નિગીર્ણેઽસ્તિ તુ વીરકો હિ ॥ ૧૧॥

વિહાય સઙ્ગ્રામશિરોગુહાં તાં
પ્રવિશ્ય શર્વં પ્રણિપત્ય મૂર્ધ્ના ।
પ્રોવાચ દુઃખાભિહતઃ સ્મરારિં
સુવીરકો વાગ્મિવરોઽથ વૃત્તમ્ ॥ ૧૨॥

નિગીર્ણં તે સૈન્યં વિઘસદિતિજેનાદ્ય ભગવ-
ન્નિગીર્ણોઽસૌ વિષ્ણુસ્ત્રિભુવનગુરુર્દૈત્યદલનઃ ।
નિગીર્ણૌ ચન્દ્રાર્કૌ દ્રુહિણમઘવાનૌ ચ વરદૌ
નિગીર્ણાસ્તે સર્વે યમવરુણવાતાશ્ચ ધનદઃ ॥ ૧૩॥

સ્થિતોઽસ્મ્યેકઃ પ્રહ્વઃ કિમિહ કરણીયં ભવતુ મે
અજેયો દૈત્યેન્દ્રઃ પ્રમુદિતમના દૈત્યસહિતઃ ॥ ૧૪॥

અજેયં ત્વાં પ્રાપ્તઃ પ્રતિભયમના મારુતગતિઃ
સ્વયં વિષ્ણુર્દેવઃ કનકકશિપું કશ્યપસુતમ્ ।
નખૈસ્તીક્ષ્ણૈર્ભક્ત્યા તદપિ ભગવાન્ શિષ્ટવશગઃ

પ્રવૃત્તસ્ત્રૈલોક્યં વિધમતુ મલં વ્યાત્તવદનઃ ॥ ૧૫॥

વસિષ્ઠાદ્યૈઃ શપ્તો ભુવનપતિભિઃ સપ્તમુનિભિઃ
તથાભૂતે ભૂયસ્ત્વમિતિ સુચિરં દૈત્યસહિતઃ ॥ ૧૬॥

તતસ્તેનોક્તાસ્તે પ્રણયવચનૈરાત્મનિ હિતૈઃ
કદાસ્માદ્વૈ ઘોરાદ્ભવતિ મમ મોક્ષો મુનિવરાઃ ।
યતઃ ક્રુદ્ધૈરુક્તો વિઘસહરણાદ્યુદ્ધસમયે
તતો ઘોરૈર્બાણૈર્વિદલિતમુખે મુષ્ટિભિરલમ્ ॥ ૧૭॥

બદર્યાખ્યારણ્યે નનુ હરિગૃહે પુણ્યવસતૌ
નિસંસ્તભ્યાત્માનં વિગતકલુષો યાસ્યસિ પરમ્ ।
તતસ્તેષાં વાક્યાત્પ્રતિદિનમસૌ દૈત્યગિલનઃ
ક્ષુધાર્તઃ સઙ્ગ્રામાદ્ ભ્રમતિ પુનરામોદમુદિતઃ ॥ ૧૮॥

તમશ્ચેદં ઘોરં જગદુદિતયોઃ સૂર્યશશિનો-
ર્યથાશુક્રસ્તુભ્યં પરમરિપુરત્યન્તવિકરઃ ।
હતાન્દેવૈર્દૈત્યાન્પુનરમૃતવિદ્યાસ્તુતિપદૈઃ
સવીર્યાન્સન્હૃષ્ટાન્વ્રણશતવિયુક્તાન્પ્રકુરુતે ॥ ૧૯॥

વરં પ્રાણાસ્ત્યાજ્યાસ્તવ મમ તુ સઙ્ગ્રામસમયે
ભવાન્સાક્ષીભૂતઃ ક્ષણમપિ વૃતઃ કાર્યકરણે ॥ ૨૦॥

સનત્કુમાર ઉવાચ ।
ઇતીદં સત્પુત્રાત્પ્રમથપતિરાકર્ણ્ય કુપિત-
શ્ચિરં ધ્યાત્વા ચક્રે ત્રિભુવનપતિઃ પ્રાગનુપમમ્ ।
પ્રગાયત્સામાખ્યં દિનકરકરાકારવપુષા
પ્રહાસાત્તન્નામ્ના તદનુ નિહતં તેન ચ તમઃ ॥ ૨૧॥

પ્રકાશેઽસ્મિઁલ્લોકે પુનરપિ મહાયુદ્ધમકરોદ્
રણે દૈત્યૈઃ સાર્દ્ધં વિકૃતવદનૈર્વીરકમુનિઃ ।
શિલાચૂર્ણં ભુક્ત્વા પ્રવરમુનિના યસ્તુ જનિતઃ
સ કૃત્વા સણ્ગ્રામં પુરમપિ પુરા યશ્ચ જિતવાન્ ॥ ૨૨॥

મહારુદ્રઃ સદ્યઃ સ ખલુ દિતિજેનાતિગિલિતઃ
તતશ્ચાસૌ નન્દી નિશિતશરશૂલાસિસહિતઃ ।
પ્રધાનો યોધાનાં મુનિવરશતાનામપિ મહાન્

નિવાસો વિદ્યાનાં શમદમમહાધૈર્યસહિતઃ ॥ ૨૩॥

નિરીક્ષ્યૈવં પશ્ચાદ્ વૃષભવરમારુહ્ય ભગવાન્
કપર્દી યુદ્ધાર્થી વિઘસદિતિજં સમ્મુખમુખઃ ।
જપન્દિવ્યં મન્ત્રં નિગલનવિધાનોદ્ગિલનકં
સ્થિતઃ સજ્જં કૃત્વા ધનુરશનિકલ્પાનપિ શરાન્ ॥ ૨૪॥

તતૌ નિષ્ક્રાન્તોઽસૌ વિઘસવદનાદ્ધીરકમુનિ-
ર્ગૃહીત્વા તત્સર્વે સ્વબલમતુલં વિષ્ણુસહિતાઃ ।
સમુદ્ગીર્ણાઃ સર્વે કમલજબલારીન્દુદિનપાઃ
પ્રહૃષ્ટં તત્સૈન્યં પુનરપિ મહાયુદ્ધમકરોત્ ॥ ૨૫॥

જિતે તસ્મિન્ શુક્રસ્તદનુ દિતિજાન્યુદ્ધવિહતાન્
યદા વિદ્યાવીર્યાત્પુનરપિ સજીવાન્પ્રકુરુતે ।
તદા બદ્ધ્વાઽઽનીતઃ પશુરિવ ગણૈર્ભૂતપતયે
નિગીર્ણસ્તેનાસૌ ત્રિપુરરિપુણા દાનવગુરુઃ ॥ ૨૬॥

વિનષ્ટે શુક્રાખ્યે સુરરિપુનિવાસસ્તદખિલો
જિતો ધ્વસ્તો ભગ્નો ભૃશમપિ સુરૈશ્ચાપિ દલિતમ્ ।
પ્રભૂતૈર્ભૂતૌઘૈર્દિતિજકુણપગ્રાસરસિકૈઃ
સરુણ્ડૈર્નૃત્યદ્ભિર્નિશિતશરશક્ત્યુદ્ધૃતકરૈઃ ॥ ૨૭॥

પ્રમત્તૈર્વેતાલૈઃસુદૃઢકરતુણ્ડૈરપિ ખગૈ-
ર્વૃકૈર્નાનાભેદૈઃ શવકુણપપૂર્ણાસ્યકવલૈઃ ।
વિકીર્ણે સઙ્ગ્રામે કનકકશિપોર્વંશજનક
શ્ચિરં યુદ્ધં કૃત્વા હરિહરમહેન્દ્રૈશ્ચ વિજિતઃ ॥ ૨૮॥

પ્રવિષ્ટે પાતાલે ગિરિજલધિરન્ધ્રાણ્યપિ તથા
તતઃ સૈન્યે ક્ષીણે દિતિજવૃષભશ્ચાન્ધકવરઃ ।
પ્રકોપે દેવાનાં કદનદવરો વિશ્વદલનો
ગદાઘાતૈર્ઘોરૈર્વિદલિતમદશ્ચાપિ હરિણા ॥ ૨૯॥

ન વૈ યઃ સગ્રામં ત્યજતિ વરલબ્ધઃ કિલ યતઃ
તદા તાડૈર્ઘોરૈસ્ત્રિદશપતિના પીડિતતનુઃ ।
તતઃ શસ્ત્રાસ્ત્રૌઘૈસ્તરુગિરિજલૈશ્ચાશુ વિબુધાન્
જિગાયોચ્ચૈર્ગર્જન્પ્રમથપતિમાહૂય શનકૈઃ ॥ ૩૦॥

સ્થિતો યુદ્ધં કુર્વન્ રણપતિતશસ્ત્રૈર્બહુવિધૈઃ
પરિક્ષીણૈઃ સર્વૈસ્તદનુ ગિરિજારુદ્રમતુદત્ ।
તથા વૃક્ષૈઃ સર્પૈરશનિનિવહૈઃ શસ્ત્રપટલૈ-
ર્વિરૂપૈર્માયાભિઃ કપટરચનાશમ્બરશતૈઃ ॥ ૩૧॥

વિજેતું શૈલેશં કુહકમપરં તત્ર કૃતવાન્
મહાસત્ત્વો વીરસ્ત્રિપુરરિપુતુલ્યશ્ચ મતિમાન્ ।
ન વધ્યો દેવાનાં વરશતમનોન્માદવિવશઃ
પ્રભૂતૈઃ શસ્ત્રાસ્ત્રૈઃ સપદિ દિતિજો જર્જરતનુઃ ॥ ૩૨॥

તદીયાદ્વિષ્યન્દાત્ક્ષિતિતલગતૈરન્ધકગણૈ-
રતિવ્યાપ્તં ઘોરં વિકૃતવદનં સ્વાત્મસદૃશમ્ ।
દધત્કલ્પાન્તાગ્નિપ્રતિમવપુષા ભૂતપતિના
ત્રિશૂલે નોદ્ભિન્નસ્ત્રિપુરરિપુણા દારુણતરમ્ ॥ ૩૩॥

યદા સૈન્યાત્સૈન્યં પશુપતિહતાદન્યદભવદ્-
વ્રણોત્થૈરત્યુષ્ણૈઃ પિશિતનિસૃતૈર્બિન્દુભિરલમ્ ।
તદા વિષ્ણુર્યોગાત્પ્રમથપતિમાહૂય મતિમાન્
ચકારોગ્રં રૂપં વિકૃતવદનં સ્ત્રૈણમજિતમ્ ॥ ૩૪॥

કરાલં સંશુષ્કં બહુભુજલતાક્રાન્તકુપિતો
વિનિષ્ક્રાન્તઃ કર્ણાદ્રણશિરસિ શમ્ભોશ્ચ ભગવાન્ ॥ ૩૫॥

રણસ્થા સા દેવી ચરણયુગલાલઙ્કૃતમહી
સ્તુતા દેવૈઃ સર્વૈઃ તદનુ ભગવાન્ પ્રેરિતમતિઃ ।
ક્ષુધાર્તા તત્સૈન્યં દિતિજનિસૃતં તચ્ચ રુધિરં
પપૌ સાત્યુષ્ણં તદ્રણશિરસિ સૃક્કર્દમમલમ્ ॥ ૩૬॥

તતસ્ત્વેકો દૈત્યસ્તદપિ યુયુધે શુષ્કરુધિરઃ
તલાઘાતૈર્ઘોરૈરશનિસદૃશૈર્જાનુચરણૈઃ ।
નખૈર્વજ્રાકારૈર્મુખભુજશિરોભિશ્ચ ગિરિશં
સ્મરન્ ક્ષાત્રં ધર્મં સ્વકુલવિહિતં શાશ્વતમજમ્ ॥ ૩૭॥

રણે શાન્તઃ પશ્ચાત્પ્રમથપતિના ભિન્નહૃદય-
સ્ત્રિશૂલે સમ્પ્રોતો નભસિ વિધૃતઃ સ્થાણુસદૃશઃ ।
અધઃકાયઃ શુષ્કસ્તપનકિરણૈર્જીર્ણતનુમાન્
જલાસારૈર્મેઘૈઃ પવનસહિતૈઃ ક્લેદિતવપુઃ ॥ ૩૮॥

વિશીર્ણસ્તિગ્માંશોસ્તુહિનશકલાકારશકલ-
સ્તથાભૂતઃ પ્રાણાંસ્તદપિ ન જહૌ દૈત્યવૃષભઃ ।
તદા તુષ્ટઃ શમ્ભુઃ પરમકરુણાવારિધિરસૌ
દદૌ તસ્મૈ પ્રીત્યા ગણપતિપદં તેન વિનુતઃ ॥ ૩૯॥

તતો યુદ્ધસ્યાન્તે ભુવનપતયઃ સાર્થ રમણૈ-
સ્તવૈર્નાનાભેદૈઃ પ્રમથપતિમભ્યર્ચ્ય વિધિવત્ ।
હરિબ્રહ્માદ્યાસ્તે પરમનુતિભિઃ તુષ્ટુવુરલં
નતસ્કન્ધાઃ પ્રીતા જય જય ગિરં પ્રોચ્ય સુખિતાઃ ॥ ૪૦॥

હરસ્તૈસ્તૈઃ સાર્ધં ગિરિવરગુહાયાં પ્રમુદિતો
વિસૃજ્યૈકાનંશાન્ વિવિધબલિના પૂજ્યસુનગાન્ ।
ચકારાજ્ઞાં ક્રીડાં ગિરિવરસુતાં પ્રાપ્ય મુદિતાં
તથા પુત્રં ઘોરાદ્વિઘસવદનાન્મુક્તમનઘમ્ ॥ ૪૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે અન્ધકવધોપાખ્યાને અન્ધકયુદ્ધવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ॥ ૨.૫.૪૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૪૭. સપ્તચત્વારિંશોઽધ્યાયઃ । અન્ધકયુદ્ધે શુક્રનિગીર્ણનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તસ્મિન્મહતિ સઙ્ગ્રામે દારુણે લોમહર્ષણે ।
શુક્રો દૈત્યપતિર્વિદ્વાન્ ભક્ષિતસ્ત્રિપુરારિણા ॥ ૧॥

ઇતિ શ્રુતં સમાસાન્મે તત્પુનર્બ્રૂહિ વિસ્તરાત્ ।
કિં ચકાર મહાયોગી જઠરસ્થઃ પિનાકિનઃ ॥ ૨॥

ન દદાહ કથં શમ્ભોઃ શુક્રં તં જઠરાનલઃ ।
કલ્પાન્તદહનઃ કાલો દીપ્તતેજાશ્ચ ભાર્ગવઃ ॥ ૩॥

વિનિષ્ક્રાન્તઃ કથં ધીમાન્ શમ્ભોર્જઠરપઞ્જરાત્ ।

કથમારાધયામાસ કિયત્કાલં સ ભાર્ગવઃ ॥ ૪॥

કથં ચ લબ્ધવાન્વિદ્યાં તાં મૃત્યુશમનીં પરામ્ ।
કા સા વિદ્યા પરા તાત યયા મૃત્યુર્હિ વાર્યતે ॥ ૫॥

લેભેઽન્ધકો ગાણપત્યં કથં શૂલાદ્વિનિર્ગતઃ ।
દેવદેવસ્ય વૈ શમ્ભોર્મુનેર્લીલાવિહારિણઃ ॥ ૬॥

એતત્સર્વમશેષેણ મહાધીમન્ કૃપાં કુરુ ।
શિવલીલામૃતં તાત શ‍ૃણ્વતઃ કથયસ્વ મે ॥ ૭॥

બ્રહ્મોવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા વ્યાસસ્યામિતતેજસઃ ।
સનત્કુમારઃ પ્રોવાચ સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૮॥

સનત્કુમાર ઉવાચ ।
શ‍ૃણુ વ્યાસ મહાબુદ્ધે શિવલીલામૃતં પરમ્ ।
ધન્યસ્ત્વં શૈવમુખ્યોઽસિ મમાનન્દકરઃ સ્વતઃ ॥ ૯॥

પ્રવર્તમાને સમરે શઙ્કરાન્ધકયોસ્તયોઃ ।
અનિર્ભેદ્યપવિવ્યૂહગિરિવ્યૂહાધિનાથયોઃ ॥ ૧૦॥

પુરા જયો બભૂવાપિ દૈત્યાનાં બલશાલિનામ્ ।
શિવપ્રભાવાદભવત્પ્રમથાનાં મુને જયઃ ॥ ૧૧॥

તચ્છ્રુત્વાસીદ્વિષણ્ણો હિ મહાદૈત્યોઽન્ધકાસુરઃ ।
કથં સ્યાન્મે જય ઇતિ વિચારણપરોઽભવત્ ॥ ૧૨॥

અપસૃત્ય તતો યુદ્ધાદન્ધકઃ પરબુદ્ધિમાન્ ।
દ્રુતમભ્યગમદ્વીર એકલઃ શુક્રસન્નિધિમ્ ॥ ૧૩॥

પ્રણમ્ય સ્વગુરું કાવ્યમવરુહ્ય રથાચ્ચ સઃ ।
બભાષેદં વિચાર્યાથ સાઞ્જલિર્નીતિવિત્તમઃ ॥ ૧૪॥

અન્ધક ઉવાચ ।
ભગવંસ્ત્વામુપાશ્રિત્ય ગુરોર્ભાવં વહામહે ।
પરાજિતા ભવામો નો સર્વદા જયશાલિનઃ ॥ ૧૫॥

ત્વત્પ્રભાવાત્સદા દેવાન્સમસ્તાન્સાનુગાન્વયમ્ ।
મન્યામહે હરોપેન્દ્રમુખાનપિ હિ કત્તૃણાન્ ॥ ૧૬॥

અસ્મત્તો બિભ્યતિ સુરાઃ તદા ભવદનુગ્રહાત્ ।
ગજા ઇવ હરિભ્યશ્ચ તાર્ક્ષ્યેભ્ય ઇવ પન્નગાઃ ॥ ૧૭॥

અનિર્ભેદ્યં પવિવ્યૂહં વિવિશુર્દૈત્યદાનવાઃ ।
પ્રમથાનીકમખિલં વિધૂય ત્વદનુગ્રહાત્ ॥ ૧૮॥

વયં ત્વચ્છરણા ભૂત્વા સદા ગા ઇવ નિશ્ચલાઃ ।
સ્થિત્વા ચરામો નિઃશઙ્કમાજાવપિ હિ ભાર્ગવ ॥ ૧૯॥

રક્ષરક્ષાભિતો વિપ્ર પ્રવ્રજ્ય શરણાગતાન્ ।
અસુરાન્ શત્રુભિર્વીરૈરર્દિતાંશ્ચ મૃતાનપિ ॥ ૨૦॥

પ્રથમૈર્ભીમવિક્રાન્તૈઃ ક્રાન્તાન્મૃત્યુપ્રમાથિભિઃ ।
સૂદિતાન્પતિતાન્પશ્ય હુણ્ડાદીન્મદ્ગણાન્વરાન્ ॥ ૨૧॥

યઃ પીત્વા કણધૂમં વૈ સહસ્રં શરદાં પુરા ।
ત્વયા પ્રાપ્તા વરા વિદ્યા તસ્યાઃ કાલોઽયમાગતઃ ॥ ૨૨॥

અદ્ય વિદ્યાફલં તત્તે સર્વે પશ્યન્તુ ભાર્ગવ ।
પ્રમથા અસુરાન્સર્વાન્ કૃપયા જીવયિષ્યતઃ ॥ ૨૩॥

સનત્કુમાર ઉવાચ ।
ઇત્થમન્ધકવાક્યં સ શ્રુત્વા ધીરો હિ ભાર્ગવઃ ।
તદા વિચારયામાસ દૂયમાનેન ચેતસા ॥ ૨૪॥

કિં કર્તવ્યં મયાદ્યાપિ ક્ષેમં મે સ્યાત્કથં ત્વિતિ ।
સન્નિપાતવિધિર્જીવઃ સર્વથાનુચિતો મમ ॥ ૨૫॥

વિદ્યેયં શઙ્કરાત્પ્રાપ્તા તદ્ગુણાન્ પ્રતિ યોજયે ।
તદ્રણે મર્દિતાન્વીરૈઃ પ્રમથૈઃ શઙ્કરાનુગૈઃ ॥ ૨૬॥

શરણાગતધર્મોઽથ પ્રવરઃ સર્વતો હૃદા ।
વિચાર્ય શુક્રેણ ધિયા તદ્વાણી સ્વીકૃતા તદા ॥ ૨૭॥

કિઞ્ચિત્સ્મિતં તદા કૃત્વા સોઽબ્રવીદ્દાનવાધિપમ્ ।
ભાર્ગવઃ શિવપાદાબ્જં સ્મૃત્વા સ્વસ્થેન ચેતસા ॥ ૨૮॥

શુક્ર ઉવાચ ।
યત્ત્વયા ભાષિતં તાત તત્સર્વં તથ્યમેવ હિ ।
એતદ્વિદ્યોપાર્જનં હિ દાનવાર્થં કૃતં મયા ॥ ૨૯॥

દુઃસહં કણધૂમં વૈ પીત્વા વર્ષસહસ્રકમ્ ।
વિદ્યેયમીશ્વરાત્પ્રાપ્તા બન્ધૂનાં સુખદા સદા ॥ ૩૦॥

પ્રમથૈર્મથિતાન્દૈત્યાન્ રણેઽહં વિદ્યયાનયા ।
ઉત્થાપયિષ્યે મ્લાનાનિ શસ્યાનિ જલભુગ્યથા ॥ ૩૧॥

નિર્વ્રણાન્નીરુજઃ સ્વસ્થાન્ સુપ્ત્વેવ પુનરુત્થિતાન્ ।
મુહૂર્તેઽસ્મિંશ્ચ દ્રષ્ટાસિ દૈત્યાંસ્તાનુત્થિતાન્નિજાન્ ॥ ૩૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા સોઽધકં શુક્રો વિદ્યામાવર્તયત્કવિઃ ।
એકૈકં દૈત્યમુદ્દિશ્ય સ્મૃત્વા વિદ્યેશમાદરાત્ ॥ ૩૩॥

વિદ્યાવર્તનમાત્રેણ તે સર્વે દૈત્યદાનવાઃ ।
ઉત્તસ્થુર્યુગપદ્વીરાઃ સુપ્તા ઇવ ધૃતાયુધાઃ ॥ ૩૪॥

સદાભ્યસ્તા યથા વેદાઃ સમયે વા યથામ્બુદાઃ ।
શ્રદ્ધયાર્થાસ્તથા દત્તા બ્રાહ્મણેભ્યો યથાપદિ ॥ ૩૫॥

ઉજ્જીવિતાંસ્તુ તાન્દૃષ્ટ્વા હુણ્ડાદીંશ્ચ મહાસુરાન્ ।
વિનેદુરસુરાઃ સર્વે જલપૂર્ણા ઇવામ્બુદાઃ ॥ ૩૬॥

રણોદ્યતાઃ પુનશ્ચાસન્ગર્જન્તો વિકટાન્ રવાન્ ।
પ્રમથૈઃ સહ નિર્ભીતા મહાબલપરાક્રમાઃ ॥ ૩૭॥

શુક્રેણોજ્જીવિતાન્દૃષ્ટ્વા પ્રમથા દૈત્યદાનવાન્ ।
વિસિષ્મિરે તતઃ સર્વે નન્દ્યાદ્યા યુદ્ધદુર્મદાઃ ॥ ૩૮॥

વિજ્ઞાપ્યમેવં કર્મૈતદ્દેવેશે શઙ્કરેઽખિલમ્ ।
વિચાર્ય બુદ્ધિમન્તશ્ચ હ્યેવં તેઽન્યોન્યમબ્રુવન્ ॥ ૩૯॥

આશ્ચર્યરૂપે પ્રમથેશ્વરાણાં
તસ્મિંસ્તથા વર્તતિ યુદ્ધયજ્ઞે ।
અમર્ષિતો ભાર્ગવકર્મ દૃષ્ટ્વા
શિલાદપુત્રોઽભ્યગમન્મહેશમ્ ॥ ૪૦॥

જયેતિ ચોક્ત્વા જયયોનિમુગ્ર-
મુવાચ નન્દી કનકાવદાતમ્ ।
ગણેશ્વરાણાં રણકર્મ દેવ

દેવૈશ્ચ સેન્દ્રૈરપિ દુષ્કરં યત્ ॥ ૪૧॥

તદ્ભાર્ગવેણાદ્ય કૃતં વૃથા નઃ
સઞ્જીવિતાંસ્તાન્હિ મૃતાન્વિપક્ષાન્ ।
આવર્ત્ય વિદ્યાં મૃતજીવદાત્રી-
મેકૈકમુદ્દિશ્ય સહેલમીશ ॥ ૪૨॥

તુહુણ્ડહુણ્ડાદિકકુમ્ભજમ્ભ-
વિપાકપાકાદિમહાસુરેન્દ્રાઃ ।
યમાલયાદદ્ય પુનર્નિવૃત્તા
વિદ્રાવયન્તઃ પ્રમથાંશ્ચરન્તિ ॥ ૪૩॥

યદિ હ્યસૌ દૈત્યવરાન્નિરસ્તાન્
સઞ્જીવયેદત્ર પુનઃ પુનસ્તાન્ ।
જયઃ કુતો નો ભવિતા મહેશ
ગણેશ્વરાણાં કુત એવ શાન્તિઃ ॥ ૪૪॥

સનત્કુમાર ઉવાચ ।
ઇત્યેવમુક્તઃ પ્રમથેશ્વરેણ
સ નન્દિના વૈ પ્રમથેશ્વરેશઃ ।
ઉવાચ દેવઃ પ્રહસંસ્તદાનીં
તં નન્દિનં સર્વગણેશરાજમ્ ॥ ૪૫॥

શિવ ઉવાચ ।
નન્દિન્પ્રયાહિ ત્વરિતોઽતિ માત્રં
દ્વિજેન્દ્રવર્યં દિતિનન્દનાનામ્ ।
મધ્યાત્સમુદ્ધૃત્ય તથાનયાશુ
શ્યેનો યથા લાવકમણ્ડજાતમ્ ॥ ૪૬॥

સનત્કુમાર ઉવાચ ।
સ એવમુક્તો વૃષભધ્વજેન
નનાદ નન્દી વૃષસિંહનાદઃ ।
જગામ તૂર્ણં ચ વિગાહ્ય સેનાં
યત્રાભવદ્ભાર્ગવવંશદીપઃ ॥ ૪૭॥

તં રક્ષ્યમાણં દિતિજૈઃ સમસ્તૈઃ
પાશાસિવૃક્ષોપલશૈલહસ્તૈઃ ।

વિક્ષોભ્ય દૈત્યાન્ બલવાન્ જહાર
કાવ્યં સ નન્દી શરભો યથેભમ્ ॥ ૪૮॥

સ્રસ્તામ્બરં વિચ્યુતભૂષણં ચ
વિમુક્તકેશં બલિના ગૃહીતમ્ ।
વિમોચયિષ્યન્ત ઇવાનુજગ્મુઃ
સુરારયસ્સિંહરવાંસ્ત્યજન્તઃ ॥ ૪૯॥

દમ્ભોલિશૂલાસિપરશ્વધાના-
મુદ્દણ્ડચક્રોપલકમ્પનાનામ્ ।
નન્દીશ્વરસ્યોપરિ દાનવેન્દ્રા
વર્ષં વવર્ષુર્જલદા ઇવોગ્રમ્ ॥ ૫૦॥

તં ભાર્ગવં પ્રાપ્ય ગણાધિરાજો
મુખાગ્નિના શસ્ત્રશતાનિ દગ્ધ્વા ।
આયાત્પ્રવૃદ્ધેઽસુરદેવયુદ્ધે
ભવસ્ય પાર્શ્વે વ્યથિતારિપક્ષઃ ॥ ૫૧॥

અયં સ શુક્રો ભગવન્નિતીદં
નિવેદયામાસ ભવાય શીઘ્રમ્ ।
જગ્રાહ શુક્રં સ ચ દેવદેવો
યથોપહારં શુચિના પ્રદત્તમ્ ॥ ૫૨॥

ન કિઞ્ચિદુક્ત્વા સ હિ ભૂતગોપ્તા
ચિક્ષેપ વક્ત્રે ફલવત્કવીન્દ્રમ્ ।
હાહારવસ્તૈરસુરૈઃસમસ્તૈ-
રુચ્ચૈર્વિમુક્તો હહહેતિ ભૂરિ ॥ ૫૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે અન્ધકયુદ્ધે શુક્રનિગીર્ણનવર્ણનં નામ સપ્તચત્વારિંશોઽધ્યાયઃ ॥ ૨.૫.૪૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૪૮. અષ્ટચત્વારિંશોઽધ્યાયઃ । શુક્રનિગીર્ણનમ્ ।

વ્યાસ ઉવાચ ।
શુક્રે નિગીર્ણે રુદ્રેણ કિમકાર્ષુશ્ચ દાનવાઃ ।
અન્ધકેશા મહાવીરા વદ તત્ત્વં મહામુને ॥ ૧॥

સનત્કુમાર ઉવાચ ।
કાવ્યે નિગીર્ણે ગિરિજેશ્વરેણ
દૈત્યા જયાશારહિતા બભૂવુઃ ।
હસ્તૈર્વિમુક્તા ઇવ વારણેન્દ્રાઃ
શત્રૃઙ્ગૈર્વિહીના ઇવ ગોવૃષાશ્ચ ॥ ૨॥

શિરો વિહીના ઇવ દેહસઙ્ઘા
દ્વિજા યથા ચાધ્યયનેન હીનાઃ ।
નિરુદ્યમાઃ સત્ત્વગણા યથા વૈ
યથોદ્યમા ભાગ્યવિવર્જિતાશ્ચ ॥ ૩॥

પત્યા વિહીનાશ્ચ યથૈવ યોષા
યથા વિપક્ષાઃ ખલુ પક્ષિણૌઘાઃ ।
આયૂંષિ હીનાનિ યથૈવ પુણ્યૈ-
ર્વ્રતૈર્વિહીનાનિ યથા શ્રુતાનિ ॥ ૪॥

વિના યથા વૈભવશક્તિમેકાં
ભવન્તિ હીનાઃસ્વફલૈઃ ક્રિયૌઘાઃ ।
યથા વિશૂરાઃ ખલુ ક્ષત્રિયાશ્ચ
સત્યં વિના ધર્મગણો યથૈવ ॥ ૯॥

નન્દિના ચ હૃતે શુક્રે ગિલિતે ચ વિષાદિના ।
વિષાદમગમન્દૈત્યા યતમાનરણોત્સવાઃ ॥ ૬॥

તાન્ વીક્ષ્ય વિગતોત્સાહાનન્ધકઃ પ્રત્યભાષત ।
દૈત્યાંસ્તુ હુણ્ડહુણ્ડાદીન્મહાધીરપરાક્રમઃ ॥ ૭॥

અન્ધક ઉવાચ ।
કવિં વિક્રમ્ય નયતા નન્દિના વઞ્ચિતા વયમ્ ।
તનૂર્વિના કૃતાઃ પ્રાણાઃ સર્વેષામદ્ય નો નનુ ॥ ૮॥

ધૈર્યં વીર્યં ગતિઃ કીર્તિઃ સત્ત્વં તેજઃ પરાક્રમઃ ।

યુગપન્નો હૃતં સર્વમેકસ્મિન્ ભાર્ગવે હૃતે ॥ ૯॥

ધિગસ્માન્ કુલપૂજ્યો યૈરેકોઽપિ કુલસત્તમઃ ।
ગુરુઃ સર્વસમર્થશ્ચ ત્રાતા ત્રાતો ન ચાપદિ ॥ ૧૦॥

તદ્યૂયમવિલમ્બ્યેહ યુધ્યધ્વમરિભિઃ સહ ।
વીરૈસ્તૈઃ પ્રમથૈર્વીરાઃ સ્મૃત્વા ગુરુપદામ્બુજમ્ ॥ ૧૧॥

ગુરોઃ કાવ્યસ્ય સુખદૌ સ્મૃત્વા ચરણપઙ્કજૌ ।
સૂદયિષ્યામ્યહં સર્વાન્ પ્રમથાન્ સહ નન્દિના ॥ ૧૨॥

અથૈતાન્ વિવશાન્ હત્વા સહદેવૈઃ સવાસવૈઃ ।
ભાર્ગવં મોચયિષ્યામિ જીવં યોગીવ કર્મતઃ ॥ ૧૩॥

સ ચાપિ યોગી યોગેન યદિ નામ સ્વયં પ્રભુઃ ।
શરીરાત્તસ્ય નિર્ગચ્છેદસ્માકં શેષપાલકઃ ॥ ૧૪॥

સનત્કુમાર ઉવાચ ।
ઇત્યન્ધકવચઃ શ્રુત્વા દાનવા મેઘનિસ્સ્વનાઃ ।
પ્રમથાન્ નિર્દયાઃ પ્રાહુર્મર્તવ્યે કૃતનિશ્ચયાઃ ॥ ૧૫॥

સત્યાયુષિ ન નો જાતુ શક્તાઃ સ્યુઃ પ્રમથા બલાત્ ।
અસત્યાયુષિ કિં ગત્વા ત્યક્ત્વા સ્વામિનમાહવે ॥ ૧૬॥

યે સ્વામિનં વિહાયાતો બહુમાનધના જનાઃ ।
યાન્તિ તે યાન્તિ નિયતમન્ધતામિસ્રમાલયમ્ ॥ ૧૭॥

અયશસ્તમસા ખ્યાતિં મલિનીકૃત્ય ભૂરિશઃ ।
ઇહામુત્રાપિ સુખિનો ન સ્યુર્ભગ્ના રણાજિરે ॥ ૧૮॥

કિં દાનૈઃ કિં તપોભિશ્ચ કિં તીર્થપરિમજ્જનૈઃ ।
ધરાતીર્થે યદિ સ્નાનં પુનર્ભવમલાપહે ॥ ૧૯॥

સમ્પ્રધાર્યેતિ તદ્વાક્યં દૈત્યાસ્તે દનુજાસ્તથા ।
મમન્થુઃ પ્રમથાનાજૌ રણભેરીં નિનાદ્ય ચ ॥ ૨૦॥

તત્ર બાણાસિવજ્રૌઘૈઃ કઠિનૈશ્ચ શિલામયૈઃ ।
ભુશુણ્ડિભિન્દિપાલૈશ્ચ શક્તિ ભલ્લપરશ્વધૈઃ ॥ ૨૧॥

ખટ્વાઙ્ગૈઃ પટ્ટિશૈઃ શૂલૈર્લકુટૈર્મુસલૈરલમ્ ।
પરસ્પરમભિઘ્નન્તઃ પ્રચક્રુઃ કદનં મહત્ ॥ ૨૨॥

કાર્મુકાણાં વિકૃષ્ટાનાં પતતાં ચ પતત્રિણામ્ ।
ભિન્દિપાલભુશુણ્ડીનાં ક્ષ્વેડિતાનાં રવોઽભવત્ ॥ ૨૩॥

રણતૂર્યનિનાદૈશ્ચ ગજાનાં બહુબૃંહિતૈઃ ।
હ્રેષારવૈર્હયાનાંશ્ચ મહાન્કોલાહલોઽભવત્ ॥ ૨૪॥

અતિસ્વનૈરવાપૂરિ દ્યાવાભૂમ્યોર્યદન્તરમ્ ।
અભીરૂણાં ચ ભીરૂણાં મહારોમોદ્ગમોઽભવત્ ॥ ૨૫॥

ગજવાજિમહારાવસ્ફુટશબ્દગ્રહાણિ ચ ।
ભગ્નધ્વજપતાકાનિ ક્ષીણપ્રહરણાનિ ચ ॥ ૨૬॥

રુધિરોદ્ગારચિત્રાણિ વ્યશ્વહસ્તિરથાનિ ચ ।
પિપાસિતાનિ સૈન્યાનિ મુમૂર્છુરુભયત્ર વૈ ॥ ૨૭॥

અથ તે પ્રમથા વીરા નન્દિપ્રભૃતયસ્તદા ।
બલેન જઘ્નુરસુરાન્સર્વાન્પ્રાપુર્જયં મુને ॥ ૨૮॥

દૃષ્ટ્વા સૈન્યં ચ પ્રમથૈર્ભજ્યમાનમિતસ્તતઃ ।
દુદ્રાવ રથમાસ્થાય સ્વયમેવાન્ધકો ગણાન્ ॥ ૨૯॥

શરાસારપ્રયુક્તૈસ્તૈર્વજ્રપાતૈર્નગા ઇવ ।
પ્રમથા નેશિરે ચાસ્ત્રૈર્નિસ્તોયા ઇવ તોયદાઃ ॥ ૩૦॥

યાન્તમાયાન્તમાલોક્ય દૂરસ્થં નિકટસ્થિતમ્ ।
પ્રત્યેકં રોમસઙ્ખ્યાભિર્વિવ્યાધેષુભિરન્ધકઃ ॥ ૩૧॥

દૃષ્ટ્વા સૈન્યં ભજ્યમાનમન્ધકેન બલીયસા ।
સ્કન્દો વિનાયકો નન્દી સોમનન્ધ્યાદયઃ પરે ॥ ૩૨॥

પ્રમથા પ્રબલા વીરાઃ શઙ્કરસ્ય ગણા નિજાઃ ।
ચુક્રુધુઃ સમરં ચક્રુર્વિચિત્રં ચ મહાબલાઃ ॥ ૩૩॥

વિનાયકેન સ્કન્દેન નન્દિના સોમનન્દિના ।
વીરેણ નૈગમેયેન વૈશાખેન બલીયસા ॥ ૩૪॥

ઇત્યાદ્યૈસ્તુ ગણૈરુગ્રૈરન્ધકોઽપ્યન્ધકીકૃતઃ ।
ત્રિશૂલશક્તિબાણૌઘધારાસમ્પાતપાતિભિઃ ॥ ૩૫॥

તતઃ કોલાહલો જાતઃ પ્રમથાસુરસૈન્યયોઃ ।

તેન શબ્દેન મહતા શુક્રઃ શમ્ભૂદરે સ્થિતઃ ॥ ૩૬॥

છિદ્રાન્વેષી ભ્રમન્સોઽથ વિનિકેતો યથાનિલઃ ।
સપ્તલોકાન્સપાતાલાન્ રુદ્રદેહે વ્યલોકયત્ ॥ ૩૭॥

બ્રહ્મનારાયણેન્દ્રાણાં સાદિત્યાપ્સરસાં તથા ।
ભુવનાનિ વિચિત્રાણિ યુદ્ધં ચ પ્રમથાસુરમ્ ॥ ૩૮॥

સ વર્ષાણાં શતં કુક્ષૌ ભવસ્ય પરિતો ભ્રમન્ ।
ન તસ્ય દદૃશે રન્ધ્રં શુચે રન્ધ્રં ખલો યથા ॥ ૩૯॥

શામ્ભવેનાથ યોગેન શુક્રરૂપેણ ભાર્ગવઃ ।
ઇમં મન્ત્રવરં જપ્ત્વા શમ્ભોર્જઠરપઞ્જરાત્ ॥ ૪૦॥

નિષ્ક્રાન્તો લિઙ્ગમાર્ગેણ પ્રણનામ તતઃ શિવમ્ ।
ગૌર્ય્યા ગૃહીતઃ પુત્રાર્થં તદવિઘ્નેશ્વરીકૃતઃ ॥ ૪૧॥

અથ કાવ્યં વિનિષ્ક્રાન્તં શુક્રમાર્ગેણ ભાર્ગવમ્ ।
દૃષ્ટ્વોવાચ મહેશાનો વિહસ્ય કરુણાનિધિઃ ॥ ૪૨॥

મહેશ્વર ઉવાચ ।
શુક્રવન્નિઃસૃતો યસ્માલ્લિઙ્ગાન્મે ભૃગુનન્દન ।
કર્મણા તેન શુક્રસ્ત્વં મમ પુત્રોઽસિ ગમ્યતામ્ ॥ ૪૩॥

સનત્કુમાર ઉવાચ ।
ઇત્યેવમુક્તો દેવેન શુક્રોઽર્કસદૃશદ્યુતિઃ ।
પ્રણનામ શિવં ભૂયસ્તુષ્ટાવ વિહિતાઞ્જલિઃ ॥ ૪૪॥

શુક્ર ઉવાચ ।
અનન્તપાદસ્ત્વમનન્તમૂર્તિ-
રનન્તમૂર્દ્ધાન્તકરઃ શિવશ્ચ ।
અનન્તબાહુઃ કથમીદૃશં ત્વાં
સ્તોષ્યે હ નુત્યં પ્રણિપત્ય મૂર્ધ્ના ॥ ૪૫॥

ત્વમષ્ટમૂર્તિસ્ત્વમનન્તમૂર્તિ-
સ્ત્વમિષ્ટદઃ સર્વસુરાસુરાણામ્ ।
અનિષ્ટદૃષ્ટેશ્ચ વિમર્દકશ્ચ
સ્તોષ્યે હ નુત્યં કથમીદૃશં ત્વામ્ ॥ ૪૬॥

સનત્કુમાર ઉવાચ ।
ઇતિ સ્તુત્વા શિવં શુક્રઃ પુનર્નત્વા શિવાજ્ઞયા ।
વિવેશ દાનવાનીકં મેઘમાલાં યથા શશી ॥ ૪૭॥

નિગીર્ણનમિતિ પ્રોક્તં શઙ્કરેણ કવે રણે ।
શૃણુ મન્ત્રં ચ તં જપ્તો યઃ શમ્ભોઃ કવિનોદરે ॥ ૪૮॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે શુક્રનિગીર્ણનં નામાષ્ટચત્વારિંશોઽધ્યાયઃ ॥ ૨.૫.૪૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૪૯. એકોનપઞ્ચાશત્તમોઽધ્યાયઃ । અન્ધકગણ જીવિતપ્રાપ્તિવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
ૐ નમસ્તે દેવેશાય સુરાસુરનમસ્કૃતાય ભૂતભવ્યમહાદેવાય
હરિતપિઙ્ગલલોચનાય બલાય બુદ્ધિરૂપિણે વૈયાઘ્રવસનચ્છદાયારણેયાય
ત્રૈલોક્યપ્રભવે ઈશ્વરાય હરાય હરિનેત્રાય યુગાન્તકરણાયાનલાય
ગણેશાય લોકપાલાય મહાભુજાય મહાહસ્તાય શૂલિને મહાદંષ્ટ્રિણે
કાલાય મહેશ્વરાય અવ્યયાય કાલરૂપિણે નીલગ્રીવાય મહોદરાય
ગણાધ્યક્ષાય સર્વાત્મને સર્વભાવનાય સર્વગાય મૃત્યુહન્ત્રે પારિયાત્રસુવ્રતાય
બ્રહ્મચારિણે વેદાન્તગાય તપોન્તગાય પશુપતયે વ્યઙ્ગાય શૂલપાણયે
વૃષકેતવે હરયે જટિને શિખણ્ડિને લકુટિને મહાયશસે ભૂતેશ્વરાય
ગુહાવાસિને વીણાપણવતાલવતે અમરાય દર્શનીયાય
બાલસૂર્ય-નિભાય શ્મશાનવાસિને ભગવતે ઉમાપતયે અરિન્દમાય
ભગસ્યાક્ષિપાતિને પૂષ્ણોર્દશનનાશનાય ક્રુરકર્તકાય પાશહસ્તાય
પ્રલયકાલાય ઉલ્કામુખાયાગ્નિકેતવે મુનયે દીપ્તાય વિશામ્પતયે ઉન્નયતે
જનકાય ચતુર્થકાય લોકસત્તમાય વામદેવાય વાગ્દાક્ષિણ્યાય વામતો
ભિક્ષવે ભિક્ષુરૂપિણે જટિને સ્વયં જટિલાય શક્રહસ્તપ્રતિસ્તમ્ભકાય
વસૂનાં સ્તમ્ભકાય ક્રતવે ક્રતુકરાય કાલાય મેધાવિને મધુકરાય ચલાય
વાનસ્પત્યાય વાજસનેતિ સમાશ્રમપૂજિતાય જગદ્ધાત્રે જગત્કર્ત્રે

પુરુષાય શાશ્વતાય ધ્રુવાય ધર્માધ્યક્ષાય ત્રિવર્ત્મને ભૂતભાવનાય
ત્રિનેત્રાય બહુરૂપાય સૂર્યાયુતસમપ્રભાય દેવાય સર્વતૂર્યનિનાદિને
સર્વબાધાવિમોચનાય બન્ધનાય સર્વધારિણે ધર્મોત્તમાય
પુષ્પદન્તાયાવિભાગાય મુખાય સર્વહરાય હિરણ્યશ્રવસે દ્વારિણે
ભીમાય ભીમપરાક્રમાય ૐ નમો નમઃ ॥
ઇમં મન્ત્રવરં જપ્ત્વા શુક્રો જઠરપઞ્જરાત્ ।
નિષ્ક્રાન્તો લિઙ્ગમાર્ગેણ શમ્ભોઃ શુક્રમિવોત્કટમ્ ॥ ૧॥

ગૌર્યા ગૃહીતઃ પુત્રાર્થં વિશ્વેશેન તતઃ કૃતઃ ।
અજરશ્ચામરઃ શ્રીમાન્દ્વિતીય ઇવ શઙ્કરઃ ॥ ૨॥

ત્રિભિર્વર્ષસહસ્રૈસ્તુ સમતીતૈર્મહીતલે ।
મહેશ્વરાત્પુનર્જાતઃ શુક્રો વેદનિધિર્મુનિઃ ॥ ૩॥

દદર્શ શૂલે સંશુષ્કં ધ્યાયન્તં પરમેશ્વરમ્ ।
અન્ધકં ધૈર્યસમ્પન્નં દાનવેશં તપસ્વિનમ્ ॥ ૪॥

મહાદેવં વિરૂપાક્ષં ચન્દ્રાર્દ્ધકૃતશેખરમ્ ।
અમૃતં શાશ્વતં સ્થાણું નીલકણ્ઠં પિનાકિનમ્ ॥ ૫॥

વૃષભાક્ષં મહાજ્ઞેયં પુરુષં સર્વકામદમ્ ।
કામારિં કામદહનં કામરૂપં કપર્દિનમ્ ॥ ૬॥

વિરૂપં ગિરિશં ભીમં સ્રગ્વિણં રક્તવાસસમ્ ।
યોગિનં કાલદહનં ત્રિપુરઘ્નં કપાલિનમ્ ॥ ૭॥

ગૂઢવ્રતં ગુપ્તમન્ત્રં ગમ્ભીરં ભાવગોચરમ્ ।
અણિમાદિગુણાધારં ત્રિલોકૈશ્વર્યદાયકમ્ ॥ ૮॥

વીરં વીરહણં ઘોરં વિરૂપં માંસલં પટુમ્ ।
મહામાંસાદમુન્મત્તં ભૈરવં વૈ મહેશ્વરમ્ ॥ ૯॥

ત્રૈલોક્યદ્રાવણં લુબ્ધં લુબ્ધકં યજ્ઞસૂદનમ્ ।
કૃત્તિકાનાં સુતૈર્યુક્તમુન્મત્તં કૃત્તિવાસસમ્ ॥ ૧૦॥

ગજકૃત્તિપરીધાનં ક્ષુબ્ધં ભુજગભૂષણમ્ ।
દત્તાલમ્બં ચ વેતાલં ઘોરં શાકિનિપૂજિતમ્ ॥ ૧૧॥

અઘોરં ઘોરદૈત્યઘ્નં ઘોરઘોષં વનસ્પતિમ્ ।

ભસ્માઙ્ગં જટિલં શુદ્ધં ભેરુણ્ડશતસેવિતમ્ ॥ ૧૨॥

ભૂતેશ્વરં ભૂતનાથં પઞ્ચભૂતાશ્રિતં ખગમ્ ।
ક્રોધિતં નિષ્ઠુરં ચણ્ડં ચણ્ડીશં ચણ્ડિકાપ્રિયમ્ ॥ ૧૩॥

ચણ્ડં તુઙ્ગં ગરુત્મન્તં નિત્યમાસવભોજનમ્ ।
લેલિહાનં મહારૌદ્રં મૃત્યું મૃત્યોરગોચરમ્ ॥ ૧૪॥

મૃત્યોર્મૃત્યું મહાસેનં શ્મશાનારણ્યવાસિનમ્ ।
રાગં વિરાગં રાગાન્ધં વીતરાગશતાર્ચિતમ્ ॥ ૧૫॥

સત્ત્વં રજસ્તમોધર્મમધર્મં વાસવાનુજમ્ ।
સત્યં ત્વસત્યં સદ્રૂપમસદ્રૂપમહેતુકમ્ ॥ ૧૬॥

અર્દ્ધનારીશ્વરં ભાનું ભાનુકોટિશતપ્રભમ્ ।
યજ્ઞં યજ્ઞપતિં રુદ્રમીશાનં વરદં શિવમ્ ॥ ૧૭॥

અષ્ટોત્તરશતં હ્યેતન્મૂર્તીનાં પરમાત્મનઃ ।
શિવસ્ય દાનવો ધ્યાયન્ મુક્તસ્તસ્માન્મહાભયાત્ ॥ ૧૮॥

દિવ્યેનામૃતવર્ષેણ સોઽભિષિક્તઃ કપર્દિના ।
તુષ્ટેન મોચિતં તસ્માચ્છૂલાગ્રાદવરોપિતઃ ॥ ૧૯॥

ઉક્તશ્ચાથ મહાદૈત્યો મહેશાનેન સોઽન્ધકઃ ।
અસુરઃ સાન્ત્વપૂર્વં યત્કૃતં સર્વં મહાત્મના ॥ ૨૦॥

ઈશ્વર ઉવાચ ।
ભો ભો દૈત્યેન્દ્ર તુષ્ટોઽસ્મિ યમેન નિયમેન ચ ।
શૌર્યેણ તવ ધૈર્યેણ વરં વરય સુવ્રત ॥ ૨૧॥

આરાધિતસ્ત્વયા નિત્યં સર્વનિર્ધૂતકલ્મષઃ ।
વરદોઽહં વરાર્હસ્ત્વં મહાદૈત્યેન્દ્રસત્તમ ॥ ૨૨॥

પ્રાણસન્ધારણાદસ્તિ યચ્ચ પુણ્યફલં તવ ।
ત્રિભિર્વર્ષસહસ્રૈસ્તુ તેનાસ્તુ તવ નિર્વૃતિઃ ॥ ૨૩॥

સનત્કુમાર ઉવાચ ।
એતચ્છ્રુત્વાન્ધકઃ પ્રાહ વેપમાનઃ કૃતાઞ્જલિઃ ।
ભૂમૌ જાનુદ્વયં કૃત્વા ભગવન્તમુમાપતિમ્ ॥ ૨૪॥

અન્ધક ઉવાચ ।

ભગવન્યન્મયોક્તોઽસિ દીનો હીનઃ પરાત્પરઃ ।
હર્ષગદ્ગદયા વાચા મયા પૂર્વં રણાજિરે ॥ ૨૫॥

યદ્યત્કૃતં વિમૂઢત્વાત્કર્મ લોકેષુ ગર્હિતમ્ ।
અજાનતા ત્વાં તત્સર્વં પ્રભો મનસિ મા કૃથાઃ ॥ ૨૬॥

પાર્વત્યામપિ દુષ્ટં યત્કામદોષાત્કૃતં મયા ।
ક્ષમ્યતાં મે મહાદેવ કૃપણો દુઃખિતો ભૃશમ્ ॥ ૨૭॥

દુઃખિતસ્ય દયા કાર્યા કૃપણસ્ય વિશેષતઃ ।
દીનસ્ય ભક્તિયુક્તસ્ય ભવતા નિત્યમેવ હિ ॥ ૨૮॥

સોઽહં દીનો ભક્તિયુક્ત આગતઃ શરણં તવ ।
રક્ષા મયિ વિધાતવ્યા રચિતોઽયં મયાઞ્જલિઃ ॥ ૨૯॥

ઇયં દેવી જગન્માતા પરિતુષ્ટા મમોપરિ ।
ક્રોધં વિહાય સકલં પ્રસન્ના માં નિરીક્ષતામ્ ॥ ૩૦॥

ક્વાસ્યાઃ ક્રોધઃ ક્વ કૃપણો દૈત્યોઽહં ચન્દ્રશેખર ।
તત્સોઢા નાહમર્દ્ધેન્દુચૂડ શમ્ભો મહેશ્વર ॥ ૩૧॥

ક્વ ભવાન્પરમોદારઃ ક્વ ચાહં વિવશીકૃતઃ ।
કામક્રોધાદિભિર્દોષૈર્જરસા મૃત્યુના તથા ॥ ૩૨॥

અયં તે વીરકઃ પુત્રો યુદ્ધશૌણ્ડો મહાબલઃ ।
કૃપણં માં સમાલક્ષ્ય મા મન્યુવશમન્વગાઃ ॥ ૩૩॥

તુષારહારશીતાંશુશઙ્ખકુન્દેન્દુવર્ણભાક્ ।
પશ્યેયં પાર્વતીં નિત્યં માતરં ગુરુગૌરવાત્ ॥ ૩૪॥

નિત્યં ભવદ્ભ્યાં ભક્તસ્તુ નિર્વૈરો દૈવતૈઃ સહ ।
નિવસેયં ગણૈઃ સાર્દ્ધં શાન્તાત્મા યોગચિન્તકઃ ॥ ૩૫॥

મા સ્મરેયં પુનર્જાતં વિરુદ્ધં દાનવોદ્ભવમ્ ।
ત્વત્કૃપાતો મહેશાન દેહ્યેતદ્વરમુત્તમમ્ ॥ ૩૬॥

સનત્કુમાર ઉવાચ ।
એતાવદુક્ત્વા વચનં દૈત્યેન્દ્રો મૌનમાસ્થિતઃ ।
ધ્યાયંસ્ત્રિલોચનં દેવં પાર્વતીં પ્રેક્ષ્ય માતરમ્ ॥ ૩૭॥

તતો દૃષ્ટસ્તુ રુદ્રેણ પ્રસન્નેનૈવ ચક્ષુષા ।

સ્મૃતવાન્પૂર્વવૃત્તાન્તમાત્મનો જન્મ ચાદ્ભુતમ્ ॥ ૩૮॥

તસ્મિન્સ્મૃતે ચ વૃત્તાન્તે તતઃ પૂર્ણમનોરથઃ ।
પ્રણમ્ય માતાપિતરૌ કૃતકૃત્યોઽભવત્તતઃ ॥ ૩૯॥

પાર્વત્યા મૂર્ધ્ન્યુપાઘ્રાતઃ શઙ્કરેણ ચ ધીમતા ।
તથાઽભિલષિતં લેભે તુષ્ટાદ્ બાલેન્દુશેખરાત્ ॥ ૪૦॥

એતદ્વઃ સર્વમાખ્યાતમન્ધકસ્ય પુરાતનમ્ ।
ગાણપત્યં મહાદેવપ્રસાદાત્પરસૌખ્યદમ્ ॥ ૪૧॥

મૃત્યુઞ્જયશ્ચ કથિતો મન્ત્રો મૃત્યુવિનાશનઃ ।
પઠિતવ્યઃ પ્રયત્નેન સર્વકામફલપ્રદઃ ॥ ૪૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે અન્ધકગણજીવિતપ્રાપ્તિવર્ણનં નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫.૪૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૫૦. પઞ્ચાશત્તમોઽધ્યાયઃ । મૃતસઞ્જીવિનીવિદ્યાપ્રાપ્તિવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
શ ૃણુ વ્યાસ યથા પ્રાપ્તા મૃત્યુપ્રશમની પરા ।
વિદ્યા કાવ્યેન મુનિના શિવાન્મૃત્યુઞ્જયાભિધાત્ ॥ ૧॥

પુરાસૌ ભૃગુદાયાદો ગત્વા વારાણસીં પુરીમ્ ।
બહુકાલં તપસ્તેપે ધ્યાયન્વિશ્વેશ્વરં પ્રભુમ્ ॥ ૨॥

સ્થાપયામાસ તત્રૈવ લિઙ્ગં શમ્ભોઃ પરાત્મનઃ ।
કૂપં ચકાર સદ્રમ્યં વેદવ્યાસ તદગ્રતઃ ॥ ૩॥

પઞ્ચામૃતૈર્દ્રોણમિતૈર્લક્ષકૃત્વઃ પ્રયત્નતઃ ।
સ્નાપયામાસ દેવેશં સુગન્ધસ્નપનૈર્બહુ ॥ ૪॥

સહસ્રકૃત્વો દેવેશં ચન્દનૈર્યક્ષકર્દમૈઃ ।
સમાલિલિમ્પ સુપ્રીત્યા સુગન્ધોદ્વર્ત્તનાન્યનુ ॥ ૫॥

રાજચમ્પકધત્તૂરૈઃ કરવીરકુશેશયૈઃ ।
માલતીકર્ણિકારૈશ્ચ કદમ્બૈર્બકુલોત્પલૈઃ ॥ ૬॥

મલ્લિકાશતપત્રીભિસ્સિન્ધુવારૈઃ સકિંશુકૈઃ ।
બન્ધૂકપુષ્પૈઃ પુન્નાગૈર્નાગકેશરકેશરૈઃ ॥ ૭॥

નવમલ્લીચિબિલિકૈઃ કુન્દૈઃ સમુચુકુન્દકૈઃ ।
મન્દારૈર્બિલ્વપત્રૈશ્ચ દ્રોણૈર્મરુબકૈર્બૃકૈઃ ।
ગ્રન્થિપર્ણૈર્દમનકૈઃ સુરમ્યૈશ્ચૂતપલ્લવૈઃ ॥ ૮॥

તુલસીદેવગન્ધારીબૃહત્પત્રીકુશાઙ્કુરૈઃ ।
નન્દ્યાવર્તૈરગસ્ત્યૈશ્ચ સશાલૈર્દેવદારુભિઃ ॥ ૯॥

કાઞ્ચનારૈઃ કુરબકૈર્દૂર્વાઙ્કુરકુરુણ્ટકૈઃ ।
પ્રત્યેકમેભિઃ કુસુમૈઃ પલ્લવૈરપરૈરપિ ॥ ૧૦॥

પત્રૈઃ સહસ્રપત્રૈશ્ચ રમ્યૈર્નાનાવિધૈઃ શુભૈઃ ।
સાવધાનેન સુપ્રીત્યા સ સમાનર્ચ શઙ્કરમ્ ॥ ૧૧॥

ગીતનૃત્યોપહારૈશ્ચ સંસ્તુતઃ સ્તુતિભિર્બહુ ।
નામ્નાં સહસ્રૈરન્યૈશ્ચ સ્તોત્રૈસ્તુષ્ટાવ શઙ્કરમ્ ॥ ૧૨॥

સહસ્રં પઞ્ચશરદામિત્થં શુક્રો મહેશ્વરમ્ ।
નાનાપ્રકારવિધિના મહેશં સ સમર્ચયત્ ॥ ૧૩॥

યદા દેવં નાનુલોકે મનાગપિ વરોન્મુખમ્ ।
તદાન્યં નિયમં ઘોરં જગ્રાહાતીવ દુઃસહમ્ ॥ ૧૪॥

પ્રક્ષાલ્ય ચેતસોઽત્યન્તં ચાઞ્ચલ્યાખ્યં મહામલમ્ ।
ભાવનાવાર્ભિરસકૃદિન્દ્રિયૈઃ સહિતસ્ય ચ ॥ ૧૫॥

નિર્મલીકૃત્ય તચ્ચેતો રત્નં દત્ત્વા પિનાકિને ।
પ્રપપૌ કણધૂમૌઘં સહસ્રં શરદાં કવિઃ ॥ ૧૬॥

કાવ્યમિત્થં તપો ઘોરં કુર્વન્તં દૃઢમાનસમ્ ।
પ્રસસાદ સ તં વીક્ષ્ય ભાર્ગવાય મહેશ્વરઃ ॥ ૧૭॥

તસ્માલ્લિઙ્ગાદ્વિનિર્ગત્ય સહસ્રાર્કાધિકદ્યુતિઃ ।
ઉવાચ તં વિરૂપાક્ષઃ સાક્ષાદ્દાક્ષાયણીપતિઃ ॥ ૧૮॥

મહેશ્વર ઉવાચ ।

તપોનિધે મહાભાગ ભૃગુપુત્ર મહામુને ।
તપસાનેન તે નિત્યં પ્રસન્નોઽહં વિશેષતઃ ॥ ૧૯॥

મનોઽભિલષિતં સર્વં વરં વરય ભાર્ગવ ।
પ્રીત્યા દાસ્યેઽખિલાન્કામાન્નાદેયં વિદ્યતે તવ ॥ ૨૦॥

સનત્કુમાર ઉવાચ ।
નિશમ્યેતિ વચઃ શમ્ભોર્મહાસુખકરં વરમ્ ।
સ બભૂવ કવિસ્તુષ્ટો નિમગ્નઃ સુખવારિધૌ ॥ ૨૧॥

ઉદ્યદાનન્દસન્દોહરોમાઞ્ચાચિતવિગ્રહઃ ।
પ્રણનામ મુદા શમ્ભુમમ્ભોજનયનો દ્વિજઃ ॥ ૨૨॥

તુષ્ટાવાષ્ટતનું તુષ્ટઃ પ્રફુલ્લનયનાઞ્ચલઃ ।
મૌલાવઞ્જલિમાધાય વદન્ જય જયેતિ ચ ॥ ૨૩॥

ભાર્ગવ ઉવાચ ।
ત્વં ભાભિરાભિરભિભૂય તમઃસમસ્ત-
મસ્તં નયસ્યભિમતાનિ નિશાચરાણામ્ ।
દેદીપ્યસે દિવમણે ગગને હિતાય
લોકત્રયસ્ય જગદીશ્વર તન્નમસ્તે ॥ ૨૪॥

લોકેઽતિવેલમતિવેલમહામહોભિ-
ર્નિર્ભાસિ કૌ ચ ગગનેઽખિલલોકનેત્રઃ ।
વિદ્રાવિતાખિલતમાઃસુતમો હિમાંશો
પીયૂષપૂરપરિપૂરિત તન્નમસ્તે ॥ ૨૫॥

ત્વં પાવને પથિ સદા ગતિરપ્યુપાસ્યઃ
કસ્ત્વાં વિના ભુવનજીવન જીવતીહ ।
સ્તબ્ધપ્રભઞ્જનવિવર્દ્ધિ તસર્વજન્તોઃ
સન્તોષિતા હિ કુલસર્વગ વૈ નમસ્તે ॥ ૨૬॥

વિશ્વેકપાવક નતાવક પાવકૈક-
શક્તે ઋતે મૃતવતામૃતદિવ્યકાર્યમ્ ।
પ્રાણિષ્યદો જગદહો જગદન્તરાત્મં-
સ્ત્વં પાવકઃ પ્રતિપદં શમદો નમસ્તે ॥ ૨૭॥

પાનીયરૂપ પરમેશ જગત્પવિત્ર

ચિત્રં વિચિત્રસુચરિત્રકરોઽસિ નૂનમ્ ।
વિશ્વં પવિત્રમમલં કિલ વિશ્વનાથ
પાનીયગાહનત એતદતો નતોઽસ્મિ ॥ ૨૮॥

આકાશરૂપબહિરન્તરુતાવકાશ-
દાનાદ્વિકસ્વરમિહેશ્વર વિશ્વમેતત્ ।
ત્વત્તઃ સદા સદય સંશ્વસિતિ સ્વભાવાત્
સઙ્કોચમેતિ ભવતોઽસ્મિ નતસ્તતસ્ત્વામ્ ॥ ૨૯॥

વિશ્વમ્ભરાત્મક બિભર્ષિ વિભોઽત્ર વિશ્વં
કો વિશ્વનાથ ભવતોઽન્યતમસ્તમોઽરિઃ ।
સ ત્વં વિનાશય તમો તમ ચાહિભૂષ-
સ્તવ્યાત્પરઃ પરપરં પ્રણતસ્તતસ્ત્વામ્ ॥ ૩૦॥

આત્મસ્વરૂપ તવ રૂપપરમ્પરાભિ-
રાભિસ્તતં હર ચરાચરરૂપમેતત્ ।
સર્વાન્તરાત્મનિલય પ્રતિરૂપરૂપ
નિત્યં નતોઽસ્મિ પરમાત્મજનોઽષ્ટમૂર્તે ॥ ૩૧॥

ઇત્યષ્ટમૂર્તિભિરિમાભિરબન્ધુબન્ધો
યુક્તઃ કરોષિ ખલુ વિશ્વજનીનમૂર્ત્તે ।
એતત્તતં સુવિતતં પ્રણતપ્રણીત
સર્વાર્થસાર્થપરમાર્થ તતો નતોઽસ્મિ ॥ ૩૨॥

સનત્કુમાર ઉવાચ ।
અષ્ટમૂર્ત્યષ્ટકેનેત્થં પરિષ્ટુત્યેતિ ભાર્ગવઃ ।
ભર્ગં ભૂમિમિલન્મૌલિઃ પ્રણનામ પુનઃ પુનઃ ॥ ૩૩॥

ઇતિ સ્તુતો મહાદેવો ભાર્ગવેણાતિતેજસા ।
ઉત્થાય ભૂમેર્બાહુભ્યાં ધૃત્વા તં પ્રણતં દ્વિજમ્ ॥ ૩૪॥

ઉવાચ શ્લક્ષ્ણયા વાચા મેઘનાદગભીરયા ।
સુપ્રીત્યા દશનજ્યોત્સ્ના પ્રદ્યોતિતદિઙ્ગતરઃ ॥ ૩૫॥

મહાદેવ ઉવાચ ।
વિપ્રવર્ય કવે તાત મમ ભક્તોઽસિ પાવનઃ ।
અનેનાત્યુગ્રતપસા સ્વજન્યાચરિતેન ચ ॥ ૩૬॥

લિઙ્ગસ્થાપનપુણ્યેન લિઙ્ગસ્યારાધનેન ચ ।
દત્તચિત્તોપહારેણ શુચિના નિશ્ચલેન ચ ॥ ૩૭॥

અવિમુક્તમહાક્ષેત્રપવિત્રાચરણેન ચ ।
ત્વાં દયયા પ્રપશ્યામિ તવાદેયં ન કિઞ્ચન ॥ ૩૮॥

અનેનૈવ શરીરેણ મમોદરદરીગતઃ ।
મદ્વરેન્દ્રિયમાર્ગેણ પુત્રજન્મત્વમેષ્યસિ ॥ ૩૯॥

યચ્છામ્યહં વરં તેઽદ્ય દુષ્પ્રાપ્યં પાર્ષદૈરપિ ।
હરેર્હિરણ્યગર્ભાચ્ચ પ્રાયશોઽહં જુગોપ યમ્ ॥ ૪૦॥

મૃતસઞ્જીવની નામ વિદ્યા યા મમ નિર્મલા ।
તપોબલેન મહતા મયૈવ પરિનિર્મિતા ॥ ૪૧॥

ત્વાં તાં તુ પ્રાપયામ્યદ્ય મન્ત્રરૂપાં મહાશુચે ।
યોગ્યતા તેઽસ્તિ વિદ્યાયાસ્તસ્યાઃ શુચિતપોનિધે ॥ ૪૨॥

યં યમુદ્દિશ્ય નિયતમેતામાવર્તયિષ્યસિ ।
વિદ્યાં વિદ્યેશ્વરશ્રેષ્ઠાં સત્યં પ્રાણિષ્યતિ ધ્રુવમ્ ॥ ૪૩॥

અત્યર્કમત્યગ્નિ ચ તે તેજો વ્યોમ્નિ ચ તારકમ્ ।
દેદીપ્યમાનં ભવિતા ગ્રહાણાં પ્રવરો ભવ ॥ ૪૪॥

અપિ ચ ત્વાં કરિષ્યન્તિ યાત્રાં નાર્યો નરોઽપિ વા ।
તેષાં ત્વદ્ દૃષ્ટિપાતેન સર્વકાર્યં પ્રણશ્યતિ ॥ ૪૫॥

તવોદયે ભવિષ્યન્તિ વિવાહાદીનિ સુવ્રત ।
સર્વાણિ ધર્મકાર્યાણિ ફલવન્તિ નૃણામિહ ॥ ૪૬॥

સર્વાશ્ચ તિથયો નન્દાસ્તવ સંયોગતઃ શુભાઃ ।
તવ ભક્તા ભવિષ્યન્તિ બહુશુક્રા બહુ પ્રજાઃ ॥ ૪૭॥

ત્વયેદં સ્થાપિતં લિઙ્ગં શુક્રેશમિતિ સંજ્ઞિતમ્ ।
યેઽર્ચયિષ્યન્તિ મનુજાસ્તેષાં સિદ્ધિર્ભવિષ્યતિ ॥ ૪૮॥

આવર્ષં પ્રતિદ્યસ્ત્રં યે નક્તવ્રતપરાયણાઃ ।
ત્વદ્દિને શુક્રકૂપે યે કૃતસર્વોદકક્રિયાઃ ॥ ૪૯॥

શુક્રેશમર્ચયિષ્યન્તિ શૃણુ તેષાં તુ યત્ફલમ્ ।
અવન્ધ્યશુક્રાસ્તે મર્ત્યાઃ પુત્રવન્તોઽતિરેતસઃ ॥ ૫૦॥

પુંસ્ત્વસૌભાગ્યસમ્પન્ના ભવિષ્યન્તિ ન સંશયઃ ।
ઉપેતવિદ્યાસ્તે સર્વે જનાઃ સ્યુઃ સુખભાગિનઃ ॥ ૫૧॥

ઇતિ દત્ત્વા વરાન્દેવસ્તત્ર લિઙ્ગે લયં યયૌ ।
ભાર્ગવોઽપિ નિજં ધામ પ્રાપ સન્તુષ્ટમાનસઃ ॥ ૫૨॥

ઇતિ તે કથિતં વ્યાસ યથા પ્રાપ્તા તપોબલાત્ ।
મૃત્યુઞ્જયાભિધા વિદ્યા કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૫૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે મૃતસઞ્જીવિનીવિદ્યાપ્રાપ્તિવર્ણનં નામ પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫.૫૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૫૧. એકપઞ્ચાશત્તમોઽધ્યાયઃ । ઊષા ચરિત્રવર્ણનં શિવશિવાવિહારવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ શ્રાવિતા સુકથાદ્ભુતા ।
ભવતાનુગ્રહાત્પ્રીત્યા શમ્ભ્વનુગ્રહનિર્ભરા ॥ ૧॥

ઇદાનીં શ્રોતુમિચ્છામિ ચરિતં શશિમૌલિનઃ ।
ગાણપત્યં દદૌ પ્રીત્યા યથા બાણાસુરાય વૈ ॥ ૨॥

સનત્કુમાર ઉવાચ ।
શ‍ૃણુ વ્યાસાદરાત્તાં વૈ કથાં શમ્ભોઃ પરાત્મનઃ ।
ગાણપત્યં યથા પ્રીત્યા દદૌ બાણાસુરાય હિ ॥ ૩॥

અત્રૈવ સુચરિત્રં ચ શઙ્કરસ્ય મહાપ્રભોઃ ।
કૃષ્ણેન સમરોપ્યત્ર શમ્ભોર્બાણાનુગૃહ્ણતઃ ॥ ૪॥

અત્રાનુરૂપં શ‍ૃણુ મે શિવલીલાન્વિતં પરમ્ ।
ઇતિહાસં મહાપુણ્યં મનઃ શ્રોત્રસુખાવહમ્ ॥ ૫॥

બ્રહ્મપુત્રો મરીચિર્યો મુનિરાસીન્મહામતિઃ ।

માનસઃ સર્વપુત્રેષુ જ્યેષ્ઠઃ શ્રેષ્ઠઃ પ્રજાપતિઃ ॥ ૬॥

તસ્ય પુત્રો મહાત્માસીત્કશ્યપો મુનિસત્તમઃ ।
સૃષ્ટિપ્રવૃદ્ધકોઽત્યન્તં પિતુર્ભક્તો વિધેરપિ ॥ ૭॥

તસ્ય ત્રયોદશમિતા દક્ષકન્યાઃ સુશીલિકાઃ ।
કશ્યપસ્ય મુનેર્વ્યાસ પત્ન્યશ્ચાસન્પતિવ્રતાઃ ॥ ૮॥

તત્ર જ્યેષ્ઠા દિતિશ્ચાસીદ્દૈત્યાસ્તત્તનયાઃ સ્મૃતાઃ ।
અન્યાસાં ચ સુતા જાતા દેવાદ્યાઃ સચરાચરાઃ ॥ ૯॥

જ્યેષ્ઠાયાઃ પ્રથમૌ પુત્રૌ દિતેશ્ચાસ્તાં મહાબલૌ ।
હિરણ્યકશિપુર્જ્યેષ્ઠો હિરણ્યાક્ષોઽનુજસ્તતઃ ॥ ૧૦॥

હિરણ્યકશિપોઃ પુત્રાશ્ચત્વારો દૈત્યસત્તમાઃ ।
હ્રાદાનુહ્રાદસંહ્રાદપ્રહ્રાદશ્ચેત્યનુક્રમાત્ ॥ ૧૧॥

પ્રહ્રાદસ્તત્ર હિ મહાન્વિષ્ણુભક્તો જિતેન્દ્રિયઃ ।
યં નાશિતું ન શક્તાસ્તેઽભવન્દૈત્યાશ્ચ કેઽપિ હ ॥ ૧૨॥

વિરોચનઃ સુતસ્તસ્ય મહાદાતૃવરોઽભવત્ ।
શક્રાય સ્વશિરો યોઽદાદ્યાચમાનાય વિપ્રતઃ ॥ ૧૩॥

તસ્ય પુત્રો બલિશ્ચાસીન્મહાદાની શિવપ્રિયઃ ।
યેન વામનરૂપાય હરયેઽદાયિ મેદિની ॥ ૧૪॥

તસ્યૌરસઃ સુતો બાણઃ શિવભક્તો બભૂવ હ ।
માન્યો વદાન્યો ધીમાંશ્ચ સત્યસન્ધઃ સહસ્રદઃ ॥ ૧૫॥

શોણિતાખ્યે પુરે સ્થિત્વા સ રાજ્યમકરોત્પુરા ।
ત્રૈલોક્યં ચ બલાજ્જિત્વા તન્નાથાનસુરેશ્વરઃ ॥ ૧૬॥

તસ્ય બાણાસુરસ્યૈવ શિવભક્તસ્ય ચામરાઃ ।
શઙ્કરસ્ય પ્રસાદેન કિઙ્કરા ઇવ તેઽભવન્ ॥ ૧૭॥

તસ્ય રાજ્યેઽમરાન્હિત્વા નાભવન્દુઃખિતાઃ પ્રજાઃ ।
સાપત્ન્યાદ્ દુઃખિતાસ્તે હિ પરધર્મપ્રવર્તિનઃ ॥ ૧૮॥

સહસ્રબાહુવાદ્યેન સ કદાચિન્મહાસુરઃ ।
તાણ્ડવેન હિ નૃત્યેનાતોષયત્તં મહેશ્વરમ્ ॥ ૧૯॥

તેન નૃત્યેન સન્તુષ્ટઃ સુપ્રસન્નો બભૂવ હ ।
દદર્શ કૃપયા દૃષ્ટ્યા શઙ્કરો ભક્તવત્સલઃ ॥ ૨૦॥

ભગવાન્સર્વલોકેશઃ શરણ્યો ભક્તકામદઃ ।
વરેણ ચ્છન્દયામાસ બાલેયં તં મહાસુરમ્ ॥ ૨૧॥

સનત્કુમાર ઉવાચ ।
બાલેયઃ સ મહાદૈત્યો બાણો ભક્તવરઃ સુધીઃ ।
પ્રણમ્ય શઙ્કરં ભક્ત્યા નુનાવ પરમેશ્વરમ્ ॥ ૨૨॥

બાણાસુર ઉવાચ ।
દેવદેવ મહાદેવ શરણાગતવત્સલ ।
સન્તુષ્ટોઽસિ મહેશાન મમોપરિ વિભો યદિ ॥ ૨૩॥

મદ્રક્ષકો ભવ સદા મદુપસ્થઃ પુરાધિપઃ ।
સર્વથા પ્રીતિકૃન્મે હિ સસુતઃ સગણઃ પ્રભો ॥ ૨૪॥

સનત્કુમાર ઉવાચ ।
બલિપુત્રઃ સ વૈ બાણો મોહિતઃ શિવમાયયા ।
મુક્તિપ્રદં મહેશાનં દુરારાધ્યમપિ ધ્રુવમ્ ॥ ૨૫॥

સ ભક્તવત્સલઃ શમ્ભુર્દત્ત્વા તસ્મૈ વરાંશ્ચ તાન્ ।
તત્રોવાસ તથા પ્રીત્યા સગણઃ સસુતઃ પ્રભુઃ ॥ ૨૬॥

સ કદાચિદ્ બાણપુરે ચક્રે દેવાસુરૈઃ સહ ।
નદીતીરે હરઃ ક્રીડાં રમ્યે શોણિતકાહ્વયે ॥ ૨૭॥

નનૃતુર્જહસુશ્ચાપિ ગન્ધર્વાપ્સરસસ્તથા ।
જેપુઃ પ્રણેમુર્મુનય આનર્ચુસ્તુષ્ટુવુશ્ચ તમ્ ॥ ૨૮॥

વવલ્ગુઃ પ્રથમાઃસર્વે ઋષયો જુહુવુસ્તથા ।
આયયુઃ સિદ્ધસઙ્ઘાશ્ચ દદૃશુઃ શાઙ્કરીં રતિમ્ ॥ ૨૯॥

કુતાર્કિકા વિનેશુશ્ચ મ્લેચ્છાશ્ચ પરિપન્થિનઃ ।
માતરોઽભિમુખાસ્તસ્થુર્વિનેશુશ્ચ બિભીષિકાઃ ॥ ૩૦॥

રુદ્રસદ્ભાવભક્તાનાં ભવદોષાશ્ચ નિઃસૃતાઃ ।
તસ્મિન્દૃષ્ટે પ્રજાઃ સર્વાઃ સુપ્રીતિં પરમાં યયુઃ ॥ ૩૧॥

વવલ્ગુર્મુનયઃ સિદ્ધાઃ સ્ત્રીણાં દૃષ્ટ્વા વિચેષ્ટિતમ્ ।

પુપુષુશ્ચાપિ ઋતવઃ સ્વપ્રભાવં તુ તત્ર ચ ॥ ૩૨॥

વવુર્વાતાશ્ચ મૃદવઃ પુષ્પકે સરધૂસરાઃ ।
ચુકૂજુઃ પક્ષિસઙ્ઘાશ્ચ શાખિનાં મધુલમ્પટાઃ ॥ ૩૩॥

પુષ્પભારાવનદ્ધાનાં રારટ્યેરંશ્ચ કોકિલાઃ ।
મધુરં કામજનનં વનેષૂપવનેષુ ચ ॥ ૩૪॥

તતઃ ક્રીડાવિહારે તુ મત્તો બાલેન્દુશેખરઃ ।
અનિર્જિતેન કામેન દૃષ્ટઃ પ્રોવાચ નન્દિનમ્ ॥ ૩૫॥

ચન્દ્રશેખર ઉવાચ ।
વામામાનય ગૌરીં ત્વં કૈલાસાત્કૃતમણ્ડનામ્ ।
શીઘ્રમસ્માદ્વનાદ્ગત્વા હ્યુક્ત્વાઽકૃષ્ણામિહાનય ॥ ૩૬॥

સનત્કુમાર ઉવાચ ।
સ તથેતિ પ્રતિજ્ઞાય ગત્વા તત્રાહ પાર્વતીમ્ ।
સુપ્રણમ્ય રહોદૂતઃ શઙ્કરસ્ય કૃતાઞ્જલિઃ ॥ ૩૭॥

નન્દીશ્વર ઉવાચ ।
દ્રષ્ટુમિચ્છતિ દેવિ ત્વાં દેવદેવો મહેશ્વરઃ ।
સ્વવલ્લભાં રૂપકૃતાં મયોક્તં તન્નિદેશતઃ ॥ ૩૮॥

સનત્કુમાર ઉવાચ ।
તતસ્તદ્વચનાદ્ગૌરી મણ્ડનં કર્તુમાદરાત્ ।
ઉદ્યતાભૂન્મુનિશ્રેષ્ઠ પતિવ્રતપરાયણા ॥ ૩૯॥

આગચ્છામિ પ્રભું ગચ્છ વદ તં ત્વં મમાજ્ઞયા ।
આજગામ તતો નન્દી રુદ્રાસન્નં મનોગતિઃ ॥ ૪૦॥

પુનરાહ તતો રુદ્રો નન્દિનં પરવિભ્રમઃ ।
પુનર્ગચ્છ તતસ્તાત ક્ષિપ્રમાનય પાર્વતીમ્ ॥ ૪૧॥

બાઢમુક્ત્વા સ તાં ગત્વા ગૌરીમાહ સુલોચનામ્ ।
દ્રષ્ટુમિચ્છતિ તે ભર્તા કૃતવેષાં મનોરમામ્ ॥ ૪૨॥

શઙ્કરો બહુધા દેવિ વિહર્તું સમ્પ્રતીક્ષતે ।
એવં પતૌ સુકામાર્તે ગમ્યતાં ગિરિનન્દિનિ ॥ ૪૩॥

અપ્સરોભિઃસમગ્રાભિરન્યોન્યમભિમન્ત્રિતમ્ ।

લબ્ધભાવો યથા સદ્યઃ પાર્વત્યા દર્શનોત્સુકઃ ॥ ૪૪॥

અયં પિનાકી કામારિઃ વૃણુયાદ્યાં નિતમ્બિનીમ્ ।
સર્વાસાં દિવ્યનારીણાં રાજ્ઞી ભવતિ વૈ ધ્રુવમ્ ॥ ૪૫॥

વીક્ષણં ગૌરિ રૂપેણ ક્રીડયેન્મન્મથૈર્ગણૈઃ ।
કામોઽયં હન્તિ કામારિમૂચુરન્યોઽન્યમાદૃતાઃ ॥ ૪૬॥

સ્પ્રષ્ટું શક્નોતિ યા કાચિદ્દૃતે દાક્ષાયણીં સ્ત્રિયમ્ ।
સા ગચ્છેત્તત્ર નિઃશઙ્કં મોહયેત્પાર્વતીપતિમ્ ॥ ૪૭॥

કૂષ્માણ્ડતનયા તત્ર શઙ્કરં સ્પ્રષ્ટુમુત્સહે ।
અહં ગૌરીસુરૂપેણ ચિત્રલેખા વચોઽબ્રવીત્ ॥ ૪૮॥

ચિત્રલેખોવાચ ।
યદધાન્મોહિનીરૂપં કેશવો મોહનેચ્છયા ।
પુરા તદ્વૈષ્ણવં યોગમાશ્રિત્ય પરમાર્થતઃ ॥ ૪૯॥

ઉર્વશ્યાશ્ચ તતો દૃષ્ટ્વા રૂપસ્ય પરિવર્તનમ્ ।
કાલીરૂપં ઘૃતાચી તુ વિશ્વાચી ચાણ્ડિકં વપુઃ ॥ ૫૦॥

સાવિત્રિરૂપં રમ્ભા ચ ગાયત્રં મેનકા તથા ।
સહજન્યા જયારૂપં વૈજયં પુઞ્જિકસ્થલી ॥ ૫૧॥

માતૃણામપ્યનુક્તાનામનુક્તાશ્ચાપ્સરોવરાઃ ।
યત્નાદ્રૂપાણિ તાશ્ચક્રુઃ સ્વવિદ્યાસંયુતા અનુ ॥ ૫૨॥

તતસ્તાસાં તુ રૂપાણિ દૃષ્ટ્વા કુમ્ભાણ્ડનન્દિની ।
વૈષ્ણવાદાત્મયોગાચ્ચ વિજ્ઞાતાર્થા વ્યડમ્બયત્ ॥ ૫૩॥

ઊષા બાણાસુરસુતા દિવ્યયોગવિશારદા ।
ચકાર રૂપં પાર્વત્યા દિવ્યમત્યદ્ભુતં શુભમ્ ॥ ૫૪॥

મહારક્તાબ્જસઙ્કાશં ચરણં ચોત્તમપ્રભમ્ ।
દિવ્યલક્ષણસંયુક્તં મનોઽભીષ્ટાર્થદાયકમ્ ॥ ૫૫॥

તસ્યા રમણસઙ્કલ્પં વિજ્ઞાય ગિરિજા તતઃ ।
ઉવાચ સર્વવિજ્ઞાના સર્વાન્તર્યામિની શિવા ॥ ૫૬॥

ગિરિજોવાચ ।
યતો મમ સ્વરૂપં વૈ ધૃતમૂષે સખિ ત્વયા ।

સકામત્વેન સમયે સમ્પ્રાપ્તે સતિ માનિનિ ॥ ૫૭॥

અસ્મિંસ્તુ કાર્તિકે માસિ ઋતુધર્માસ્તુ માધવે ।
દ્વાદશ્યાં શુક્લપક્ષે તુ યસ્તુ ઘોરે નિશાગમે ॥ ૫૮॥

કૃતોપવાસાં ત્વાં ભોક્તા સુપ્તામન્તઃપુરે નરઃ ।
સ તે ભર્ત્તા કૃતો દેવૈસ્તેન સાર્દ્ધં રમિષ્યસિ ॥ ૫૯॥

આબાલ્યાદ્વિષ્ણુભક્તાસિ યતોઽનિશમતન્દ્રિતા ।
એવમસ્ત્વિતિ સા પ્રાહ મનસા લજ્જિતાનના ॥ ૬૦॥

અથ સા પાર્વતી દેવી કૃતકૌતુકમણ્ડના ।
રુદ્રસન્નિધિમાગત્ય ચિક્રીડે તેન શમ્ભુના ॥ ૬૧॥

તતો રતાન્તે ભગવાન્ રુદ્રશ્ચાદર્શનં યયૌ ।
સદારઃ સગણશ્ચાપિ સહિતો દૈવતૈર્મુને ॥ ૬૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે ઊષાચરિત્રવર્ણને શિવાશિવવિહારવર્ણનં નામૈકપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫.૫૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૫૨. દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ । ઊષા ચરિત્રવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
શ઼ૃણુષ્વાન્યચ્ચરિત્રં ચ શિવસ્ય પરમાત્મનઃ ।
ભક્તવાત્સલ્યસઙ્ગર્ભિ પરમાનન્દદાયકમ્ ॥ ૧॥

પુરા બાણાસુરો નામ દૈવદોષાચ્ચ ગર્વિતઃ ।
કૃત્વા તાણ્ડવનૃત્યં ચ તોષયામાસ શઙ્કરમ્ ॥ ૨॥

જ્ઞાત્વા સન્તુષ્ટમનસં પાર્વતીવલ્લભં શિવમ્ ।
ઉવાચ ચાસુરો બાણો નતસ્કન્ધઃ કૃતાઞ્જલિઃ ॥ ૩॥

બાણ ઉવાચ ।
દેવદેવ મહાદેવ સર્વદેવશિરોમણે ।

ત્વત્પ્રસાદાદ્ બલી ચાહં શ‍ૃણુ મે પરમં વચઃ ॥ ૪॥

દોઃસહસ્રં ત્વયા દત્તં પરં ભારાય મેઽભવત્ ।
ત્રિલોક્યાં પ્રતિયોદ્ધારં ન લભે ત્વદૃતે સમમ્ ॥ ૫॥

હે દેવ કિમનેનાપિ સહસ્રેણ કરોમ્યહમ્ ।
બાહૂનાં ગિરિતુલ્યાનાં વિના યુદ્ધં વૃષધ્વજ ॥ ૬॥

કણ્ડૂત્યા નિભૃતૈર્દોર્ભિર્યુયુત્સુર્દિગ્ગજાનહમ્ ।
પુરાણ્યાચૂર્ણયન્નદ્રીન્ભીતાસ્તેઽપિ પ્રદુદ્રુવુઃ ॥ ૭॥

મયા યમઃ કૃતો યોદ્ધા વહ્નિશ્ચ કૃતકો મહાન્ ।
વરુણશ્ચાપિ ગોપાલો ગવાં પાલયિતા તથા ॥ ૮॥

ગજાધ્યક્ષઃ કુબેરસ્તુ સૈરન્ધ્રી ચાપિ નિરૃતિઃ ।
જિતશ્ચાખણ્ડલો લોકે કરદાયી સદા કૃતઃ ॥ ૯॥

યુદ્ધસ્યાગમનં બ્રૂહિ યત્રૈતે બાહવો મમ ।
શત્રુહસ્તપ્રયુક્તૈશ્ચ શસ્ત્રાસ્ત્રૈર્જર્જરીકૃતાઃ ॥ ૧૦॥

પતન્તુ શત્રુહસ્તાદ્વા પાતયન્તુ સહસ્રધા ।
એતન્મનોરથં મે હિ પૂર્ણં કુરુ મહેશ્વર ॥ ૧૧॥

સનત્કુમાર ઉવાચ ।
તચ્છ્રુત્વા કુપિતો રુદ્રસ્ત્વટ્ટહાસં મહાદ્ભુતમ્ ।
કૃત્વાઽબ્રવીન્મહામન્યુર્ભક્તબાધાઽપહારકઃ ॥ ૧૨॥

રુદ્ર ઉવાચ ।
ધિગ્ધિક્ ત્વાં સર્વતો ગર્વિન્સર્વદૈત્યકુલાધમ ।
બલિપુત્રસ્ય ભક્તસ્ય નોચિતં વચ ઈદૃશમ્ ॥ ૧૩॥

દર્પસ્યાસ્ય પ્રશમનં લપ્સ્યસે ચાશુ દારુણમ્ ।
મહાયુદ્ધમકસ્માદ્વૈ બલિના મત્સમેન હિ ॥ ૧૪॥

તત્ર તે ગિરિસઙ્કાશા બાહવોઽનલકાષ્ઠવત્ ।
છિન્ના ભૂમૌ પતિષ્યન્તિ શસ્ત્રાસ્ત્રૈઃ કદલીકૃતાઃ ॥ ૧૫॥

યદૈષ માનુષશિરો મયૂરસહિતો ધ્વજઃ ।
વિધ્યતે તવ દુષ્ટાત્મંસ્તસ્ય સ્યાત્પતનં યદા ॥ ૧૬॥

સ્થાપિતસ્યાયુધાગારે વિના વાતકૃતં ભયમ્ ।

તદા યુદ્ધં મહાઘોરં સમ્પ્રાપ્તમિતિ ચેતસિ ॥ ૧૭॥

નિધાય ઘોરં સઙ્ગ્રામં ગચ્છેથાઃ સર્વસૈન્યવાન્ ।
સામ્પ્રતં ગચ્છ તદ્વેશ્મ યતસ્તદ્વિધતે શિવઃ ॥ ૧૮॥

તથા તાન્સ્વમહોત્પાતાંસ્તત્ર દ્રષ્ટાસિ દુર્મતે ।
ઇત્યુક્ત્વા વિરરામાથ ગર્વહૃદ્ભક્તવત્સલઃ ॥ ૧૯॥

સનત્કુમાર ઉવાચ ।
તચ્છ્રુત્વા રુદ્રમભ્યર્ચ્ય દિવ્યૈરઞ્જલિકુડ્મલૈઃ ।
પ્રણમ્ય ચ મહાદેવં બાણશ્ચ સ્વગૃહં ગતઃ ॥ ૨૦॥

કુમ્ભાણ્ડાય યથાવૃત્તં પૃષ્ટઃ પ્રોવાચ હર્ષિતઃ ।
પર્યૈક્ષિષ્ટાસુરો બાણસ્તં યોગં હ્યુત્સુકઃ સદા ॥ ૨૧॥

અથ દૈવાત્કદાચિત્સ સ્વયં ભગ્નં ધ્વજં ચ તમ્ ।
દૃષ્ટ્વા તત્રાસુરો બાણો હૃષ્ટો યુદ્ધાય નિર્યયૌ ॥ ૨૨॥

સ સ્વસૈન્યં સમાહૂય સંયુક્તઃ સાષ્ટભિર્ગણૈઃ ।
ઇષ્ટિં સાઙ્ગ્રામિકાં કૃત્વા દૃષ્ટ્વા સાઙ્ગ્રામિકં મધુ ॥ ૨૩॥

કકુભાં મઙ્ગલં સર્વં સમ્પ્રેક્ષ્ય પ્રસ્થિતોઽભવત્ ।
મહોત્સાહો મહાવીરો બલિપુત્રો મહારથઃ ॥ ૨૪॥

ઇતિ હૃત્કમલે કૃત્વા કઃ કસ્માદાગમિષ્યતિ ।
યોદ્ધા રણપ્રિયો યસ્તુ નાનાશસ્ત્રાસ્ત્રપારગઃ ॥ ૨૫॥

યસ્તુ બાહુસહસ્રં મે છિનત્ત્વનલકાષ્ઠવત્ ।
તથા શસ્ત્રૈર્મહાતીક્ષ્ણૈશ્છિનદ્મિ શતશસ્ત્વિહ ॥ ૨૬॥

એતસ્મિન્નન્તરે કાલઃ સમ્પ્રાપ્તઃ શઙ્કરેણ હિ ।
યત્ર સા બાણદુહિતા સુજાતા કૃતમઙ્ગલા ॥ ૨૭॥

માધવં માધવે માસિ પૂજયિત્વા મહાનિશિ ।
સુપ્તા ચાન્તઃ પુરે ગુપ્તે સ્ત્રીભાવમુપલમ્ભિતા ॥ ૨૮॥

ગૌર્યા સમ્પ્રેષિતેનાપિ વ્યાકૃષ્ટા દિવ્યમાયયા ।
કૃષ્ણાત્મજાત્મજેનાથ રુદન્તી સા હ્યનાથવત્ ॥ ૨૯॥

સ ચાપિ તાં બલાદ્ભુક્ત્વા પાર્વત્યાઃ સખિભિઃ પુનઃ ।
નીતસ્તુ દિવ્યયોગેન દ્વારકાં નિમિષાન્તરાત્ ॥ ૩૦॥

મૃદિતા સા તદોત્થાય રુદન્તી વિવિધા ગિરઃ ।
સખીભ્યઃ કથયિત્વા તુ દેહત્યાગે કૃતક્ષણા ॥ ૩૧॥

સખ્યા કૃતાત્મનો દોષં સા વ્યાસ સ્મારિતા પુનઃ ।
સર્વં તત્પૂર્વવૃત્તાન્તં તતો દૃષ્ટ્વા ચ સાઽભવત્ ॥ ૩૨॥

અબ્રવીચ્ચિત્રલેખાં ચ તતો મધુરયા ગિરા ।
ઊષા બાણસ્ય તનયા કુમ્ભાણ્ડતનયાં મુને ॥ ૩૩॥

ઊષોવાચ ।
સખિ યદ્યેષ મે ભર્તા પાર્વત્યા વિહિતઃ પુરા ।
કેનોપાયેન તે ગુપ્તઃ પ્રાપ્યતે વિધિવન્મયા ॥ ૩૪॥

કસ્મિન્કુલે સ વા જાતો મમ યેન હૃતં મનઃ ।
ઇત્યુષાવચનં શ્રુત્વા સખી પ્રોવાચ તાં તદા ॥ ૩૫॥

ચિત્રલેખોવાચ ।
ત્વયા સ્વપ્ને ચ યો દૃષ્ટઃ પુરુષો દેવિ તં કથમ્ ।
અહં સમાનયિષ્યામિ ન વિજ્ઞાતસ્તુ યો મમ ॥ ૩૬॥

દૈત્યકન્યા તદુક્તે તુ રાગાન્ધા મરણોત્સુકા ।
રક્ષિતા ચ તયા સખ્યા પ્રથમે દિવસે તતઃ ॥ ૩૭॥

પુનઃ પ્રોવાચ સોષાં વૈ ચિત્રલેખા મહામતિઃ ।
કુમ્ભાણ્ડસ્ય સુતા બાણતનયાં મુનિસત્તમ ॥ ૩૮॥

વ્યસનં તેઽપકર્ષામિ ત્રિલોક્યાં યદિ ભાવ્યતે ।
સમાનેષ્યે નરં યસ્તે મનોહર્તા તમાદિશ ॥ ૩૯॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા વસ્ત્રપુટકે દેવાન્દૈત્યાંશ્ચ દાનવાન્ ।
ગન્ધર્વસિદ્ધનાગાંશ્ચ યક્ષાદીંશ્ચ તથાલિખત્ ॥ ૪૦॥

તથા નરાંસ્તેષુ વૃષ્ણીન્ શૂરમાનકદુન્દુભિમ્ ।
વ્યલિખદ્રામકૃષ્ણૌ ચ પ્રદ્યુમ્નં નરસત્તમમ્ ॥ ૪૧॥

અનિરુદ્ધં વિલિખિતં પ્રાદ્યુમ્નિં વીક્ષ્ય લજ્જિતા ।
આસીદવાઙ્મુખી ચોષા હૃદયે હર્ષપૂરિતા ॥ ૪૨॥

ઊષા પ્રોવાચ ચૌરોઽસૌ મયા પ્રાપ્તસ્તુ યો નિશિ ।
પુરુષઃ સખિ યેનાશુ ચેતોરત્નં હૃતં મમ ॥ ૪૩॥

યસ્ય સંસ્પર્શનાદેવ મોહિતાહં તથાભવમ્ ।
તમહં જ્ઞાતુમિચ્છામિ વદ સર્વં ચ ભામિનિ ॥ ૪૪॥

કસ્યાયમન્વયે જાતો નામ કિં ચાસ્ય વિદ્યતે ।
ઇત્યુક્તા સાબ્રવીન્નામ યોગિની તસ્ય ચાન્વયમ્ ॥ ૪૫॥

સર્વમાકર્ણ્ય સા તસ્ય કુલાદિ મુનિસત્તમ ।
ઉત્સુકા બાણતનયા બભાષે સા તુ કામિની ॥ ૪૬॥

ઊષોવાચ ।
ઉપાયં રચય પ્રીત્યા તત્પ્રાપ્ત્યૈ સખિ તત્ક્ષણાત્ ।
યેનોપાયેન તં કાન્તં લભેયં પ્રાણવલ્લભમ્ ॥ ૪૭॥

યં વિનાહં ક્ષણં નૈકં સખિ જીવિતુમુત્સહે ।
તમાનયેહ સદ્યત્નાત્સુખિનીં કુરુ માં સખિ ॥ ૪૮॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તા સા તયા બાણાત્મજયા મન્ત્રિકન્યકા ।
વિસ્મિતાઽભૂન્મુનિશ્રેષ્ઠ સુવિચારપરાઽભવત્ ॥ ૪૯॥

તતઃ સખીં સમાભાષ્ય ચિત્રલેખા મનોજવા ।
બુદ્ધ્વા તં કૃષ્ણપૌત્રં સા દ્વારકાં ગન્તુમુદ્યતા ॥ ૫૦॥

જ્યેષ્ઠકૃષ્ણચતુર્દશ્યાં તૃતીયે તુ ગતેઽહનિ ।
આપ્રભાતાન્મુહૂર્તે તુ સમ્પ્રાપ્તા દ્વારકાં પુરીમ્ ॥ ૫૧॥

એકેન ક્ષણમાત્રેણ નભસા દિવ્યયોગિની ।
તતશ્ચાન્તઃપુરોદ્યાને પ્રાદ્યુમ્નિર્દદૃશે તયા ॥ ૫૨॥

ક્રીડન્નારીજનૈઃ સાર્દ્ધં પ્રપિબન્માધવી મધુ ।
સર્વાઙ્ગસુન્દરઃ શ્યામઃ સુસ્મિતો નવયૌવનઃ ॥ ૫૩॥

તતઃ ખટ્વાં સમારૂઢમન્ધકારપટેન સા ।
આચ્છાદયિત્વા યોગેન તામસેન ચ માધવમ્ ॥ ૫૪॥

તતઃ સા મૂર્ધ્નિ તાં ખટ્વાં ગૃહીત્વા નિમિષાન્તરાત્ ।
સમ્પ્રાપ્તા શોણિતપુરં યત્ર સા બાણનન્દિની ॥ ૫૫॥

કામાર્તા વિવિધાન્ભાવાઞ્ચકારોન્મત્તમાનસા ।
આનીતમથ તં દૃષ્ટ્વા તદા ભીતા ચ સાઽભવત્ ॥ ૫૬॥

અન્તઃ પુરે સુગુપ્તે ચ નવે તસ્મિન્સમાગમે ।
યાવત્ક્રીડિતુમારબ્ધં તાવજ્જ્ઞાતં ચ તત્ક્ષણાત્ ॥ ૫૭॥

અન્તઃ પુરદ્વારગતૈર્વેત્રજર્જરપાણિભિઃ ।
ઇઙ્ગિતૈરનુમાનૈશ્ચ કન્યાદૌઃશીલ્યમાચરન્ ॥ ૫૮॥

સ ચાપિ દૃષ્ટસ્તૈસ્તત્ર નરો દિવ્યવપુર્ધરઃ ।
તરુણો દર્શનીયસ્તુ સાહસી સમરપ્રિયઃ ॥ ૫૯॥

તં દૃષ્ટ્વા સર્વમાચખ્યુર્બાણાય બલિસૂનવે ।
પુરુષાસ્તે મહાવીરાઃ કન્યાન્તઃ પુરરક્ષકાઃ ॥ ૬૦॥

દ્વારપાલા ઊચુઃ ।
દેવ કશ્ચિન્ન જાનીતે ગુપ્તશ્ચાન્તઃપુરે બલાત્ ।
સ કોઽસ્તિ તવ કન્યાં વૈ સ્વયઙ્ગ્રાહાદધર્ષયત્ ॥ ૬૧॥

દાનવેન્દ્ર મહાબાહો પશ્ય પશ્યૈનમત્ર ચ ।
યદ્યુક્તં સ્યાત્તત્કુરુષ્વ ન દુષ્ટા વયમિત્યુત ॥ ૬૨॥

સનત્કુમાર ઉવાચ ।
તેષાં તદ્વચનં શ્રુત્વા દાનવેન્દ્રો મહાબલઃ ।
વિસ્મિતોઽભૂન્મુનિશ્રેષ્ઠ કન્યાયાઃ શ્રુતદૂષણઃ ॥ ૬૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે ઊષાચરિત્રવર્ણનં નામ દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫.૫૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૫૩. ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ । ઊષાચરિત્રે અનિરુદ્ધોષાવિહારવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
અથ બાણાસુરઃ ક્રુદ્ધસ્તત્ર ગત્વા દદર્શ તમ્ ।

દિવ્યલીલાત્તવપુષં પ્રથમે વયસિ સ્થિતમ્ ॥ ૧॥

તં દૃષ્ટ્વા વિસ્મિતં વાક્યં કિં કારણમથાબ્રવીત્ ।
બાણઃ ક્રોધપરીતાત્મા યુધિ શૌણ્ડો હસન્નિવ ॥ ૨॥

અહો મનુષ્યો રૂપાઢ્યઃસાહસી ધૈર્યવાનિતિ ।
કોઽયમાગતકાલશ્ચ દુષ્ટભાગ્યો વિમૂઢધીઃ ॥ ૩॥

યેન મે કુલચારિત્રં દૂષિતં દુહિતા હિતા ।
તં મારયધ્વં કુપિતાઃ શીઘ્રં શસ્ત્રૈઃ સુદારુણૈઃ ॥ ૪॥

દુરાચારં ચ તં બદ્ધ્વા ઘોરે કારાગૃહે તતઃ ।
રક્ષધ્વં વિકટે વીરા બહુકાલં વિશેષતઃ ॥ ૫॥

ન જાને કોઽયમભયઃ કો વા ઘોરપરાક્રમઃ ।
વિચાર્યેતિ મહાબુદ્ધિઃ સન્દિગ્ધોઽભૂચ્છરાસુરઃ ॥ ૬॥

તતો દૈત્યેન સૈન્યં તુ દશસાહસ્રકં શનૈઃ ।
વધાય તસ્ય વીરસ્ય વ્યાદિષ્ટં પાપબુદ્ધિના ॥ ૭॥

તદાદિષ્ટાસ્તુ તે વીરાઃ સર્વતોઽન્તઃપુરં દ્રુતમ્ ।
છાદયામાસુરત્યુગ્રાશ્છિન્ધિ ભિન્દીતિ વાદિનઃ ॥ ૮॥

શત્રુસૈન્યં તતો દૃષ્ટ્વા ગર્જમાનઃ સ યાદવઃ ।
અન્તઃપુરં દ્વારગતં પરિઘં ગૃહ્ય ચાતુલમ્ ॥ ૯॥

નિષ્ક્રાન્તો ભવનાત્તસ્માદ્વજ્રહસ્ત ઇવાન્તકઃ ।
તેન તાન્કિઙ્કરાન્ હત્વા પુનશ્ચાન્તઃપુરં યયૌ ॥ ૧૦॥

એવં દશસહસ્રાણિ સૈન્યાનિ મુનિસત્તમ ।
જઘાન રોષરક્તાક્ષો વર્દ્ધિતઃ શિવતેજસા ॥ ૧૧॥

લક્ષે હતેઽથ યોધાનાં તતો બાણાસુરો રુષા ।
કુમ્ભાણ્ડં સ ગૃહીત્વા તુ યુદ્ધે શૌણ્ડં સમાહ્વયત્ ॥ ૧૨॥

અનિરુદ્ધં મહાબુદ્ધિં દ્વન્દ્વયુદ્ધે મહાહવે ।
પ્રાદ્યુમ્નિં રક્ષિતં શૈવતેજસા પ્રજ્વલત્તનુમ્ ॥ ૧૩॥

તતો દશસહસ્રાણિ તુરઙ્ગાણાં રથોત્તમાન્ ।
યુદ્ધપ્રાપ્તેન ખડ્ગેન દૈત્યેન્દ્રસ્ય જઘાન સઃ ॥ ૧૪॥

તદ્વધાય તતઃ શક્તિં કાલવૈશ્વાનરોપમામ્ ।
અનિરુદ્ધો ગૃહીત્વા તાં તયા તં નિજઘાન હિ ॥ ૧૫॥

રથોપસ્થે તતો બાણસ્તયા શક્ત્યાહતો દૃઢમ્ ।
સ સાશ્વસ્તત્ક્ષણં વીરસ્તત્રૈવાન્તરધીયત ॥ ૧૬॥

તસ્મિંસ્ત્વદર્શનં પ્રાપ્તે પ્રાદ્યુમ્નિરપરાજિતમ્ ।
આલોક્ય કકુભઃ સર્વાઃ તસ્થૌ ગિરિરિવાચલઃ ॥ ૧૭॥

અદૃશ્યમાનસ્તુ તદા કૂટયોધઃ સ દાનવઃ ।
નાનાશસ્ત્રસહસ્રૈસ્તં જઘાન હિ પુનઃ પુનઃ ॥ ૧૮॥

છદ્મના નાગપાશૈસ્તં બબન્ધ સ મહાબલઃ ।
બલિપુત્રો મહાવીરઃ શિવભક્તઃ શરાસુરઃ ॥ ૧૯॥

તં બદ્ધ્વા પઞ્જરાન્તઃસ્થં કૃત્વા યુદ્ધાદુપારમત્ ।
ઉવાચ બાણઃ સઙ્ક્રુદ્ધઃ સૂતપુત્રં મહાબલમ્ ॥ ૨૦॥

બાણાસુર ઉવાચ ।
સૂતપુત્ર શિરશ્છિન્ધિ પુરુષસ્યાસ્ય વૈ લઘુ ।
યેન મે દૂષિતં પૂતં બલાદ્દુષ્ટેન સત્કુલમ્ ॥ ૨૧॥

છિત્વા તુ સર્વગાત્રાણિ રાક્ષસેભ્યઃ પ્રયચ્છ ભોઃ ।
અથાસ્ય રક્તમાંસાનિ ક્રવ્યાદા અપિ ભુઞ્જતામ્ ॥ ૨૨॥

અગાધે તૃણસઙ્કીર્ણે કૂપે પાતકિનં જહિ ।
કિં બહૂક્ત્યા સૂતપુત્ર મારણીયો હિ સર્વથા ॥ ૨૩॥

સનત્કુમાર ઉવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા ધર્મબુદ્ધિર્નિશાચરઃ ।
કુમ્ભાણ્ડસ્ત્વબ્રવીદ્વાક્યં બાણં સન્મન્ત્રિસત્તમમ્ ॥ ૨૪॥

કુમ્ભાણ્ડ ઉવાચ ।
નૈતત્કર્તું સમુચિતં કર્મ દેવ વિચાર્યતામ્ ।
અસ્મિન્ હતે હતો હ્યાત્મા ભવેદિતિ મતિર્મમ ॥ ૨૫॥

અયં તુ દૃશ્યતે દેવ તુલ્યો વિષ્ણોઃ પરાક્રમૈઃ ।
વર્ધિતશ્ચન્દ્રચૂડસ્ય ત્વદિષ્ટસ્ય સુતેજસા ॥ ૨૬॥

અથ ચન્દ્રલલાટસ્ય સાહસેન સમત્સ્વયમ્ ।

ઇમામવસ્થાં પ્રાપ્તોઽસ્તિ પૌરુષે સંવ્યવસ્થિતઃ ॥ ૨૭॥

અયં શિવપ્રસાદાદ્વૈ કૃષ્ણપૌત્રો મહાબલઃ ।
અસ્માંસ્તૃણોપમાન્ વેત્તિ દષ્ટોઽપિ ભુજગૈર્બલાત્ ॥ ૨૮॥

સનત્કુમાર ઉવાચ ।
એતદ્વાક્યં તુ બાણાય કથયિત્વા સ દાનવઃ ।
અનિરુદ્ધમુવાચેદં રાજનીતિવિદુત્તમઃ ॥ ૨૯॥

કુમ્ભાણ્ડ ઉવાચ ।
કોઽસિ કસ્યાસિ રે વીર સત્યં વદ મમાગ્રતઃ ।
કેન વા ત્વમિહાનીતો દુરાચાર નરાધમ ॥ ૩૦॥

દૈત્યેન્દ્રં સ્તુહિ વીરં ત્વં નમસ્કુરુ કૃતાઞ્જલિઃ ।
જિતોઽસ્મીતિ વચો દીનં કથયિત્વા પુનઃ પુનઃ ॥ ૩૧॥

એવં કૃતે તુ મોક્ષઃસ્યાદન્યથા બન્ધનાદિ ચ ।
તચ્છ્રુત્વા વચનં તસ્ય પ્રતિવાક્યમુવાચ સઃ ॥ ૩૨॥

અનિરુદ્ધ ઉવાચ ।
રે રે દૈત્યાઽધમસખે કરપિણ્ડોપજીવક ।
નિશાચર દુરાચાર શત્રુધર્મં ન વેત્સિ ભોઃ ॥ ૩૩॥

દૈન્યં પલાયનં ચાથ શૂરસ્ય મરણાધિકમ્ ।
વિરુદ્ધં ચોપશલ્યં ચ ભવેદિતિ મતિર્મમ ॥ ૩૪॥

ક્ષત્રિયસ્ય રણે શ્રેયો મરણં સમ્મુખે સદા ।
ન વીરમાનિનો ભૂમૌ દીનસ્યેવ કૃતાઞ્જલિઃ ॥ ૩૫॥

સનત્કુમાર ઉવાચ ।
ઇત્યાદિ વીરવાક્યાનિ બહૂનિ સ જગાદ તમ્ ।
તદાકર્ણ્ય સ બાણોઽસૌ વિસ્મિતોઽભૂચ્ચુકોપ ચ ॥ ૩૬॥

તદોવાચ નભોવાણી બાણસ્યાશ્વાસનાય હિ ।
શ્ૃણ્વતાં સર્વવીરાણામનિરુદ્ધસ્ય મન્ત્રિણઃ ॥ ૩૭॥

વ્યોમવાણ્યુવાચ ।
ભો ભો બાણ મહાવીર ન ક્રોધં કર્તુમર્હસિ ।
બલિપુત્રોઽસિ સુમતે શિવભક્ત વિચાર્યતામ્ ॥ ૩૮॥

શિવઃ સર્વેશ્વરઃ સાક્ષી કર્મણાં પરમેશ્વરઃ ।
તદધીનમિદં સર્વં જગદ્વૈ સચરાચરમ્ ॥ ૩૯॥

સ એવ કર્તા ભર્તા ચ સંહર્તા જગતાં સદા ।
રજઃ સત્ત્વતમોધારી વિધિવિષ્ણુહરાત્મકઃ ॥ ૪૦॥

સર્વસ્યાન્તર્ગતઃ સ્વામી પ્રેરકઃ સર્વતઃ પરઃ ।
નિર્વિકાર્યવ્યયો નિત્યો માયાધીશોઽપિ નિર્ગુણઃ ॥ ૪૧॥

તસ્યેચ્છયાઽબલો જ્ઞેયો બલી બલિવરાત્મજ ।
ઇતિ વિજ્ઞાય મનસિ સ્વસ્થો ભવ મહામતે ॥ ૪૨॥

ગર્વાપહારી ભગવાન્નાનાલીલાવિશારદઃ ।
નાશયિષ્યતિ તે ગર્વમિદાનીં ભક્તવત્સલઃ ॥ ૪૩॥

સનત્કુમાર ઉવાચ ।
ઇત્યાભાષ્ય નભોવાણી વિરરામ મહામુને ।
બાણાસુરસ્તદ્વચનાદનિરુદ્ધં ન જઘ્નિવાન્ ॥ ૪૪॥

કિં તુ સ્વાન્તઃપુરં ગત્વા પપૌ પાનમનુત્તમમ્ ।
તદ્વાક્યં ચ વિસસ્માર વિજહાર વિરુદ્ધધીઃ ॥ ૪૫॥

તતોઽનિરુદ્ધો બદ્ધસ્તુ નાગભોગૈર્વિષોલ્બણૈઃ ।
પ્રિયયાઽતૃપ્તચેતાસ્તુ દુર્ગાં સસ્માર તત્ક્ષણાત્ ॥ ૪૬॥

અનિરુદ્ધ ઉવાચ ।
શરણ્યે દેવિ બદ્ધોઽસ્મિ દહ્યમાનસ્તુ પન્નગૈઃ ।
આગચ્છ મે કુરુ ત્રાણં યશોદે ચણ્ડરોષિણિ ॥ ૪૭॥

શિવભક્તે મહાદેવિ સૃષ્ટિસ્થિત્યન્તકારિણી ।
ત્વાં વિના રક્ષકો નાન્યસ્તસ્માદ્રક્ષ શિવે હિ મામ્ ॥ ૪૮॥

સનત્કુમાર ઉવાચ ।
તેનેત્થં તોષિતા તત્ર કાલી ભિન્નાઞ્જનપ્રભા ।
જ્યેષ્ઠકૃષ્ણચતુર્દશ્યાં સમ્પ્રાપ્તાસીન્મહાનિશિ ॥ ૪૯॥

ગુરુભિર્મુષ્ટિનિર્ઘાતૈર્દારયામાસ પઞ્જરમ્ ।
શરાંસ્તાન્ભસ્મસાત્કૃત્વા સર્પરૂપાન્ ભયાનકાન્ ॥ ૫૦॥

મોચયિત્વાનિરુદ્ધં તુ તતશ્ચાન્તઃપુરં તતઃ ।

પ્રવેશયિત્વા દુર્ગાં તુ તત્રૈવાદર્શનં ગતા ॥ ૫૧॥

ઇત્થં દેવ્યાઃ પ્રસાદાત્તુ શિવશક્તેર્મુનીશ્વર ।
કૃચ્છ્રમુક્તોઽનિરુદ્ધોઽભૂત્સુખી ચૈવ ગતવ્યથઃ ॥ ૫૨॥

અથ લબ્ધજયો ભૂત્વાનિરુદ્ધઃ શિવશક્તિતઃ ।
પ્રાદ્યુમ્નિર્બાણતનયાં પ્રિયાં પ્રાપ્ય મુમોદ ચ ॥ ૫૩॥

પૂર્વવદ્વિજહારાસૌ તયા સ્વપ્રિયયા સુખી ।
પીતપાનઃ સુરક્તાક્ષઃ સ બાણસુતયા તતઃ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે ઊષાચરિત્રે અનિરુદ્ધોષાવિહારવર્ણનં નામ ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫.૫૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૫૪. ચતુઃપઞ્ચાશત્તમોઽધ્યાયઃ । બાણાઽસુરરુદ્રકૃષ્ણાદિયુદ્ધવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
અનિરુદ્ધે હૃતે પૌત્રે કૃષ્ણસ્ય મુનિસત્તમ ।
કુમ્ભાણ્ડસુતયા કૃષ્ણઃ કિમકાર્ષીદ્ધિ તદ્વદ ॥ ૧॥

સનત્કુમાર ઉવાચ ।
તતો ગતેઽનિરુદ્ધે તુ તત્સ્ત્રીણાં રોદનસ્વનમ્ ।
શ્રુત્વા ચ વ્યથિતઃ કૃષ્ણો બભૂવ મુનિસત્તમ ॥ ૨॥

અપશ્યતાં ચાનિરુદ્ધં તદ્બન્ધૂનાં હરેસ્તથા ।
ચત્વારો વાર્ષિકા માસા વ્યતીયુરનુશોચતામ્ ॥ ૩॥

નારદાત્તદુપાકર્ણ્ય વાર્તાં બદ્ધસ્ય કર્મ ચ ।
આસન્સુવ્યથિતાઃ સર્વે વૃષ્ણયઃ કૃષ્ણદેવતાઃ ॥ ૪॥

કૃષ્ણસ્તદ્વૃત્તમખિલં શ્રુત્વા યુદ્ધાય ચાદરાત્ ।
જગામ શોણિતપુરં તાર્ક્ષ્યમાહૂય તત્ક્ષણાત્ ॥ ૫॥

પ્રદ્યુમ્નો યુયુધાનશ્ચ ગતઃસામ્બોઽથ સારણઃ ।

નન્દોપનન્દભદ્રાદ્યા રામકૃષ્ણાનુવર્તિનઃ ॥ ૬॥

અક્ષૌહિણીભિર્દ્વાદશભિઃ સમેતા સર્વતો દિશમ્ ।
રુરુધુર્બાણનગરં સમન્તાત્સાત્વતર્ષભાઃ ॥ ૭॥

ભજ્યમાનપુરોદ્યાનપ્રાકારાટ્ટાલગોપુરમ્ ।
વીક્ષ્યમાણો રુષાવિષ્ટસ્તુલ્યસૈન્યોઽભિનિર્યયૌ ॥ ૮॥

બાણાર્થે ભગવાન્ રુદ્રઃ સસુતઃ પ્રમથૈર્વૃતઃ ।
આરુહ્ય નન્દિવૃષભં યુદ્ધં કર્ત્તું સમાયયૌ ॥ ૯॥

આસીત્સુતુમુલં યુદ્ધમદ્ભુતં લોમહર્ષણમ્ ।
કૃષ્ણાદિકાનાં તૈસ્તત્ર રુદ્રાદ્યૈર્બાણરક્ષકૈઃ ॥ ૧૦॥

કૃષ્ણશઙ્કરયોરાસીત્પ્રદ્યુમ્નગુહયોરપિ ।
કૂષ્માણ્ડકૂપકર્ણાભ્યાં બલેન સહ સંયુગઃ ॥ ૧૧॥

સામ્બસ્ય બાણપુત્રેણ બાણેન સહ સાત્યકેઃ ।
નન્દિના ગરુડસ્યાપિ પરેષાં ચ પરૈરપિ ॥ ૧૨॥

બ્રહ્માદયઃ સુરાધીશા મુનયઃ સિદ્ધચારણાઃ ।
ગન્ધર્વાઽપ્સરસો યાનૈર્વિમાનૈર્દ્રષ્ટુમાગમન્ ॥ ૧૩॥

પ્રમથૈર્વિવિધાકારૈ રેવત્યન્તૈઃ સુદારુણમ્ ।
યુદ્ધં બભૂવ વિપ્રેન્દ્ર તેષાં ચ યદુવંશિનામ્ ॥ ૧૪॥

ભ્રાત્રા રામેણ સહિતઃ પ્રદ્યુમ્નેન ચ ધીમતા ।
કૃષ્ણશ્ચકાર સમરમતુલં પ્રમથૈઃ સહ ॥ ૧૫॥

તત્રાગ્નિનાઽભવદ્યુદ્ધં યમેન વરુણેન ચ ।
વિમુખેન ત્રિપાદેન જ્વરેણ ચ ગુહેન ચ ॥ ૧૬॥

પ્રમથૈર્વિવિધાકારૈસ્તેષામત્યન્તદારુણમ્ ।
યુદ્ધં બભૂવ વિકટં વૃષ્ણીનાં રોમહર્ષણમ્ ॥ ૧૭॥

બિભીષિકાભિર્બહ્વીભિઃ કોટરીભિઃ પદે પદે ।
નિર્લજ્જાભિશ્ચ નારીભિઃ પ્રબલાભિરદૂરતઃ ॥ ૧૮॥

શઙ્કરાનુચરાન્ શૌરિર્ભૂતપ્રમથગુહ્યકાન્ ।
દ્રાવયામાસ તીક્ષ્ણાગ્રૈઃ શરૈઃ શાર્ઙ્ગધનુશ્ચ્યુતૈઃ ॥ ૧૯॥

એવં પ્રદ્યુમ્નપ્રમુખા વીરા યુદ્ધમહોત્સવાઃ ।
ચક્રુર્યુદ્ધં મહાઘોરં શત્રુસૈન્યં વિનાશયન્ ॥ ૨૦॥

વિશીર્યમાણં સ્વબલં દૃષ્ટ્વા રુદ્રોઽત્યમર્ષણઃ ।
ક્રોધં ચકાર સુમહન્નનાદ ચ મહોલ્બણમ્ ॥ ૨૧॥

તચ્છ્રુત્વા શઙ્કરગણા વિનેદુર્યુયુધુશ્ચ તે ।
મર્દયન્પ્રતિયોદ્ધારં વર્દ્ધિતાઃ શમ્ભુતેજસા ॥ ૨૨॥

પૃથગ્વિધાનિ ચાયુઙ્ક્ત શાર્ઙ્ગાસ્ત્રાણિ પિનાકિને ।
પ્રત્યક્ષૈઃ શમયામાસ શૂલપાણિરવિસ્મિતઃ ॥ ૨૩॥

બ્રહ્માસ્ત્રસ્ય ચ બ્રહ્માસ્ત્રં વાયવ્યસ્ય ચ પાર્વતમ્ ।
આગ્નેયસ્ય ચ પાર્જન્યં નૈજં નારાયણસ્ય ચ ॥ ૨૪॥

કૃષ્ણસૈન્યં વિદુદ્રાવ પ્રતિવીરેણ નિર્જિતમ્ ।
ન તસ્થૌ સમરે વ્યાસ પૂર્ણરુદ્રસુતેજસા ॥ ૨૫॥

વિદ્રાવિતે સ્વસૈન્યે તુ શ્રીકૃષ્ણશ્ચ પરન્તપઃ ।
સ્વં જ્વરં શીતલાખ્યં હિ વ્યસૃજદ્ વારુણં મુને ॥ ૨૬॥

વિદ્રાવિતે કૃષ્ણસૈન્યે કૃષ્ણસ્ય શીતલજ્વરઃ ।
અભ્યપદ્યત તં રુદ્રં મુને દશદિશો દહન્ ॥ ૨૭॥

મહેશ્વરોઽથ તં દૃષ્ટ્વાયાન્તં સ્વં વિસૃજજ્જ્વરમ્ ।
માહેશ્વરો વૈષ્ણવશ્ચ યુયુધાતે જ્વરાવુભૌ ॥ ૨૮॥

વૈષ્ણવોઽથ સમાક્રન્દન્માહેશ્વરબલાર્દિતઃ ।
અલબ્ધ્વાઽભયમન્યત્ર તુષ્ટાવ વૃષભધ્વજમ્ ॥ ૨૯॥

અથ પ્રસન્નો ભગવાન્વિષ્ણુજ્વરનુતો હરઃ ।
વિષ્ણુશીતજ્વરં પ્રાહ શરણાગતવત્સલઃ ॥ ૩૦॥

મહેશ્વર ઉવાચ ।
શીતજ્વર પ્રસન્નોઽહં વ્યેતુ તે મજ્જ્વરાદ્ભયમ્ ।
યો નૌ સ્મરતિ સંવાદં તસ્ય ન સ્યાજ્જ્વરાદ્ભયમ્ ॥ ૩૧॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તો રુદ્રમાનમ્ય ગતો નારાયણજ્વરઃ ।
તં દૃષ્ટ્વા ચરિતં કૃષ્ણો વિસિસ્માય ભયાન્વિતઃ ॥ ૩૨॥

સ્કન્દઃ પ્રદ્યુમ્નબાણૌઘૈરર્દ્યમાનોઽથ કોપિતઃ ।
જઘાન શક્ત્યા પ્રદ્યુમ્નં દૈત્યસઙ્ઘાત્યમર્ષણઃ ॥ ૩૩॥

સ્કન્દશક્તિહતસ્તત્ર પ્રદ્યુમ્નઃ પ્રબલોઽપિ હિ ।
અસૃગ્વિમુઞ્ચન્ગાત્રેભ્યો બલેનાપાક્રમદ્રણાત્ ॥ ૩૪॥

કુમ્ભાણ્ડકૂપકર્ણાભ્યાં નાનાસ્ત્રૈશ્ચ સમાહતઃ ।
દુદ્રાવ બલભદ્રોઽપિ ન તસ્થેઽપિ રણે બલી ॥ ૩૫॥

કૃત્વા સહસ્રં કાયાનાં પીત્વા તોયં મહાર્ણવાત્ ।
ગરુડો નાશયત્યથાઽઽવર્તૈર્મેઘાર્ણવામ્બુભિઃ ॥ ૩૬॥

અથ ક્રુદ્ધો મહેશસ્ય વાહનો વૃષભો બલી ।
વેગેન મહતારં વૈ શૃઙ્ગાભ્યાં નિજઘાન તમ્ ॥ ૩૭॥

શૃઙ્ગઘાતવિશીર્ણાઙ્ગો ગરુડોઽતીવ વિસ્મિતઃ ।
વિદુદ્રાવ રણાત્તૂર્ણં વિહાય ચ જનાર્દનમ્ ॥ ૩૮॥

એવં જાતે ચરિત્રે તુ ભગવાન્દેવકીસુતઃ ।
ઉવાચ સારથિં શીઘ્રં રુદ્રતેજોઽતિવિસ્મિતઃ ॥ ૩૯॥

શ્રીકૃષ્ણ ઉવાચ ।
હે સૂત શૃણુ મદ્વાક્યં રથં મે વાહય દ્રુતમ્ ।
મહાદેવસમીપસ્થો યથા સ્યાં ગદિતું વચઃ ॥ ૪૦॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તો હરિણા સૂતો દારુકઃ સ્વગુણાગ્રણીઃ ।
દ્રુતં તં વાહયામાસ રથં રુદ્રસમીપતઃ ॥ ૪૧॥

અથ વિજ્ઞાપયામાસ નતો ભૂત્વા કૃતાઞ્જલિઃ ।
શ્રીકૃષ્ણઃ શઙ્કરં ભક્ત્યા પ્રપન્નો ભક્તવત્સલમ્ ॥ ૪૨॥

શ્રીકૃષ્ણ ઉવાચ ।
દેવદેવ મહાદેવ શરણાગતવત્સલ ।
નમામિ ત્વાઽનન્તશક્તિં સર્વાત્માનં પરેશ્વરમ્ ॥ ૪૩॥

વિશ્વોત્પત્તિસ્થાનનાશહેતું સજ્જ્ઞપ્તિમાત્રકમ્ ।
બ્રહ્મલિઙ્ગં પરં શાન્તં કેવલં પરમેશ્વરમ્ ॥ ૪૪॥

કાલો દૈવં કર્મ જીવઃ સ્વભાવો દ્રવ્યમેવ ચ ।

ક્ષેત્રં ચ પ્રાણ આત્મા ચ વિકારસ્તત્સમૂહકઃ ॥ ૪૫॥

બીજરોહપ્રવાહસ્તુ ત્વન્માયૈષા જગત્પ્રભો ।
તન્નિબન્ધં પ્રપદ્યેહ ત્વામહં પરમેશ્વરમ્ ॥ ૪૬॥

નાનાભાવૈર્લીલયૈવ સ્વકૃતૈર્નિર્જરાદિકાન્ ।
નૂનં બિભર્ષિ લોકેશો હંસ્યુન્માર્ગાન્સ્વભાવતઃ ॥ ૪૭॥

ત્વં હિ બ્રહ્મ પરં જ્યોતિર્ગૂઢં બ્રહ્મણિ વાઙ્મયે ।
યં પશ્યન્ત્યમલાત્માનમાકાશમિવ કેવલમ્ ॥ ૪૮॥

ત્વમેવ ચાદ્યઃ પુરુષોઽદ્વિતીયસ્તુર્ય આત્મદૃક્ ।
ઈશો હેતુરહેતુશ્ચ સવિકારઃ પ્રતીયસે ॥ ૪૯॥

સ્વમાયયા સર્વગુણપ્રસિદ્ધ્યૈ ભગવન્પ્રભો ।
સર્વાન્વિતઃ પ્રભિન્નશ્ચ સર્વતસ્ત્વં મહેશ્વર ॥ ૫૦॥

યથૈવ સૂર્યોઽપિહિતશ્છાયારૂપાણિ ચ પ્રભો ।
સ્વચ્છાયયા સઞ્ચકાસ્તિ હ્યયં પરમદૃગ્ભવાન્ ॥ ૫૧॥

ગુણેનાપિહિતોઽપિ ત્વં ગુણે નૈવ ગુણાન્ વિભો ।
સ્વપ્રદીપશ્ચકાસિ ત્વં ભૂમન્ ગિરિશ શઙ્કર ॥ ૫૨॥

ત્વન્માયામોહિતધિયઃ પુત્રદારગૃહાદિષુ ।
ઉન્મજ્જન્તિ નિમજ્જન્તિ પ્રસક્તા વૃજિનાર્ણવે ॥ ૫૩॥

દૈવદત્તમિમં લબ્ધ્વા નૃલોકમજિતેન્દ્રિયઃ ।
યો નાદ્રિયેત ત્વત્પાદૌ સ શોચ્યો હ્યાત્મવઞ્ચકઃ ॥ ૫૪॥

ત્વદાજ્ઞયાહં ભગવાન્બાણદોશ્છેત્તુમાગતઃ ।
ત્વયૈવ શપ્તો બાણોઽયં ગર્વિતો ગર્વહારિણા । ૫૫॥

નિવર્ત્તસ્વ રણાદ્દેવ ત્વચ્છાપો ન વૃથા ભવેત્ ।
આજ્ઞાં દેહિ પ્રભો મે ત્વં બાણસ્ય ભુજકૃન્તને ॥ ૫૬॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચઃ શમ્ભુઃ શ્રીકૃષ્ણસ્ય મુનીશ્વર ।
પ્રત્યુવાચ પ્રસન્નાત્મા કૃષ્ણસ્તુત્યા મહેશ્વરઃ ॥ ૫૭॥

મહેશ્વર ઉવાચ ।
સત્યમુક્તં ત્વયા તાત મયા શપ્તો હિ દૈત્યરાટ્ ।

મદાજ્ઞયા ભવાન્પ્રાપ્તો બાણદોર્દણ્ડકૃન્તને ॥ ૫૮॥

કિં કરોમિ રમાનાથ ભક્તાધીનઃ સદા હરે ।
પશ્યતો મે કથં વીર સ્યાદ્ બાણભુજકૃન્તનમ્ ॥ ૫૯॥

અતસ્ત્વં જૃમ્ભણાસ્ત્રેણ માં જૃમ્ભય મદાજ્ઞયા ।
તતસ્ત્વં કુરુ કાર્યં સ્વં યથેષ્ટં ચ સુખી ભવ ॥ ૬૦॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્તઃ શઙ્કરેણાથ શાર્ઙ્ગપાણિઃ સુવિસ્મિતઃ ।
સ્વરણસ્થાનમાગત્ય મુમોદ સ મુનીશ્વર ॥ ૬૧॥

જૃમ્ભણાસ્ત્રં મુમોચાથ સન્ધાય ધનુષિ દ્રુતમ્ ।
પિનાકપાણયે વ્યાસ નાનાસ્ત્રકુશલો હરિઃ ॥ ૬૨॥

મોહયિત્વા તુ ગિરિશં જૃમ્ભણાસ્ત્રેણ જૃમ્ભિતમ્ ।
બાણસ્ય પૃતનાં શૌરિર્જઘાનાસિગદર્ષ્ટિભિઃ ॥ ૬૩॥

ઇતિ શિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે બાણાસુરરુદ્રકૃષ્ણાદિયુદ્ધવર્ણનં નામ ચતુઃપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫.૫૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૫૫. પઞ્ચપઞ્ચાશત્તમોઽધ્યાયઃ । બાણભુજકૃન્તનગર્વાપહારવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
સનત્કુમાર સર્વજ્ઞ બ્રહ્મપુત્ર નમોઽસ્તુ તે ।
અદ્ભુતેયં કથા તાત શ્રાવિતા મે ત્વયા મુને ॥ ૧॥

જૃમ્ભિતે જૃમ્ભણાસ્ત્રેણ હરિણા સમરે હરે ।
હતે બાણબલે બાણઃ કિમકાર્ષીચ્ચ તદ્વદ ॥ ૨॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય વ્યાસસ્યામિતતેજસઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા બ્રહ્મપુત્રો મુનીશ્વરઃ ॥ ૩॥

સનત્કુમાર ઉવાચ ।
શ ृણુ વ્યાસ મહાપ્રાજ્ઞ કથાં ચ પરમાદ્ભુતામ્ ।
કૃષ્ણશઙ્કરયોસ્તાત લોકલીલાનુસારિણોઃ ॥ ૪॥

શયિતે લીલયા રુદ્રે સપુત્રે સગણે સતિ ।
બાણો વિનિર્ગતો યુદ્ધં કર્તું કૃષ્ણેન દૈત્યરાટ્ ॥ ૫॥

કુમ્ભાણ્ડસઙ્ગૃહીતાશ્વો નાનાશસ્ત્રાસ્ત્રધૃક્ તતઃ ।
ચકાર યુદ્ધમતુલં બલિપુત્રો મહાબલઃ ॥ ૬॥

દૃષ્ટ્વા નિજબલં નષ્ટં સ દૈત્યેન્દ્રોઽત્યમર્ષિતઃ ।
ચકાર યુદ્ધમતુલં બલિપુત્રો મહાબલઃ ॥ ૭॥

શ્રીકૃષ્ણોઽપિ મહાવીરો ગિરિશાપ્તમહાબલઃ ।
ઉચ્ચૈર્જગર્જ તત્રાજૌ બાણં મત્વા તૃણોપમમ્ ॥ ૮॥

ધનુષ્ટઙ્કારયામાસ શાર્ઙ્ગાખ્યં નિજમદ્ભુતમ્ ।
ત્રાસયન્બાણસૈન્યં તદવશિષ્ટં મુનીશ્વર ॥ ૯॥

તેન નાદેન મહતા ધનુષ્ટઙ્કારજેન હિ ।
દ્યાવાભૂમ્યોરન્તરં વૈ વ્યાપ્તમાસીદનન્તરમ્ ॥ ૧૦॥

ચિક્ષેપ વિવિધાન્બાણાન્બાણાય કુપિતો હરિઃ ।
કર્ણાન્તં તદ્વિકૃષ્યાથ તીક્ષ્ણાનાશીવિષોપમાન્ ॥ ૧૧॥

આયાતસ્તાન્નિરીક્ષ્યાઽથ સ બાણો બલિનન્દનઃ ।
અપ્રાપ્તાનેવ ચિચ્છેદ સ્વશરૈઃ સ્વધનુશ્ચ્યુતૈઃ ॥ ૧૨॥

પુનર્જગર્જ સ વિભુર્બાણો વૈરિગણાર્દનઃ ।
તત્રસુર્વૃષ્ણયઃ સર્વે કૃષ્ણાત્માનો વિચેતસઃ ॥ ૧૩॥

સ્મૃત્વા શિવપદામ્ભોજં ચિક્ષેપ નિજસાયકાન્ ।
સ કૃષ્ણાયાતિશૂરાય મહાગર્વો બલેઃ સુતઃ ॥ ૧૪॥

કૃષ્ણોઽપિ તાનસમ્પ્રાપ્તાનચ્છિનત્સ્વશરૈર્દ્રુતમ્ ।
સ્મૃત્વા શિવપદામ્ભોજમમરારિર્મહાબલઃ ॥ ૧૫॥

રામાદયો વૃષ્ણયશ્ચ સ્વં સ્વં યોદ્ધારમાહવે ।
નિજઘ્નુર્બલિનઃસર્વે કૃત્વા ક્રોધં સમાકુલાઃ ॥ ૧૬॥

ઇત્થં ચિરતરં તત્ર બલિનોશ્ચ દ્વયોરપિ ।

બભૂવ તુમુલં યુદ્ધં શૃણ્વતાં વિસ્મયાવહમ્ ॥ ૧૭॥

તસ્મિન્નવસરે તત્ર ક્રોધં કૃત્વાઽતિ પક્ષિરાટ્ ।
બાણાસુરબલં સર્વં પક્ષાઘાતૈરમર્દયત્ ॥ ૧૮॥

મર્દિતં સ્વબલં દૃષ્ટ્વા મર્દયન્તં ચ તં બલી ।
ચુકોપાતિ બલેઃ પુત્રઃ શૈવરાડ્ દિતિજેશ્વરઃ ॥ ૧૯॥

સ્મૃત્વા શિવપદામ્ભોજં સહસ્રભુજવાન્દ્રુતમ્ ।
મહત્પરાક્રમં ચક્રે વૈરિણાં દુઃસહં સ વૈ ॥ ૨૦॥

ચિક્ષેપ યુગપદ્બાણાનમિતાંસ્તત્ર વીરહા ।
કૃષ્ણાદિસર્વયદુષુ ગરુડે ચ પૃથક્ પૃથક્ ॥ ૨૧॥

જઘાનૈકેન ગરુડં કૃષ્ણમેકેન પત્રિણા ।
બલમેકેન ચ મુને પરાનપિ તથા બલી ॥ ૨૨॥

તતઃ કૃષ્ણો મહાવીર્યો વિષ્ણુરૂપઃ સુરારિહા ।
ચુકોપાતિરણે તસ્મિઞ્જગર્જ ચ મહેશ્વરઃ ॥ ૨૩॥

જઘાન બાણં તરસા શાર્ઙ્ગનિઃસૃતસચ્છરૈઃ ।
અતિ તદ્બલમત્યુગ્રં યુગપત્સ્મૃતશઙ્કરઃ ॥ ૨૪॥

ચિચ્છેદ તદ્ધનુઃ શીઘ્રં છત્રાદિકમનાકુલઃ ।
હયાંશ્ચ પાતયામાસ હત્વા તાન્સ્વશરૈર્હરિઃ ॥ ૨૫॥

બાણોઽપિ ચ મહાવીરો જગર્જાતિ પ્રકુપ્ય હ ।
કૃષ્ણં જઘાન ગદયા સોઽપતદ્ધરણીતલે ॥ ૨૬॥

ઉત્થાયારં તતઃ કૃષ્ણો યુયુધે તેન શત્રુણા ।
શિવભક્તેન દેવર્ષે લોકલીલાઽનુસારતઃ ॥ ૨૭॥

એવં દ્વયોશ્ચિરં કાલં બભૂવ સુમહાન્ રણઃ ।
શિવરૂપો હરિઃ કૃષ્ણઃ સ ચ શૈવોત્તમો બલી ॥ ૨૮॥

કૃષ્ણોઽથ કૃત્વા સમરં ચિરં બાણેન વીર્યવાન્ ।
શિવાઽઽજ્ઞયા પ્રાપ્તબલશ્ચુકોપાતિ મુનીશ્વર ॥ ૨૯॥

તતઃસુદર્શનેનાશુ કૃષ્ણો બાણભુજાન્બહૂન્ ।
ચિચ્છેદ ભગવાન્ શમ્ભુઃ શાસનાત્પરવીરહા ॥ ૩૦॥

અવશિષ્ટા ભુજાસ્તસ્ય ચત્વારોઽતીવ સુન્દરાઃ ।
ગતવ્યથો બભૂવાશુ શઙ્કરસ્ય પ્રસાદતઃ ॥ ૩૧॥

ગતસ્મૃતિર્યદા બાણઃ શિરશ્છેત્તું સમુદ્યતઃ ।
કૃષ્ણો વીરત્વમાપન્નસ્તદા રુદ્રઃ સમુત્થિતઃ ॥ ૩૨॥

રુદ્ર ઉવાચ ।
ભગવન્દેવકીપુત્ર યદાજ્ઞપ્તં મયા પુરા ।
તત્કૃતં ચ ત્વયા વિષ્ણો મદાજ્ઞાકારિણા સદા ॥ ૩૩॥

મા બાણસ્ય શિરશ્છિન્ધિ સંહરસ્વ સુદર્શનમ્ ।
મદાજ્ઞયા ચક્રમિમમમોઘં મજ્જને સદા ॥ ૩૪॥

દત્તં મયા પુરા તુભ્યમનિવાર્યં રણે તવ ।
ચક્રં જયં ચ ગોવિન્દ નિવર્તસ્વ રણાત્તતઃ ॥ ૩પ॥

દધીચે રાવણે વીરે તારકાદિપુરેષ્વપિ ।
વિના મદાજ્ઞાં લક્ષ્મીશ રથાઙ્ગં નામુચઃ પુરા ॥ ૩૬॥

ત્વં તુ યોગીશ્વરઃ સાક્ષાત્પરમાત્મા જનાર્દન ।
વિચાર્યતાં સ્વમનસા સર્વભૂતહિતે રતઃ ॥ ૩૭॥

વરમસ્ય મયા દત્તં ન મૃત્યુર્ભયમસ્તિ વૈ ।
તન્મે વચઃ સદા સત્યં પરિતુષ્ટોઽસ્મ્યહં તવ ॥ ૩૮॥

પુરાઽયં ગર્વિતો મત્તો યુદ્ધં દેહીતિ મેઽબ્રવીત્ ।
ભુજાન્કણ્ડૂયમાનસ્તુ વિસ્મૃતાત્મગતિર્હરે ॥ ૩૯॥

તદાહમશપં તં વૈ ભુજચ્છેત્તાઽઽગમિષ્યતિ ।
અચિરેણાતિકાલેન ગતગર્વો ભવિષ્યસિ ॥ ૪૦॥

મદાજ્ઞયા હરિઃ પ્રાપ્તો ભુજચ્છેત્તા તવાઽથ વૈ ।
નિવર્તસ્વ રણાદ્ગચ્છ સ્વગૃહં સવધૂવરઃ ॥ ૪૧॥

ઇત્યુક્તઃ સ તયોર્મૈત્રીં કારયિત્વા મહેશ્વરઃ ।
તમનુજ્ઞાપ્ય સગણઃ સપુત્રઃ સ્વાલયં યયૌ ॥ ૪૨॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચઃ શમ્ભોઃ સંહૃત્ય ચ સુદર્શનમ્ ।
અક્ષતાઙ્ગસ્તુ વિજયી તત્કૃષ્ણોઽન્તઃપુરં યયૌ ॥ ૪૩॥

અનિરુદ્ધં સમાશ્વાસ્ય સહિતં ભાર્યયા પુનઃ ।
જગ્રાહ રત્નસઙ્ઘાતં બાણદત્તમનેકશઃ ॥ ૪૪॥

તત્સખીં ચિત્રલેખાં ચ ગૃહીત્વા પરયોગિનીમ્ ।
પ્રસન્નોઽભૂત્તતઃ કૃષ્ણઃ કૃતકાર્યઃ શિવાજ્ઞયા ॥ ૪૫॥

હૃદા પ્રણમ્ય ગિરિશમામન્ત્ર્ય ચ બલેઃ સુતમ્ ।
પરિવારસમેતસ્તુ જગામ સ્વપુરીં હરિઃ ॥ ૪૬॥

પથિ જિત્વા ચ વરુણં વિરુદ્ધં તમનેકધા ।
દ્વારકાં ચ પુરીં પ્રાપ્તઃ સમુત્સવસમન્વિતઃ ॥ ૪૭॥

વિસર્જયિત્વા ગરુડં સખીન્વીક્ષ્યોપહસ્ય ચ ।
દ્વારકાયાં તતો ગત્વા કામચારી ચચાર હ ॥ ૪૮॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે બાણભુજકૃન્તનગર્વાપહારવર્ણનં નામ પઞ્ચપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫.૫૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૫૬. ષટ્પઞ્ચાશત્તમોઽધ્યાયઃ । બાણાસુરગણત્વપ્રાપ્તિવર્ણનમ્ ।

નારદ ઉવાચ ।
કૃષ્ણે ગતે દ્વારકાયામનિરુદ્ધેન ભાર્યયા ।
અકાર્ષીત્કિં તતો બાણસ્તત્ત્વં વદ મહામુને ॥ ૧॥

સનત્કુમાર ઉવાચ ।
કૃષ્ણે ગતે દ્વારકાયામનિરુદ્ધેન ભાર્યયા ।
દુઃખિતોઽભૂત્તતો બાણઃ સ્વાજ્ઞાનં સંસ્મરન્હૃદા ॥ ૨॥

તતો નન્દી શિવગણો બાણં પ્રોવાચ દુઃખિતમ્ ।
દૈત્યં શોણિતદિગ્ધાઙ્ગમનુતાપસમન્વિતમ્ ॥ ૩॥

નન્દીશ્વર ઉવાચ ।
બાણ શઙ્કરસદ્ભક્ત માનુતાપં કુરુષ્વ ભોઃ ।

ભક્તાનુકમ્પી શમ્ભુર્વૈ ભક્તવત્સલનામધૃક્ ॥ ૪॥

તદિચ્છયા ચ યજ્જાતં તજ્જાતમિતિ ચેતસા ।
મન્યસ્વ ભક્તશાર્દૂલ શિવં સ્મર પુનઃપુનઃ ॥ ૫॥

મન આધે સમાધાય કુરુ નિત્યં મહોત્સવમ્ ।
ભક્તાનુકમ્પનશ્ચાઽસ્ય શઙ્કરસ્ય પુનઃપુનઃ ॥ ૬॥

નન્દિવાક્યાત્તતો બાણો દ્વિષા શીર્ષકમાત્રકઃ ।
શિવસ્થાનં જગામાશુ ધૃત્વા ધૈર્યં મહામનાઃ ॥ ૭॥

ગત્વા તત્ર પ્રભું નત્વા રુરોદાતીવ વિહ્વલઃ ।
ગતગર્વવ્રજો બાણઃ પ્રેમાકુલિતમાનસઃ ॥ ૮॥

સંસ્તુવન્વિવિધૈઃ સ્તોત્રૈઃ સન્નમન્નુતિતસ્તથા ।
યથોચિતં પાદઘાતં કુર્વન્વિક્ષેપયન્કરાન્ ॥ ૯॥

નનર્ત તાણ્ડવં મુખ્યં પ્રત્યાલીઢાદિશોભિતમ્ ।
સ્થાનકૈર્વિવિધાકારૈરાલીઢપ્રમુખૈરપિ ॥ ૧૦॥

મુખવાદસહસ્રાણિ ભ્રૂક્ષેપસહિતાન્યપિ ।
શિરઃકમ્પસહસ્રાણિ પ્રાસ્રાનીકઃ સહસ્રશઃ ॥ ૧૧॥

વારીશ્ચ વિવિધાકારા દર્શયિત્વા શનૈઃ શનૈઃ ।
તથા શોણિતધારાભિઃ સિઞ્ચયિત્વા મહીતલમ્ ॥ ૧૨॥

રુદ્રં પ્રસાદયામાસ શૂલિનં ચન્દ્રશેખરમ્ ।
બાણાસુરો મહાભક્તો વિસ્મૃતાત્મગતિર્નતઃ ॥ ૧૩॥

તતો નૃત્યં મહત્કૃત્વા ભગવાન્ભક્તવત્સલઃ ।
ઉવાચ બાણં સંહૃષ્ટો નૃત્ય ગીતપ્રિયો હરઃ ॥ ૧૪॥

રુદ્ર ઉવાચ ।
બાણ તાત બલેઃ પુત્ર સન્તુષ્ટો નર્તનેન તે ।
વરં ગૃહાણ દૈત્યેન્દ્ર યત્તે મનસિ વર્તતે ॥ ૧૫॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચઃ શમ્ભોર્દૈત્યેન્દ્રેણ તદા મુને ।
બાણેન સંવૃણીતોઽભૂદ્વરસ્તુ વ્રણરોપણે ॥ ૧૬॥

બાહુયુદ્ધસ્ય ચોદ્ધત્તિર્ગાણપત્યમથાક્ષયમ્ ।

ઉષાપુત્રસ્ય રાજ્યં તુ તસ્મિન્ શોણિતકાહ્વયે ॥ ૧૭॥

નિર્વૈરતા ચ વિબુધૈર્વિષ્ણુના ચ વિશેષતઃ ।
ન પુનર્દૈત્યતા દુષ્ટા રજસા તમસા યુતા ॥ ૧૮॥

શમ્ભુભક્તિર્વિશેષેણ નિર્વિકારા સદા મુને ।
શિવભક્તેષુ ચ સ્નેહો દયા સર્વેષુ જન્તુષુ ॥ ૧૯॥

ઇતિ કૃત્વા વરાન્ શમ્ભોર્બલિપુત્રો મહાઽસુરઃ ।
પ્રેમ્ણાઽશ્રુનયનો રુદ્રં તુષ્ટાવ સુકૃતાઞ્જલિઃ ॥ ૨૦॥

બાણ ઉવાચ ।
દેવદેવ મહાદેવ શરણાગતવત્સલ ।
ત્વાં નમામિ મહેશાન દીનબન્ધો દયાનિધે ॥ ૨૧॥

કૃતા મયિ કૃપાતીવ કૃપાસાગર શઙ્કર ।
ગર્વોપહારિતઃ સર્વઃ પ્રસન્નેન મમ પ્રભો ॥ ૨૨॥

ત્વં બ્રહ્મ પરમાત્મા હિ સર્વવ્યાપ્યખિલેશ્વરઃ ।
બ્રહ્માણ્ડતનુરુગ્રેશો વિરાટ્ સર્વાન્વિતઃ પરઃ ॥ ૨૩॥

નાભિર્નભોઽગ્નિર્વદનમમ્બુ રેતો દિશઃ શ્રુતિઃ ।
દ્યૌઃ શીર્ષમઙ્ઘ્રિરુર્વી તે મનશ્ચન્દ્રસ્તવ પ્રભો ॥ ૨૪॥

દૃગર્કો જઠરં વાર્દ્ધિર્ભુજેન્દ્રો ધિષણા વિધિઃ ।
પ્રજાપતિર્વિસર્ગશ્ચ ધર્મો હિ હૃદયં તવ ॥ ૨૫॥

રોમાણ્યૌષધયો નાથ કેશા જલમુચસ્તવ ।
ગુણાસ્ત્રયસ્ત્રિનેત્રાણિ સર્વાત્મા પુરુષો ભવાન્ ॥ ૨૬॥

બ્રાહ્મણં તે મુખં પ્રાહુર્બાહું ક્ષત્રિયમેવ ચ ।
ઊરુજં વૈશ્યમાહુસ્તે પાદજં શૂદ્રમેવ ચ ॥ ૨૭॥

ત્વમેવ સર્વદોપાસ્યઃસર્વૈર્જીવૈર્મહેશ્વર ।
ત્વાં ભજન્પરમાં મુક્તિં લભતે પુરુષો ધ્રુવમ્ ॥ ૨૮॥

યસ્ત્વાં વિસૃજતે મર્ત્ય આત્માનં પ્રિયમીશ્વરમ્ ।
વિપર્યયેન્દ્રિયાર્થાર્થં વિષમત્ત્યમૃતં ત્યજન્ ॥ ૨૯॥

વિષ્ણુર્બ્રહ્માઽથ વિબુધા મુનયશ્ચામલાશયાઃ ।
સર્વાત્મના પ્રપન્નાસ્ત્વાં શઙ્કરં પ્રિયમીશ્વરમ્ ॥ ૩૦॥

સનત્કુમાર ઉવાચ ।
ઇત્યુક્ત્વા બલિપુત્રસ્તુ વિરરામ શરાસુરઃ ।
પ્રેમપ્રફુલ્લિતાઙ્ગશ્ચ પ્રણમ્ય સ મહેશ્વરમ્ ॥ ૩૧॥

ઇતિ શ્રુત્વા સ્વભક્તસ્ય બાણસ્ય ભગવાન્ભવઃ ।
સર્વં લભિષ્યસીત્યુક્ત્વા તત્રૈવાન્તરધીયત ॥ ૩૨॥

તતઃ શમ્ભોઃ પ્રસાદેન મહાકાલત્વમાગતઃ ।
રુદ્રસ્યાનુચરો બાણો મહાપ્રમુદિતોઽભવત્ ॥ ૩૩॥

ઇતિ કિલ શરનામ્ના શઙ્કરસ્યાપિ વૃત્તં
સકલગુરુજનાનાં સદ્ગુરોઃ શૂલપાણેઃ ।
કથિતમિહ વરિષ્ઠં શ્રોત્રરમ્યૈર્વચોભિઃ
સકલભુવનમધ્યે ક્રીડમાનસ્ય નિત્યમ્ ॥ ૩૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે બાણાસુરગણપત્વપદપ્રાપ્તિવર્ણનં નામ ષટ્પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫.૫૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૫૭. સપ્તપઞ્ચાશત્તમોઽધ્યાયઃ । ગજાસુરવધઃ ।

સનત્કુમાર ઉવાચ ।
શ઼ૃણુ વ્યાસ મહાપ્રેમ્ણા ચરિતં શશિમૌલિનઃ ।
યથાઽવધીત્ ત્રિશૂલેન દાનવેન્દ્રં ગજાસુરમ્ ॥ ૧॥

દાનવે નિહતે દેવ્યા સમરે મહિષાસુરે ।
દેવાનાં ચ હિતાર્થાય પુરા દેવાઃ સુખં યયુઃ ॥ ૨॥

તસ્ય પુત્રો મહાવીરો મુનીશ્વર ગજાસુરઃ ।
પિતુર્વધં હિ સંસ્મૃત્ય કૃતં દેવ્યા સુરાર્થનાત્ ॥ ૩॥

સ તદ્વૈરમનુસ્મૃત્ય તપોઽર્થં ગતવાન્ વને ।
સમુદ્દિશ્ય વિધિં પ્રીત્યા તતાપ પરમં તપઃ ॥ ૪॥

અવધ્યોऽહં ભવિષ્યામિ સ્ત્રીપુંસૈઃ કામનિર્જિતૈઃ ।
સંવિચાર્યેતિ મનસાऽભૂત્તપોરતમાનસઃ ॥ ૫॥

સ તેપે હિમવદ્ દ્રોણ્યાં તપઃ પરમદારુણમ્ ।
ઊર્ધ્વબાહુર્નભોદૃષ્ટિઃ પાદાઙ્ગુષ્ઠાશ્રિતાવનિઃ ॥ ૬॥

જટાભારૈઃ સ વૈ રેજે પ્રલયાર્ક ઇવાંશુભિઃ ।
મહિષાસુરપુત્રોऽસૌ ગજાસુર ઉદારધીઃ ॥ ૭॥

તસ્ય મૂર્ધ્નઃ સમુદ્ભૂતઃ સધૂમોऽગ્નિસ્તપોમયઃ ।
તિર્યગૂર્ધ્વમધોલોકાંસ્તાપયન્વિષ્વગીરિતઃ ॥ ૮॥

ચુક્ષુભુર્નદ્યુદન્વન્તશ્ચાગ્નેર્મૂર્દ્ધસમુદ્ભવાત્ ।
નિપેતુઃ સગ્રહાસ્તારા જજ્જ્વલુશ્ચ દિશો દશ ॥ ૯॥

તેન તપ્તાઃ સુરાઃ સર્વે દિવં ત્યક્ત્વા સવાસવાઃ ।
બ્રહ્મલોકં યયુર્વિજ્ઞાપયામાસુશ્ચચાલ ભૂઃ ॥ ૧૦॥

દેવા ઊચુઃ ।
વિધે ગજાસુરતપસ્તપ્તા વયમથાકુલાઃ ।
ન શક્નુમો દિવિ સ્થાતુમતસ્તે શરણં ગતાઃ ॥ ૧૧॥

વિધે હ્યુપશમં તસ્ય ચાન્યાઞ્જીવયિતું કૃથા ।
લોકા નઙ્ક્ષ્યત્યન્યથા હિ સત્યં સત્યં બ્રુવામહે ॥ ૧૨॥

ઇતિ વિજ્ઞાપિતો દેવૈર્વાસવાદ્યૈઃ સ આત્મભૂઃ ।
ભૃગુદક્ષાદિભિર્બ્રહ્મા યયૌ દૈત્યવરાશ્રમમ્ ॥ ૧૩॥

તપન્તં તપસા લોકાન્ યથાऽભ્રાપિહિતં દિવિ ।
વિલક્ષ્ય વિસ્મિતઃ પ્રાહ વિહસન્સૃષ્ટિકારકઃ ॥ ૧૪॥

બ્રહ્મોવાચ ।
ઉત્તિષ્ઠોત્તિષ્ઠ દૈત્યેન્દ્ર તપઃ સિદ્ધોऽસિ માહિષે ।
પ્રાપ્તોऽહં વરદસ્તાત વરં વૃણુ યથેપ્સિતમ્ ॥ ૧૫॥

સનત્કુમાર ઉવાચ ।
ઉત્થાયોત્થાય દૈત્યેન્દ્ર ઈક્ષમાણો દૃશા વિભુમ્ ।
ગિરા ગદ્ગદયા પ્રીતોऽગૃણાદ્દેવં સ માહિષિઃ ॥ ૩૫॥

ગજાસુર ઉવાચ ।
નમસ્તે દેવદેવેશ યદિ દાસ્યસિ મે વરમ્ ।
અવધ્યોઽહં ભવેયં વૈ સ્ત્રીપુંસૈઃ કામનિર્જિતૈઃ ॥ ૧૭॥

મહાબલો મહાવીર્યોઽજેયો દેવાદિભિઃ સદા ।
સર્વેષાં લોકપાલાનાં નિખિલર્દ્ધિસુભુગ્વિભો ॥ ૧૮॥

સનત્કુમાર ઉવાચ ।
એવં વૃતઃ શતધૃતિર્દાનવેન સ તેન વૈ ।
પ્રાદાત્તત્તપસા પ્રીતો વરં તસ્ય સુદુર્લભમ્ ॥ ૧૯॥

એવં લબ્ધવરો દૈત્યો માહિષિશ્ચ ગજાસુરઃ ।
સુપ્રસન્નમનાઃ સોઽથ સ્વધામ પ્રત્યપદ્યત ॥ ૨૦॥

સ વિજિત્ય દિશઃ સર્વા લોકાંશ્ચ ત્રીન્મહાસુરઃ ।
દેવાસુરમનુષ્યેન્દ્રાન્ ગન્ધર્વગરુડોરગાન્ ॥ ૨૧॥

ઇત્યાદીન્નિખિલાઞ્જિત્વા વશમાનીય વિશ્વજિત્ ।
જહાર લોકપાલાનાં સ્થાનાનિ સહ તેજસા ॥ ૨૨॥

દેવોદ્યાનશ્રિયાજુષ્ટમધ્યાસ્તે સ્મ ત્રિવિષ્ટપમ્ ।
મહેન્દ્રભવનં સાક્ષાન્નિર્મિતં વિશ્વકર્મણા ॥ ૨૩॥

તસ્મિન્મહેન્દ્રસ્ય ગૃહે મહાબલો
મહામના નિર્જિતલોક એકરાટ્ ।
રેમેઽભિવન્દ્યાઙ્ઘ્રિયુગઃ સુરાદિભિઃ
પ્રતાપિતૈરૂર્જિતચણ્ડશાસનઃ ॥ ૨૪॥

સ ઇત્થં નિર્જિતકકુબેકરાડ્ વિષયાન્પ્રિયાન્ ।
યથોપજોષં ભુઞ્જાનો નાતૃપ્યદજિતેન્દ્રિયઃ ॥ ૨૫॥

એવમૈશ્વર્યમત્તસ્ય દૃપ્તસ્યોચ્છાસ્ત્રવર્તિનઃ ।
કાલે વ્યતીતે મહતિ પાપબુદ્ધિરભૂત્તતઃ ॥ ૨૬॥

મહિષાસુરપુત્રોઽસૌ સઞ્ચિક્લેશ દ્વિજાન્વરાન્ ।
તાપસાન્નિતરાં પૃથ્વ્યાં દાનવઃ સુરમર્દનઃ ॥ ૨૭॥

સુરાન્નરાંશ્ચ પ્રમથાન્સર્વાઞ્ચિક્લેશદુર્મતિઃ ।
ધર્માન્વિતાન્વિશેષેણ પૂર્વવૈરમનુસ્મરન્ ॥ ૨૮॥

એકસ્મિન્સમયે તાત દાનવોઽસૌ મહાબલઃ ।
અગચ્છદ્રાજધાનીં વ શઙ્કરસ્ય ગજાસુરઃ ॥ ૨૯॥

સમાગતેઽસુરેન્દ્રે હિ મહાન્કલકલો મુને ।
ત્રાત ત્રાતેતિ તત્રાસીદાનન્દનવાસિનામ્ ॥ ૩૦॥

મહિષાઽસુરપુત્રોઽસૌ યદા પુર્યાં સમાગતઃ ।
પ્રમથન્પ્રમથાન્સર્વાન્નિજવીર્યમદોદ્ધતઃ ॥ ૩૧॥

તસ્મિન્નવસરે દેવાઃ શક્રાદ્યાસ્તત્પરાજિતાઃ ।
શિવસ્ય શરણં જગ્મુર્નત્વા તુષ્ટુવુરાદરાત્ ॥ ૩૨॥

ન્યવેદયન્દાનવસ્ય તસ્ય કાશ્યાં સમાગમમ્ ।
ક્લેશાધિક્યં તત્રત્યાનાં તન્નાથાનાં વિશેષતઃ ॥ ૩૩॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ તવ પુર્યાં ગતોઽસુરઃ ।
કષ્ટે દત્તે ત્વજ્જનાનાં તં જહિ ત્વં કૃપાનિધે ॥ ૩૪॥

યત્ર યત્ર ધરાયાં ચ ચરણં પ્રમિણોતિ હિ ।
અચલાં સચલાં તત્ર કરોતિ નિજ ભારતઃ ॥ ૩૫॥

ઊરુવેગેન તરવઃ પતન્તિ શિખરૈઃ સહ ।
યસ્ય દોર્દણ્ડઘાતેન ચૂર્ણાઃ સ્યુશ્ચ શિલોચ્ચયાઃ ॥ ૩૬॥

યસ્ય મૌલિજસઙ્ઘર્ષાદ્ ઘના વ્યોમ ત્યજન્ત્યપિ ।
નીલિમાનં ન ચાદ્યાપિ જહ્યુસ્તત્કેશસઙ્ગજમ્ ॥ ૩૭॥

યસ્ય નિશ્વાસસમ્ભારૈરુત્તરઙ્ગા મહાબ્ધયઃ ।
નદ્યોઽપ્યમન્દકલ્લોલા ભવન્તિ તિમિભિઃ સહ ॥ ૩૮॥

યોજનાનાં સહસ્રાણિ નવ યસ્ય સમુચ્છ્રયઃ ।
તાવાનેવ હિ વિસ્તારઃ તનોર્માયાવિનોઽસ્ય હિ ॥ ૩૯॥

યન્નેત્રયોઃ પિઙ્ગલિમા તથા તરલિમા પુનઃ ।
વિદ્યુતાઃ નોહ્યતેઽદ્યાપિ સોઽયં સ્માઽઽયાતિ સત્વરમ્ ॥ ૪૦॥

યાં યાં દિશં સમભ્યેતિ સોઽયં દુઃસહ દાનવઃ ।
અવધ્યોઽહં ભવામીતિ સ્ત્રીપુંસૈઃ કામનિર્જિતૈઃ ॥ ૪૧॥

ઇત્યેવં ચેષ્ટિતં તસ્ય દાનવસ્ય નિવેદિતમ્ ।

રક્ષસ્વ ભક્તાન્દેવેશ કાશીરક્ષણતત્પર ॥ ૪૨॥

સનત્કુમાર ઉવાચ ।
ઇતિ સમ્પ્રાર્થિતો દેવૈર્ભક્તરક્ષણતત્પરઃ ।
તત્રાऽऽજગામ સોરં તદ્વધકામનયા હરઃ ॥ ૪૩॥

આગતં તં સમાલોક્ય શઙ્કરં ભક્તવત્સલમ્ ।
ત્રિશૂલહસ્તં ગર્જન્તં જગર્જ સ ગજાસુરઃ ॥ ૪૪॥

તતસ્તયોર્મહાનાસીત્સમરો દારુણોઽદ્ભુતઃ ।
નાનાસ્ત્રશસ્ત્રસમ્પાતૈર્વીરારાવં પ્રકુર્વતોઃ ॥ ૪૫॥

ગજાસુરોઽતિતેજસ્વી મહાબલપરાક્રમઃ ।
વિવ્યાધ ગિરિશં બાણૈસ્તીક્ષ્ણૈર્દાનવઘાતિનમ્ ॥ ૪૬॥

અથ રુદ્રો રૌદ્રતનુઃ સ્વશરૈરતિદારુણૈઃ ।
તચ્છરાંશ્ચિચ્છિદે તૂર્ણમપ્રાપ્તાંસ્તિલશો મુને ॥ ૪૭॥

તતો ગજાસુરઃ ક્રુદ્ધોઽભ્યધાવત્તં મહેશ્વરમ્ ।
ખડ્ગહસ્તઃ પ્રગર્જ્યોચ્ચૈર્હતોઽસીત્યદ્ય વૈ મયા ॥ ૪૮॥

તતસ્ત્રિશૂલહેતિસ્તમાયાન્તં દૈત્યપુઙ્ગવમ્ ।
વિજ્ઞાયાવધ્યમન્યેન શૂલેનાભિજઘાન તમ્ ॥ ૪૯॥

પ્રોતસ્તેન ત્રિશૂલેન સ ચ દૈત્યો ગજાસુરઃ ।
છત્રીકૃતમિવાત્માનં મન્યમાનો જગૌ હરમ્ ॥ ૫૦॥

ગજાસુર ઉવાચ ।
દેવદેવ મહાદેવ તવ ભક્તોઽસ્મિ સર્વથા ।
જાને ત્વાં ત્રિદિવેશાનં ત્રિશૂલિન્સ્મરહારિણમ્ ॥ ૫૧॥

તવ હસ્તે મમ વધો મહાશ્રેયસ્કરો મતઃ ।
અન્ધકારે મહેશાન ત્રિપુરાન્તક સર્વગ ॥ ૫૨॥

કિઞ્ચિદ્વિજ્ઞપ્તુમિચ્છામિ તચ્છૃણુષ્વ કૃપાકર ।
સત્યં બ્રવીમિ નાસત્યં મૃત્યુઞ્જય વિચારય ॥ ૫૩॥

ત્વમેકો જગતાં વન્દ્યો વિશ્વસ્યોપરિ સંસ્થિતઃ ।
કાલેન સર્વૈર્મર્તવ્યં શ્રેયસે મૃત્યુરીદૃશઃ ॥ ૫૪॥

સનત્કુમાર ઉવાચ ।

ઇત્યાકર્ણ્ય વચસ્તસ્ય શઙ્કરઃ કરુણાનિધિઃ ।
પ્રહસ્ય પ્રત્યુવાચેશો માહિષેયં ગજાસુરમ્ ॥ ૫૫॥

ઈશ્વર ઉવાચ ।
મહાપરાક્રમનિધે દાનવોત્તમ સન્મતે ।
ગજાસુર પ્રસન્નોઽસ્મિ સ્વાનુકૂલં વરં વૃણુ ॥ ૫૬॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય મહેશસ્ય વચનં વરદસ્ય હિ ।
પ્રત્યુવાચ પ્રસન્નાત્મા દાનવેન્દ્રો ગજાસુરઃ ॥ ૫૭॥

ગજાસુર ઉવાચ ।
યદિ પ્રસન્નો દિગ્વાસસ્તદા નિત્યં વસાન મે ।
ઇમાં કૃત્તિં મહેશાન ત્વત્રિશૂલાગ્નિપાવિતામ્ ॥ ૫૮॥

સ્વપ્રમાણાં સુખસ્પર્શાં રણાઙ્ગણપણીકૃતામ્ ।
દર્શનીયાં મહાદિવ્યાં સર્વદૈવ સુખાવહામ્ ॥ ૫૯॥

ઇષ્ટગન્ધિઃ સદૈવાસ્તુ સદૈવાસ્ત્વતિકોમલા ।
સદૈવ નિર્મલા ચાસ્તુ સદૈવાસ્ત્વતિમણ્ડના ॥ ૬૦॥

મહાતપોનલજ્વાલાં પ્રાપ્યાપિ સુચિરં વિભો ।
ન દગ્ધા કૃત્તિરેષા મે પુણ્યગન્ધનિધેસ્તતઃ ॥ ૬૧॥

યદિ પુણ્યવતી નૈષા મમ કૃત્તિર્દિગમ્બર ।
તદા ત્વદઙ્ગસઙ્ગોસ્યાઃ કથં જાતો રણાઙ્ગણે ॥ ૬૨॥

અન્યં ચ મે વરં દેહિ યદિ તુષ્ટોઽસિ શઙ્કર ।
નામાસ્તુ કૃત્તિવાસાસ્તે પ્રારભ્યાદ્યતનં દિનમ્ ॥ ૬૩॥

સનત્કુમાર ઉવાચ ।
શ્રુત્વેતિ સ વચસ્તસ્ય શઙ્કરો ભક્તવત્સલઃ ।
તથેત્યુવાચ સુપ્રીતો મહિષાસુરજં ચ તમ્ ॥ ૬૪॥

પુનઃ પ્રોવાચ પ્રીતાત્મા દાનવં તં ગજાસુરમ્ ।
ભક્તપ્રિયો મહેશાનો ભક્તિનિર્મલમાનસમ્ ॥ ૬૫॥

ઈશ્વર ઉવાચ ।
ઇદં પુણ્યં શરીરં તે ક્ષેત્રેઽસ્મિન્મુક્તિસાધને ।

મમ લિઙ્ગં ભવત્વત્ર સર્વેષાં મુક્તિદાયકમ્ ॥ ૬૬॥

કૃત્તિવાસેશ્વરં નામ મહાપાતકનાશનમ્ ।
સર્વેષામેવ લિઙ્ગાનાં શિરોભૂતં વિમુક્તિદમ્ ॥ ૬૭॥

કથયિત્વેતિ દેવેશસ્તત્કૃતિં પરિગૃહ્ય ચ ।
ગજાસુરસ્ય મહતીં પ્રાવૃણોદ્ધિ દિગમ્બરઃ ॥ ૬૮॥

મહામહોત્સવો જાતસ્તસ્મિન્નહ્નિ મુનીશ્વર ।
હર્ષમાપુર્જનાઃ સર્વે કાશીસ્થાઃ પ્રમથાસ્તથા ॥ ૬૯॥

હરિબ્રહ્માદયો દેવા હર્ષનિર્ભરમાનસાઃ ।
તુષ્ટુવુસ્તં મહેશાનં નત્વા સાઞ્જલયસ્તતઃ ॥ ૭૦॥

હતે તસ્મિન્દાનવેશે માહિષે હિ ગજાસુરે ।
સ્વસ્થાનં ભેજિરે દેવા જગત્સ્વાસ્થ્યમવાપ ચ ॥ ૭૧॥

ઇત્યુક્તં ચરિતં શમ્ભોર્ભક્તવાત્સલ્યસૂચકમ્ ।
સ્વર્ગ્યં યશસ્યમાયુષ્યં ધનધાન્યપ્રવર્દ્ધનમ્ ॥ ૭૨॥

ય ઇદં શ‍ૃણુયાત્પ્રીત્યા શ્રાવયેદ્વા શુચિવ્રતઃ ।
સ ભુક્ત્વા ચ મહાસૌખ્યં લભેતાન્તે પરં સુખમ્ ॥ ૭૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે ગજાસુરવધો નામ સપ્તપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫.૫૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૫૮. અષ્ટપઞ્ચાશત્તમોઽધ્યાયઃ । દુન્દુભિનિર્હ્રાદદૈત્યવધવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
શ‍ૃણુ વ્યાસ પ્રવક્ષ્યામિ ચરિતં શશિમૌલિનઃ ।
યથા દુન્દુભિનિર્હ્રાદમવધીદ્દિતિજં હરઃ ॥ ૧॥

હિરણ્યાક્ષે હતે દૈત્યે દિતિપુત્રે મહાબલે ।
વિષ્ણુદેવેન કાલેન પ્રાપ દુખં મહદ્દિતિઃ ॥ ૨॥

દૈત્યો દુન્દુભિનિર્હ્રાદો દુષ્ટઃ પ્રહ્લાદમાતુલઃ ।
સાન્ત્વયામાસ તાં વાગ્ભિર્દુઃખિતાં દેવદુઃખદઃ ॥ ૩॥

અથ દૈત્યઃ સ માયાવી દિતિમાશ્વાસ્ય દૈત્યરાટ્ ।
દેવાઃ કથં સુજેયાઃ સ્યુરિત્યુપાયમચિન્તયત્ ॥ ૪॥

દેવૈશ્ચ ઘાતિતો વીરો હિરણ્યાક્ષો મહાસુરઃ ।
વિષ્ણુના ચ સહ ભ્રાત્રા સચ્છલૈર્દૈત્યવૈરિભિઃ ॥ ૫॥

કિં બલાશ્ચ કિમાહારા કિમાધારા હિ નિર્જરાઃ ।
મયા કથં સુજેયાઃ સ્યુરિત્યુપાયમચિન્તયત્ ॥ ૬॥

વિચાર્ય બહુશો દૈત્યસ્તત્ત્વં વિજ્ઞાય નિશ્ચિતમ્ ।
અવશ્યમગ્રજન્માનો હેતવોઽત્ર વિચારતઃ ॥ ૭॥

બ્રાહ્મણાન્હન્તુમસકૃદન્વધાવત વૈ તતઃ ।
દૈત્યો દુન્દુભિનિર્હ્રાદો દેવવૈરી મહાખલઃ ॥ ૮॥

યતઃ ક્રતુભુજો દેવાઃ ક્રતવો વેદસમ્ભવાઃ ।
તે વેદા બ્રાહ્મણાધારાસ્તતો દેવબલં દ્વિજાઃ ॥ ૯॥

નિશ્ચિતં બ્રાહ્મણાધારાઃ સર્વે વેદાઃ સવાસવાઃ ।
ગીર્વાણા બ્રાહ્મણબલા નાત્ર કાર્યા વિચારણા ॥ ૧૦॥

બ્રાહ્મણા યદિ નષ્ટાઃ સ્યુર્વેદા નષ્ટાસ્તતઃ સ્વયમ્ ।
અતસ્તેષુ પ્રણષ્ટેષુ વિનષ્ટાઃ સતતં સુરાઃ ॥ ૧૧॥

યજ્ઞેષુ નાશં ગચ્છત્સુ હતાહારાસ્તતઃ સુરાઃ ।
નિર્બલાઃસુખજય્યાઃ સ્યુર્નિર્જિતેષુ સુરેષ્વથ ॥ ૧૨॥

અહમેવ ભવિષ્યામિ માન્યસ્ત્રિજગતીપતિઃ ।
આહરિષ્યામિ દેવાનામક્ષયાઃ સર્વસમ્પદઃ ॥ ૧૩॥

નિર્વેક્ષ્યામિ સુખાન્યેવ રાજ્યે નિહતકણ્ટકે ।
ઇતિ નિશ્ચિત્ય દુર્બુદ્ધિઃ પુનશ્ચિન્તિતવાન્ખલઃ ॥ ૧૪॥

દ્વિજાઃ ક્વ સન્તિ ભૂયાંસો બ્રહ્મતેજોઽતિબૃંહિતા ।
શ્રુત્યધ્યયનસમ્પન્નાસ્તપોબલસમન્વિતાઃ ॥ ૧૫॥

ભૂયસાં બ્રાહ્મણાનાં તુ સ્થાનં વારાણસી ખલુ ।
તામાદાવુપસંહૃત્ય યાયાં તીર્થાન્તરં તતઃ ॥ ૧૬॥

યત્ર યત્ર હિ તીર્થેષુ યત્ર યત્રાશ્રમેષુ ચ ।
સન્તિ સર્વેઽગ્રજન્માનસ્તે મયાદ્યાઃ સમન્તતઃ ॥ ૧૭॥

ઇતિ દુન્દુભિનિર્હ્રાદો મતિં કૃત્વા કુલોચિતામ્ ।
પ્રાપ્યાપિ કાશીં દુર્વૃત્તો માયાવી ન્યવધીદ્ દ્વિજાન્ ॥ ૧૮॥

સમિત્કુશાન્સમાદાતું યત્ર યાન્તિ દ્વિજોત્તમાઃ ।
અરણ્યે તત્ર તાન્સર્વાન્સ ભક્ષયતિ દુર્મતિઃ ॥ ૧૯॥

યથા કોઽપિ ન વેત્ત્યેવં તથાઽઽચ્છન્નોઽભવત્પુનઃ ।
વને વનેચરો ભૂત્વા યાદોરૂપો જલાશયે ॥ ૨૦॥

અદૃશ્યરૂપી માયાવી દેવાનામપ્યગોચરઃ ।
દિવા ધ્યાનપરસ્તિષ્ઠેન્મુનિવન્મુનિમધ્યગઃ ॥ ૨૧॥

પ્રવેશમુટજાનાં ચ નિર્ગમં હિ વિલોકયન્ ।
યામિન્યાં વ્યાઘ્રરૂપેણાભક્ષયદ્ બ્રાહ્મણાન્ બહૂન્ ॥ ૨૨॥

નિઃશઙ્કં ભક્ષયત્યેવં ન ત્યજત્યપિ કીકશમ્ ।
ઇત્થં નિપાતિતાસ્તેન વિપ્રા દુષ્ટેન ભૂરિશઃ ॥ ૨૩॥

એકદા શિવરાત્રૌ તુ ભક્તસ્ત્વેકો નિજોટજે ।
સપર્યાં દેવદેવસ્ય કૃત્વા ધ્યાનસ્થિતોઽભવત્ ॥ ૨૪॥

સ ચ દુન્દુભિનિર્હ્રાદો દૈત્યેન્દ્રો બલદર્પિતઃ ।
વ્યાઘ્રરૂપં સમાસ્થાય તમાદાતું મતિં દધે ॥ ૨૫॥

તં ભક્તં ધ્યાનમાપન્નં દૃઢચિત્તં શિવેક્ષણે ।
કૃતાસ્ત્રમન્ત્રવિન્યાસં તં ક્રાન્તુમશકન્ન સઃ ॥ ૨૬॥

અથ સર્વગતઃ શમ્ભુર્જ્ઞાત્વા તસ્યાશયં હરઃ ।
દૈત્યસ્ય દુષ્ટરૂપસ્ય વધાય વિદધે ધિયમ્ ॥ ૨૭॥

યાવદાદિત્સતિ વ્યાઘ્રસ્તાવદાવિરભૂદ્ધરઃ ।
જગદ્રક્ષામણિસ્ત્ર્યક્ષો ભક્તરક્ષણદક્ષધીઃ ॥ ૨૮॥

રુદ્રમાયાન્તમાલોક્ય તદ્ભક્તાર્ચિતલિઙ્ગતઃ ।
દૈત્યસ્તેનૈવ રૂપેણ વવૃધે ભૂધરોપમઃ ॥ ૨૯॥

સાવજ્ઞમથ સર્વજ્ઞં યાવત્પશ્યતિ દાનવઃ ।

તાવદાયાન્તમાદાય કક્ષાયન્ત્રે ન્યપીડયત્ ॥ ૩૦॥

પઞ્ચાસ્યસ્ત્વથ પઞ્ચાસ્યં મુષ્ટ્યા મૂર્દ્ધન્યતાડયત્ ।
ભક્તવત્સલનામાસૌ વજ્રાદપિ કઠોરયા ॥ ૩૧॥

સ તેન મુષ્ટિઘાતેન કક્ષાનિષ્પેષણેન ચ ।
અત્યાર્તમારટદ્વ્યાઘ્રો રોદસીં પૂરયન્મૃતઃ ॥ ૩૨॥

તેન નાદેન મહતા સમ્પ્રવેપિતમાનસાઃ ।
તપોધનાઃ સમાજગ્મુર્નિશિ શબ્દાનુસારતઃ ॥ ૩૩॥

તત્રેશ્વરં સમાલોક્ય કક્ષીકૃતમૃગેશ્વરમ્ ।
તુષ્ટુવુઃ પ્રણતાઃ સર્વે શર્વં જયજયાક્ષરૈઃ ॥ ૩૪॥

બ્રાહ્મણા ઊચુઃ ।
ત્રાયતાં ત્રાયતાં દેવ પ્રત્યૂહાદ્દારુણાદિતઃ ।
અનુગ્રહં કુરુષ્વેશ તિષ્ઠાત્રૈવ જગદ્ગુરો ॥ ૩૫॥

અનેનૈવ સ્વરૂપેણ વ્યાઘ્રેશ ઇતિ નામતઃ ।
કુરુ રક્ષાં મહાદેવ જ્યેષ્ઠસ્થાનસ્ય સર્વદા ॥ ૩૬॥

અન્યેભ્યો હ્યુપસર્ગેભ્યો રક્ષ નસ્તીર્થવાસિનઃ ।
દુષ્ટાનપાસ્ય ગૌરીશ ભક્તેભ્યો દેહિ ચાભયમ્ ॥ ૩૭॥

સનત્કુમાર ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં ભક્તાનાં ચન્દ્રશેખરઃ ।
તથેત્યુક્ત્વા પુનઃ પ્રાહ સ ભક્તાન્ભક્તવત્સલઃ ॥ ૩૮॥

મહેશ્વર ઉવાચ ।
યો મામનેન રૂપેણ દ્રક્ષ્યતિ શ્રદ્ધયાત્ર વૈ ।
તસ્યોપસર્ગસન્ધાનં પાતયિષ્યામ્યસંશયમ્ ॥ ૩૯॥

મચ્ચરિત્રમિદં શ્રુત્વા સ્મૃત્વા લિઙ્ગમિદં હૃદિ ।
સઙ્ગ્રામે પ્રવિશન્મર્ત્યો જયમાપ્નોત્યસંશયમ્ ॥ ૪૦॥

એતસ્મિન્નન્તરે દેવાઃ સમાજગ્મુઃ સવાસવાઃ ।
જયેતિ શબ્દં કુર્વન્તો મહોત્સવપુરઃસરમ્ ॥ ૪૧॥

પ્રણમ્ય શઙ્કરં પ્રેમ્ણા સર્વે સાઞ્જલયઃ સુરાઃ ।
નતસ્કન્ધાઃ સુવાગ્ભિસ્તે તુષ્ટુવુર્ભક્તવત્સલમ્ ॥ ૪૨॥

દેવા ઊચુઃ ।
જય શઙ્કર દેવેશ પ્રણતાર્તિહર પ્રભો ।
એતદ્દુન્દુભિનિર્હ્રાદવધાત્ ત્રાતા વયં સુરાઃ ॥ ૪૩॥

સદા રક્ષા પ્રકર્તવ્યા ભક્તાનાં ભક્તવત્સલ ।
વધ્યાઃ ખલાશ્ચ દેવેશ ત્વયા સર્વેશ્વર પ્રભો ॥ ૪૪॥

ઇત્યાકર્ણ્ય વચસ્તેષાં સુરાણાં પરમેશ્વરઃ ।
તથેત્યુક્ત્વા પ્રસન્નાત્મા તસ્મિંલ્લિઙ્ગે લયં યયૌ ॥ ૪૫॥

સવિસ્મયાસ્તતો દેવાઃ સ્વં સ્વં ધામ યયુર્મુદા ।
તેઽપિ વિપ્રા મહાહર્ષાત્પુનર્યાતા યથાગતમ્ ॥ ૪૬॥

ઇદં ચરિત્રં પરમં વ્યાઘ્રેશ્વરસમુદ્ભવમ્ ।
શ ૃણુયાચ્છ્રાવયેદ્વાપિ પઠેદ્વા પાઠયેત્તથા ॥ ૪૭॥

સર્વાન્કામાનવાપ્નોતિ નરઃસ્વમનસેપ્સિતાન્ ।
પરત્ર લભતે મોક્ષં સર્વદુઃખવિવર્જિતઃ ॥ ૪૮॥

ઇદમાખ્યાનમતુલં શિવલીલામૃતાક્ષરમ્ ।
સ્વર્ગ્યં યશસ્યમાયુષ્યં પુત્રપૌત્રપ્રવર્દ્ધનમ્ ॥ ૪૯॥

પરં ભક્તિપ્રદં ધન્યં શિવપ્રીતિકરં શિવમ્ ।
પરમજ્ઞાનદં રમ્યં વિકારહરણં પરમ્ ॥ ૫૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમ યુદ્ધખણ્ડે દુન્દુભિનિર્હ્રાદદૈત્યવધવર્ણનં નામાષ્ટપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫.૫૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમો યુદ્ધખણ્ડે

## ૨.૫.૫૯. એકોનષષ્ટિતમોઽધ્યાયઃ । વિદલોત્પલદૈત્યવધવર્ણનમ્ ।

સનત્કુમાર ઉવાચ ।
શ ૃણુ વ્યાસ સુસમ્પ્રીત્યા ચરિતં પરમેશિતુઃ ।
યથાવધીત્સ્વપ્રિયયા દૈત્યમુદ્દિશ્ય સંજ્ઞયા ॥ ૧॥

આસ્તાં પુરા મહાદૈત્યૌ વિદલોત્પલસંજ્ઞકૌ ।
અપુંવધ્યૌ મહાવીરૌ સુદૃપ્તૌ વરતો વિધેઃ ॥ ૨॥

તૃણીકૃતત્રિજગતી પુરુષાભ્યાં સ્વદોર્બલાત્ ।
તાભ્યાં સર્વે સુરા બ્રહ્મન્ દૈત્યાભ્યાં નિર્જિતા રણે ॥ ૩॥

તાભ્યાં પરાજિતા દેવા વિધેસ્તે શરણં ગતાઃ ।
નત્વા તં વિધિવત્સર્વે કથયામાસુરાદરાત્ ॥ ૪॥

ઇતિ બ્રહ્મા હ્યવોચત્તાન્ દેવ્યા વધ્યૌ ચ તૌ ધ્રુવમ્ ।
ધૈર્યં કુરુત સંસ્મૃત્ય સશિવાં શિવમાદરાત્ ॥ ૫॥

ભક્તવત્સલનામાસૌ સશિવાશઙ્કરઃ શિવઃ ।
શં કરિષ્યત્યદીર્ઘેણ કાલેન પરમેશ્વરઃ ॥ ૬॥

સનત્કુમાર ઉવાચ
ઇત્યુક્ત્વા તાંસ્તતો બ્રહ્મા તૂષ્ણીમાસીચ્છિવં સ્મરન્ ।
તેઽપિ દેવા મુદં પ્રાપ્ય સ્વં સ્વં ધામ યયુસ્તદા ॥ ૭॥

અથ નારદદેવર્ષિઃ શિવપ્રેરણયા તદા ।
ગત્વા તદીયભવનં શિવાસૌન્દર્યમુજ્જગૌ ॥ ૮॥

શ્રુત્વા તદ્વચનં દૈત્યાવાસ્તાં માયાવિમોહિતૌ ।
દેવીં પરિજિહીર્ષૂ તૌ વિષમેષુપ્રપીડિતૌ ॥ ૯॥

વિચારયામાસતુસ્તૌ કદા કુત્ર શિવા ચ સા ।
ભવિષ્યતિ વિધેઃ પ્રાપ્તોદયાન્નાવિતિ ॥ ૧૦॥

એકસ્મિન્સમયે શમ્ભુર્વિજહાર સુલીલયા ।
કૌતુકેનૈવ ચિક્રીડે શિવા કન્દુકલીલયા ॥ ૧૧॥

સખીભિઃ સહ સુપ્રીત્યા કૌતુકાચ્છિવસન્નિધૌ ॥ ૧૨॥

ઉદઞ્ચન્ત્યઞ્ચદઙ્ગાનાં લાઘવં પરિતન્વતી ।
નિશ્વાસામોદમુદિતભ્રમરાકુલિતેક્ષણા ॥ ૧૩॥

ભ્રશ્યદ્ધમ્મિલ્લસન્માલ્યસ્વપુરાકૃતભૂમિકા ।
સ્વિદ્યત્કપોલપત્રાલીસ્રવદમ્બુકણોજ્જ્વલા ॥ ૧૪॥

સ્ફુટચ્ચોલાંશુકપથતિર્યદઙ્ગપ્રભાવૃતા ।
ઉલ્લસત્કન્દુકાસ્ફાલાતિશ્રોણિતકરામ્બુજા ॥ ૧૫॥

કન્દુકાનુગસદૃષ્ટિનર્તિતભ્રૂલતાઞ્ચલા ।
મૃડાની કિલ ખેલન્તી દદૃશે જગદમ્બિકા ॥ ૧૬॥

અન્તરિક્ષચરાભ્યાં ચ દિતિજાભ્યાં કટાક્ષિતા ।
ક્રોડીકૃતાભ્યામિવ વૈ સમુપસ્થિતમૃત્યુના ॥ ૧૭॥

વિદલોત્પલસંજ્ઞાભ્યાં દૃપ્તાભ્યાં વરતો વિધેઃ ।
તૃણીકૃતત્રિજગતીપુરુષાભ્યાં સ્વદોર્બલાત્ ॥ ૧૮॥

દેવીં તાં સઞ્જિહીર્ષન્તૌ વિષમેષુપ્રપીડિતૌ ।
દિવ ઉત્તેરતુઃ ક્ષિપ્રં માયાં સ્વીકૃત્ય શામ્બરીમ્ ॥ ૧૯॥

ધૃત્વા પારિષદીં માયામાયાતામમ્બિકાન્તિકમ્ ।
તાવત્યન્તં સુદુર્વૃત્તાવતિચઞ્ચલમાનસૌ ॥ ૨૦॥

અથ દુષ્ટનિહન્ત્રા વૈ સાવજ્ઞેન હરેણ તૌ ।
વિજ્ઞાતૌ ચ ક્ષણાદાસ્તાં ચાઞ્ચલ્યાલ્લોચનોદ્ભવાત્ ॥ ૨૧॥

કટાક્ષિતાથ દેવેન દુર્ગા દુર્ગતિઘાતિની ।
દૈત્યાવિમાવિતિ ગણૌ નેતિ સર્વસ્વરૂપિણા ॥ ૨૨॥

અથ સા નેત્રસંજ્ઞાં સ્વસ્વામિનસ્તાં બુબોધ હ ।
મહાકૌતુકિનસ્તાત શઙ્કરસ્ય પરેશિતુઃ ॥ ૨૩॥

તતો વિજ્ઞાય સંજ્ઞાં તાં સર્વજ્ઞાર્દ્ધશરીરિણી ।
તેનૈવ કન્દુકેનાથ યુગપન્નિર્જઘાન તૌ ॥ ૨૪॥

મહાબલૌ મહાદેવ્યા કન્દુકેન સમાહતૌ ।
પરિભ્રમ્ય પરિભ્રમ્ય તૌ દુષ્ટૌ વિનિપેતતુઃ ॥ ૨૫॥

વૃન્તાદિવ ફલે પક્વે તાલેનાનિલલોલિતે ।
દમ્ભોલિના પરિહતે શ‍ૃઙ્ગે ઇવ મહાગિરેઃ ॥ ૨૬॥

તૌ નિપાત્ય મહાદૈત્યાવકાર્યકરણોદ્યતૌ ।
તતઃ પરિણતિં યાતો લિઙ્ગરૂપેણ કન્દુકઃ ॥ ૨૭॥

કન્દુકેશ્વરસંજ્ઞં ચ તલ્લિઙ્ગમભવત્તદા ।
જ્યેષ્ઠેશ્વરસમીપે તુ સર્વદુષ્ટનિવારણમ્ ॥ ૨૮॥

એતસ્મિન્નેવ સમયે હરિબ્રહ્માદયઃ સુરાઃ ।

શિવાવિર્ભાવમાજ્ઞાય ઋષયશ્ચ સમાયયુઃ ॥ ૨૯॥

અથ સર્વે સુરાઃ શમ્ભોર્વરાન્પ્રાપ્ય તદાજ્ઞયા ।
સ્વધામાનિ યયુઃ પ્રીતાસ્તથા કાશીનિવાસિનઃ ॥ ૩૦॥

સામ્બિકં શઙ્કરં દૃષ્ટ્વા કૃતાઞ્જલિપુટાશ્ચ તે ।
પ્રણમ્ય તુષ્ટુવુર્ભક્ત્યા વાગ્ભિરિષ્ટાભિરાદરાત્ ॥ ૩૧॥

સામ્બિકોઽપિ શિવો વ્યાસ ક્રીડિત્વા સુવિહારવિત્ ।
જગામ સ્વાલયં પ્રીતઃ સગણો ભક્તવત્સલઃ ॥ ૩૨॥

કન્દુકેશ્વરલિઙ્ગં ચ કાશ્યાં દુષ્ટનિબર્હણમ્ ।
ભુક્તિમુક્તિપ્રદં સર્વકામદં સર્વદા સતામ્ ॥ ૩૩॥

ઇદમાખ્યાનમતુલં શૃણુયાદ્યો મુદાન્વિતઃ ।
શ્રાવયેદ્વા પઠેદ્યશ્ચ તસ્ય દુઃખભયં કુતઃ ॥ ૩૪॥

ઇહ સર્વસુખં ભુક્ત્વા નાનાવિધમનુત્તમમ્ ।
પરત્ર લભતે દિવ્યાં ગતિં વૈ દેવદુર્લભામ્ ॥ ૩૫॥

ઇતિ તે વર્ણિતં તાત ચરિતં પરમાદ્ભુતમ્ ।
શિવયોર્ભક્તવાત્સલ્યસુચકં શિવદં સતામ્ ॥ ૩૬॥

બ્રહ્મોવાચ
ઇત્યુક્ત્વામન્ત્ર્ય તં વ્યાસં તન્નુતો મદ્વરાત્મજઃ ।
યયૌ વિહાયસા કાશીં ચરિતં શશિમૌલિનઃ ॥ ૩૭॥

યુદ્ધખણ્ડમિદં પ્રોક્તં મયા તે મુનિસત્તમ ।
રૌદ્રીયસંહિતામધ્યે સર્વકામફલપ્રદમ્ ॥ ૩૮॥

ઇયં હિ સંહિતા રૌદ્રી સમ્પૂર્ણા વર્ણિતા મયા ।
સદાશિવપ્રિયતરા ભુક્તિમુક્તિફલપ્રદા ॥ ૩૯॥

ઇમાં યશ્ચ પઠેન્નિત્યં શત્રુબાધાનિવારિકામ્ ।
સર્વાન્કામાનવાપ્નોતિ તતો મુક્તિં લભેત ના ॥ ૪૦॥

સૂત ઉવાચ
ઇતિ બ્રહ્મસુતઃ શ્રુત્વા પિત્રા શિવયશઃ પરમ્ ।
શતનામાપ્ય શમ્ભોશ્ચ કૃતાર્થોઽભૂચ્છિવાનુગઃ ॥ ૪૧॥

બ્રહ્મનારદસંવાદઃ સમ્પૂર્ણઃ કથિતો મયા ।

શિવઃ સર્વપ્રધાનો હિકિં ભૂયઃ શ્રોતુમિચ્છિસિ ॥ ૪૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં પઞ્ચમે યુદ્ધખણ્ડે વિદલોત્પલદૈત્યવધવર્ણનં નામૈકોનષષ્ટિતમોઽધ્યાયઃ ॥ ૨.૫.૫૯॥

॥ ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયરુદ્રસંહિતાયાં પઞ્ચમઓ યુદ્ધખણ્ડઃ સમાપ્તઃ ॥ ૨.૫॥

॥ સમાપ્તેયં દ્વિતીયા રુદ્રસંહિતા ॥

*Shri Shiva Mahapuranam 25 Rudra Samhita Yuddhakhandah*

pdf was typeset on January 23, 2026

Please send corrections to *sanskrit@cheerful.com*